८. भाषिक-सांस्कृतिक-भौगोलिकवैविध्यानां सम्मानपरं चिन्तनम्

९. पाठगतसन्दर्भस्याकलनानुमानपूर्वकं चरित्रपरिवेशानां प्रदर्शनम्

१०. तार्किक-विमर्शनात्मक-समस्यासमाधानप्रधानाभिव्यक्तिकौशलप्रदर्शनम्

११. अनुसन्धानोन्मुखी रचनाकौशलप्रस्तुतिः

१२. सदसद्विवेकप्रदर्शिन्या बुद्धेर्विकासः ।

**३. कक्षागतशिक्षणोपलब्धिः**

**कक्षा ११**

**माध्यमिकस्तरीयायां ११ कक्षायां संस्कृतरचनाविषयमधीत्य छात्रा अधो निर्दिष्टविषयेषु क्षमा भविष्यन्ति –**

**श्रवणभाषणशिल्पम्**

१. पदेषु प्रयुक्तानां वर्णानां सपरिचयं शुद्धोच्चारणम्

२. विविधपाठान्, सञ्चारमाध्यमान् अन्यांश्च विषयान् (सामग्रीः) श्रुत्वा तर्कपूर्णाभिव्यक्तिः

३. परिचितेषु अपरिचितेषु च विषयेषु सामूहिकविमर्शनम्

४. सन्दर्भानुसारेण साभिनयं मौखिकाभिव्यक्तिः

५. प्रत्यक्षीकृतानां विषयाणां क्रमेण प्रस्तुतिः ।

**पठनशिल्पम्**

१. पठनगतिविकासकारि लिखितविषयाणां (सामग्रीणां) पठनम्

२. लिखितविषयाणां (सामग्रीणां) बोधपूर्वकं पठनम्

३. पाठ्यवस्तूनां विशिष्टार्थं प्रेरकं व्यावहारिकञ्च सन्देशमात्मसात्कृत्य पठनम्

४. पारिभाषिकशब्दानां वाक्येषु प्रयोगकौशलवर्धकं पठनम्

५. लिखितवाङ्मयस्य गतिं लयञ्च संयोज्य सुसंस्कृतं (सशुद्धि) पठनम्

६. ज्ञानेन, विज्ञानेन च सह सम्बद्धानां पाठानामन्तरं निश्चित्य उत्तरप्रदानसामर्थ्यार्जनाय पठनम्

७. पाठेषु प्रयुक्तानां पदानां वर्णविन्यासार्थबोधादिकार्याय शब्दकोशस्य प्रयोगसामर्थ्याधायकं पठनम् ।

**लेखनशिल्पम्**

१. परिचित्य वर्गीकृत्य च वर्णानां लेखनम्
२. लेख्यचिह्नानि प्रयुज्य लेखनम्
३. मौखिकलिखिताभिव्यक्तिभ्यः सूत्राणि निर्माय सारांशलेखनम्
४. विविधान् विषयानाधृत्यानुच्छेदरचनाकौशलप्रदर्शनम्
५. पठितपाठानां प्रश्ननिर्माणमुत्तरलेखनञ्च
६. पत्र-सूचना-निवेदन-आमन्त्रण-वर्धापन-विज्ञापन-श्रद्धाञ्जलि-समवेदना-शुभकामनाविषयकं व्यावहारिकलेखनम्
७. पाठस्य स्वरूप-विषय-घटना-चरित्राणां परिचयपुरःसरं भावविचारलयलालित्यानि अवगत्य लेखनम्
८. विविधविषयेषु निबन्धलेखनम्
९. निर्धारितशीर्षकेषु टिप्पणीलेखनम्
१०. शब्दव्युत्पादनपूर्वकं शब्दधातुरूपावलीलेखनम्
११. लिङ्ग-वचन-पुरुष-कारक-कालानामाधारेण वाक्यान्तरणम्
१२. पाठसन्दर्भं समाश्रित्य वाक्यस्वरूपलेखनम्
१३. कोशप्रविष्टिमनुसृत्य पदविन्यासः
१४. नेपालीभाषातः संस्कृते संस्कृताद् नेपालीभाषायाञ्चानुवादः ।

**कक्षा १२**

**माध्यमिकस्तरीयायां १२ कक्षायां संस्कृतरचनाविषयमधीत्य छात्रा अधो निर्दिष्टविषयेषु क्षमा भविष्यन्ति –**

**श्रवणभाषणशिल्पम्**

१. पदानां लिङ्गव्युत्पत्तिसहितं शुद्धोच्चारणम्
२. विविधमाध्यमैः श्रुतेषु विषयेषु विश्लेषणात्मकप्रतिक्रियाप्रकाशनम्
३. विविधविषयशीर्षकेषु सामूहिकविमर्शनं प्रस्तुतिश्च
४. साभिनयं सन्दर्भानुसारेण स्तरीयभाषायां मौखिकाभिव्यक्तिः
५. प्रत्यक्षीकृतानां विषयाणां क्रमेण प्रस्तुतिः
६. सामाजिक-सांस्कृतिक-भौगोलिकपक्षान् विचार्य प्रतिक्रियाप्रकटनम्
७. औपचारिककार्यक्रमेषु सहभागिता, स्वस्य विचाराणां सशिष्टाचारं प्रभावकारिरूपेण प्रकाशनञ्च ।

**पठनशिल्पम्**

१. लिखितविषयाणां (सामग्रीणां) सुसंस्कृतं (सशुद्धि) द्रुतपठनम्
२. लिखितविषयाणां (सामग्रीणां) भावविचारसन्देशानां विश्लेषणसामर्थ्योपार्जनत्वेन पठनम्
३. विविधपाठानां विशिष्टांशस्य व्याख्यायां, गुणदोषप्रकाशने च सामर्थ्योद्भावकतया पठनम्
४. विषयगतपाठानां पारिभाषिकशब्दान् सञ्चित्य वाक्येषु अर्थप्रकाशनसामर्थ्याधायकं पठनम्
५. लिखितविषयाणां (सामग्रीणां) गति-यति-लयमाधुर्यं परिपाल्य पठनम्
६. प्रश्नोत्तरणे नैपुण्यार्जनार्थं ज्ञानविज्ञानप्रधानपाठानां पठनम्

७. पाठेषु प्रयुक्तानां पदानां वर्णविन्यासार्थबोध-व्युत्पत्ति-पदवर्गनिर्णयनादिकार्याय शब्दकोशस्य प्रयोगपूर्वकं पठनम्

८. पाठस्य भावसंवेगविचारानुसारेण स्वराणामारोहावरोहनियमपालनपूर्वकं पठनम् ।

**लेखनशिल्पम्**

१. पदे सन्निहितां स्वरव्यञ्जनसंरचनां पृथक्कृत्य लेखनम्

२. लेख्यचिह्नानि प्रयुज्य लेखनम्

३. साहित्य-संस्कृति-दर्शन-विज्ञान-भूगोल-वाणिज्याऽऽचारशास्त्र-समाजशास्त्रसम्बद्धं प्रयोजनपरकलेखनम्

४. पठितपाठानां विषयक्षेत्रं निर्णीय प्रश्ननिर्माणमुत्तरलेखनञ्च

५. वित्तकोशीयप्रपत्राऽऽदानप्रदान-सहमतिपत्रानुबन्धसेवापत्र-घटनाविवरणाभिनन्दनसम्मानपत्र-व्यक्तिगतविवरणनिर्माणोपवेशनिर्णयपुस्तिका-प्राशासनिकटिप्पणीप्रभृतिव्यावहारिकलेखनम्

६. निर्दिष्टशीर्षकेषु सामयिकविषये च प्रतिवेदनलेखनम्

७. पाठस्य संरचना-घटना-चरित्र-परिवेशान् निर्णीय भावमनुसृत्य च लेखनम्

८. विविधविषयेषु वर्णन-विवरण-भाव-विचार-प्रधाननिबन्धलेखनम्

९. सञ्चारमाध्यमेषु प्रतिक्रियादिलेखनम्

१०. प्रकाशितप्रसारितविषयान् (सामग्रीः), पुस्तकानि, लेख-रचनाश्च पठित्वा प्रतिक्रियालेखनम्

११. घटना अधीत्य प्रतिवेदनलेखनम्

१२. पठितविषयमनुकृत्य निर्दिष्ट-सर्जनात्मकलेखनम्

१३. लकारनिर्देशनपूर्वकं धातुरूपावलिलेखनम्

१४. कोशीयप्रविष्टिमनुसृत्य पदविन्यासः

१५. नेपालीभाषातः संस्कृते संस्कृताद् नेपालीभाषायाञ्चानुवादः ।

**४. विषयक्षेत्रं क्रमश्च**

**कक्षा ११**

| **क्र.सं** | **विषयः** | **क्षेत्रम्** | **बोधः** | **अभिव्यक्तिः** | **व्याकरणम्** | **पाठ्य घण्टाः** |
|---|---|---|---|---|---|---|
| १. | गद्यम् | ऐतिहासिकम् | गद्यस्य पठनबोधः । इतिहाससम्बद्ध-गद्यांशस्य बोधः । | गद्यांशस्य निष्कर्षणम् । गद्यांशस्य आदर्शपठनम् । इतिहासविषय-सम्बद्धगद्यांशस्य बोधः । प्रश्नानामुत्तरलेखनञ्च । | वर्णानां परिचयः । तव्य-तव्यत्-अनीयर्-यत्-क्यप्-ण्यत्-प्रत्ययैर्निष्पन्नानां कृदन्त-शब्दानां प्रयोगः । | १७ |
| २. | पद्यम् | पौराणिकम् (काव्यात्मकम्) | पद्यस्य पठनबोधः । साहित्यिकानुच्छेदस्य पठनबोधः । | पद्यस्य गद्ये रूपान्तरणम् । पद्यस्य लयात्मकवाचनम् । साहित्यिकानुच्छेदस्य बोध-प्रश्नानामुत्तरलेखनम् । | वर्णानां वर्गीकरणं लेखनञ्च । अप्-अच्-ल्युट्-क्तिन्-घञ्-युच्-अङ्-प्रत्ययैर्निष्पन्नानां कृदन्तशब्दानां प्रयोगः । | १५ |
| ३. | व्यावहारिक-लेखनम् | पत्रं निवेदनञ्च (नैजं कार्यालयीयं | पत्रस्य पठनबोधः । निवेदनस्य पठनबोधः | पत्रसंरचनाविमर्शनम् । निवेदनसंरचनाविमर्शनम् । | मतुप्-लच्-इलच्-श-न-उरच्-ण-र-व-वलच्-प्रत्ययैर्निष्पन्नानां | ८ |

| | | | | | | |
|---|---|---|---|---|---|---|
| | | च) | पत्रस्य घटकनिर्माणम्<br>निवेदनस्य घटकनिर्धारणम् ।<br>सामाजिकसम्बद्धानुच्छेदस्य पठनबोधः | पत्रनिवेदनयोर्विषयविमर्शनम् | तद्धितान्तशब्दानां प्रयोगः ।<br>समासस्वरूपम् । | |
| ४. | रूपकम् | कविकल्पनाश्रितम् | रूपकस्य पठनबोधः ।<br>रूपकतत्त्वबोधः<br>पर्यावरणसंरक्षण- सम्बद्धगद्यांशस्य बोधः । | रूपकस्य अनुच्छेदे रूपान्तरणम् ।<br>साभिनयं रूपकपठनम् ।<br>रूपकस्य सन्देशविमर्शनम् ।<br>पर्यावरणसंरक्षणसम्बद्धस्य गद्यांशस्य बोधप्रश्नानामुत्तरलेखनम् । | वाक्यान्तरणम्<br>(काल-वाच्य-वचनानाम् आधारेण) ।<br>अनुवादः (नेपालीतः संस्कृते, संस्कृताद् नेपाल्याम्) ।<br>क्त-क्तवतु-विच्-मनिन्, क्वनिप्-प्रत्ययैर्निष्पन्नानां कृदन्तशब्दानां प्रयोगः<br>इन्-ठन्-वति-युस्-आलच्-आटच्-प्रत्ययैर्निष्पन्नानां तद्धितान्तशब्दानां प्रयोगः । | १५ |
| ५. | गद्यम् | नीतिकथा-श्रितम् | नीतिकथाबोधः ।<br>दर्शनसम्बद्ध-गद्यांशस्य बोधः । | नीतिकथायाः सन्देशप्रकाशनम् ।<br>नीतिकथायाः प्रश्नानामुत्तरप्रदानम् ।<br>दर्शनसम्बद्धगद्यांशस्य बोधप्रश्नानामुत्तरलेखनम् । | केवलाव्ययीभावसमासयोः सोदाहरणलक्षणनिरूपणम् ।<br>वनिप्-तृच्-क्विप्-प्रत्ययनिष्पन्नानां कृदन्तशब्दानाम् इतच्-आरकन्-घ-ख-आलच्-तद्धितप्रत्ययनिष्पन्नानां शब्दानाञ्च वाक्येषु प्रयोगः ।<br>समस्तपदानां विग्रहप्रदर्शनं विग्रह-वाक्यानां समसनञ्च । | १५ |
| ६. | व्यावहारिक-लेखनम् | सूचना-आमन्त्रण-वर्धापन-विज्ञापन-शुभकामनाः | सूचना-आमन्त्रण-वर्धापन-विज्ञापन-शुभकामनानां भिन्नताबोधः,<br>एतेषां लेखनानामावश्यकतत्त्वबोधः । मानवमूल्य-निरूपकस्य गद्यांशस्य पठनबोधः । | सूचना-आमन्त्रण-वर्धापनानां विषयविश्लेषणम्<br>विज्ञापनशुभकामनयोरावश्यकताख्यापनम्<br>एतेषु विषयेषु टिप्पणीलेखनम्<br>एतेषु विषयेषु लेख्यचिह्नानां महत्त्ववर्णनम् | क्मरच्-षाकन्-ल्यु-णिनि-प्रत्ययैर्निष्पन्नानां कृदन्तशब्दानाम् अण्-वुन्-अञ्-इञ्-प्रत्ययैर्निष्पन्नानां तद्धितान्तशब्दानाञ्च वाक्येषु प्रयोगः ।<br>वाक्येषु सन्धिविमर्शनम् । | १५ |
| ७. | पद्यम् | नीतिपद्यम् | नीतिपद्यानां विषयवस्तुबोधः ।<br>नीतिपद्यानां जीवनोपयोगित्वानुशीलनम् ।<br>कृषिसम्बद्धगद्यांशस्य बोधः । | नीतिपद्यानां सन्देशविमर्शनम्<br>आचरणे नीतिपद्यानां प्रभावकथनम् ।<br>नीतिपद्यानि आश्रित्य उत्तरप्रदानम् ।<br>कृषिसम्बद्धगद्यांशस्य बोधप्रश्नानामुत्तरलेखनम् । | सोदाहरणं तत्पुरुषसमासभेदप्रदर्शनम्<br>कृदन्त-तद्धितान्तशब्दानां प्रयोगेण भाषाविषयकानुच्छेदरचना<br>वाक्यान्तरणम् (लिङ्ग-पुरुष-विध्यर्थनिषेधार्थानामाधारेण) | ११ |

| | |
|---|---|
| सैद्धान्तिकाभ्यासः | ९६ |
| प्रयोगात्मकाभ्यासः | ३२ |
| योगः | १२८ |

**कक्षा १२**

| क्र. सं. | विषयः | क्षेत्रम् | बोधः | अभिव्यक्तिः | व्याकरणम् | पाठ्य घण्टाः |
|---|---|---|---|---|---|---|
| १. | गद्यम् | उपदेशात्मकम् (कविकल्पना-श्रितम्) | गद्यस्य बोधः । <br> प्रशासनसम्बद्ध-गद्यांशस्य बोधः । | गद्यांशस्य स्वशैल्या कथनम् । <br> गद्यांशस्य पठनम् । <br> प्रशासनसम्बद्धगद्यांशस्य बोधप्रश्नानामुत्तरलेखनम् । | अच्-उ-अण्-उकञ्-प्रत्ययैर्निष्पन्नानां कृदन्त-शब्दानां प्रयोगः । <br> वाक्यान्तरणम् (काल-वाच्य-वचनानामाधारेण) । | १५ |
| २. | पद्यम् | प्रकृतिप्रधानम् | पद्यस्य पठनबोधः । <br> विधिविषयसम्बद्ध-गद्यांशस्य बोधः । | पद्यस्य गद्ये रूपान्तरणम् <br> पद्यस्य लयात्मकवाचनम् <br> पद्यस्य भावार्थप्रकाशनम् <br> विधिसम्बद्धगद्यांशस्य प्रश्नानामुत्तरलेखनम् | फक्-ढक्-यञ्-ठञ्-ख-प्रत्ययैर्निष्पन्नानां तद्धितान्तशब्दानां प्रयोगः । <br> कर्मधारयसमासस्य सभेदं स्वरूपनिर्देशनम् । <br> तत्पुरुषकर्म-धारययोरन्तरप्रकाशनम् । | १५ |
| ३. | व्यावहारिक-लेखनम् | सहमतिपत्रा-नुबन्धसेवा-भिनन्दनसम्मानपत्रवैयक्तिक-विवरणलेखनम् | एतेषां पत्राणां विषयबोधः । <br> भूगोलविषयसम्बद्ध-गद्यांशस्य बोधः । | एतेषां पत्राणामावश्यकताया औचित्यस्य च विषये विमर्शनम् । <br> स्वपरिचयकथनम् । <br> भूगोलविषयसम्बद्ध-गद्यांशात् स्थानपरिचयप्रस्तुतिः । | क्त्वा-ल्यप्-तुमुन्-णमुल्-प्रत्ययैर्निष्पन्नानां कृदन्तशब्दानां प्रयोगेणानुच्छेदरचना । <br> ण्य-यत्-इतच्-इष्ठन्, ईयसुन्-तरप्-तमप्-प्रत्ययैर्निष्पन्नानां तद्धितान्तशब्दानां प्रयोगेणानुच्छेदरचना । <br> द्विगुसमासस्य सभेदं लक्षणोदाहरणनिरूपणम् । | ८ |
| ४. | रूपकम् | पौराणिकम् | रूपकस्य पठनबोधः । <br> रूपके संवादाभिनययो-र्महत्त्वानुशीलनम् । <br> सदाचारसम्बद्ध-गद्यांशस्य पठनबोधः | रूपकस्य कथासंरचनायां रूपान्तरणम् । <br> रूपकस्य सारतत्त्वस्य विमर्शनम् । <br> सदाचारसम्बद्धगद्यांशस्य सूत्रनिर्देशनं सङ्क्षेपीकरणञ्च | शतृ-शानच्-घञ्-प्रत्ययनिर्मित-शब्दानां त्रिषु एव लिङ्गेषु रूपावलीलेखनम् <br> जातीयर्-मात्रच्-देशीयर्-ठक्-तसिल्-त्रल्-तद्धित प्रत्ययैर्निष्पन्नानां शब्दानां प्रयोगः । <br> बहुव्रीहिसमासस्य सभेदं लक्षणोदाहरणनिरूपणम् । | १५ |
| ५ | पद्यम् | विद्यामहिम- | पद्यस्य पठनबोधः । | पद्यस्य गद्ये रूपान्तरणम् । | ण्वुल्, तृच्, आलुच्, | १५ |

| | | | | | | |
|---|---|---|---|---|---|---|
| | | प्रकाशकम् | पद्यस्य प्रेरकपक्षानुशीलनम् ।<br>वाणिज्यविषय-सम्बद्धगद्यांशस्य बोधः | पद्यस्य भावार्थप्रकाशनम् ।<br>पद्यस्य लयात्मकवाचनम् ।<br>वाणिज्यसम्बद्ध-गद्यांशमाधृत्य प्रश्ननिर्माणमुत्तरलेखनञ्च । | कञ्प्रत्ययैर्निष्पन्नानां कृदन्तशब्दानां प्रयोगः ।<br>दानीम्, दा, थाल्, द्युस्-प्रत्ययैर्निष्पन्नानां तद्धितान्तशब्दानां प्रयोगः ।<br>वाक्यान्तरणम् (लिङ्ग-पुरुष-विध्यर्थनिषेधार्थानामाधारेण ) | |
| ६. | व्यावहारिक-लेखनम् | निर्णयपुस्तिका-प्राशासनिक-टिप्पणी-लेखनम् । | निर्णयपुस्तिका-प्राशासनिक-टिप्पण्योर्बोधः ।<br>वनसंरक्षणसम्बद्ध-गद्यांशस्य बोधः । | निर्णयपुस्तिकाया विषये विमर्शनम् ।<br>प्राशासनिकटिप्पण्याः निदर्शनस्वरूपलेखनम् ।<br>वनसंरक्षणसम्बद्धगद्यांशस्य प्रश्नानामुत्तरलेखनम् । | आहि-अतसुच्-त्व-तल्-इमनिच्-ष्यञ्-प्रत्ययैर्निष्पन्नानां तद्धितान्तशब्दानां प्रयोगेणानुच्छेदरचना ।<br>अनुवादः (नेपालीभाषातः संस्कृते, संस्कृताद् नेपालीभाषायाम्)<br>सभेदं द्वन्द्वसमासस्य लक्षणोदाहरणनिरूपणम् । | १५ |
| ७. | गद्यम् ( निबन्धः) | योगाभ्यास-विषयकम् | निबन्धस्य विषयबोधः<br>योगाभ्यासा-नुशीलनम् ।<br>प्राकृतिकोपचार-सम्बद्धगद्यांशस्य बोधः | योगाभ्यासस्य लाभस्य विषये सम्भाषणम्<br>योगाभ्यासस्य प्रचारविषये विमर्शनम् ।<br>प्राकृतिकोपचारसम्बद्ध-गद्यांशस्य बोधप्रश्नानामुत्तरलेखनम् । | अण्-वुञ्-वत्-छ-प्रत्ययैर्निष्पन्नानां तद्धितान्तशब्दानां वाक्येषु प्रयोगः ।<br>क्त-क्तवतु-तव्यत्-अनीयर्-तृच्-प्रत्ययैर्निष्पन्नानां शब्दानां त्रिषु लिङ्गेषु रूपावलिलेखनम् ।<br>कोशप्रविष्टिमनुसृत्य शब्दानां क्रमनिर्धारणम् ।<br>अव्ययीभाव-तत्पुरुष-कर्मधारय-बहुव्रीहि-द्वन्द्वसमासयुतानां शब्दानां प्रयोगेणानुच्छेदरचना । | १३ |
| सैद्धान्तिकाभ्यासः | | | | | | ९६ |
| प्रयोगात्मकाभ्यासः | | | | | | ३२ |
| योगः | | | | | | १२८ |

## ५. प्रयोगात्मककार्यं परियोजनाकार्यञ्च

| क्र.सं. | क्षेत्रम् | परीक्षणीयाः पक्षाः | अङ्कभारः | मूल्याङ्कनाधाराः |
|---|---|---|---|---|
| १. | शिक्षण-सहभागिता | (क) उपस्थितिः<br>(ख) सहभागिता | ३ | • विद्यार्थिनां दैनिकोपस्थितेरभिलेखः<br>• भाषिकशिल्पविकासाय वैयक्तिक-युगल-समूहगतादि-कक्षागतशिक्षणसहभागिता |

| | | | | |
|---|---|---|---|---|
| २. | कक्षाकार्यं परियोजना-कार्यं वा | कक्षाकार्यं परियोजनाकार्यं वा | ६ | ● श्रवण-भाषण-पठन-लेखनशिल्पविकास-सम्बद्धा लिखिता मौखिकी च प्रस्तुतिः<br>● गृहकार्यं कक्षाकार्यं वा<br>● भाषिकशिल्पविकाससम्बद्ध-परियोजनाकार्यस्य प्रतिवेदनमन्तर्वार्ता, तस्याभिलेखश्च |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | (क) श्रवणम् | ५ | ● रेडियो-क्यासेट-मोबाइल-नामधेयानामन्येषां वैद्युतोपकरणानां वा माध्यमेन संवाद-समाचार-साहित्यिकाभिव्यक्तिः<br>● श्रुतिलेखनम्<br>● सन्देशमूलकगद्यांशं श्रावयित्वा अनुमान-पूर्वानुमान-प्रश्नोत्तर-शब्दबोधार्थबोध-भावबोध-सन्दर्भबोध-कथाकथन-घटनावर्णन-मुख्यसूत्रीकरणसम्बद्धान् प्रश्नान् पृष्ट्वा उत्तरकथनं लेखनञ्च ।<br>अथवा<br>● १००-१३० शब्दात्मकमदृष्टांशं गद्यांशं पद्यांशं वा श्रावयित्वा अनुमान-पूर्वानुमान-प्रश्नोत्तर-शब्दबोधार्थबोध-भावबोध-सन्दर्भबोध-कथाकथन-घटनावर्णन-मुख्यसूत्रीकरणसम्बद्धान् प्रश्नान् पृष्ट्वा उत्तरकथनं लेखनञ्च |
| | | (ख) भाषणम् | ५ | **(अ) मौखिकवर्णनं कथाकथनं वा (४ अङ्काः)**<br>किञ्चिद् विषयवस्तु, चित्रं परिवेशादिकं निर्दिश्य मौखिकवर्णनम् । तत्र क्रमे वक्त्रा स्वाभिव्यक्तौ स्पष्टता-शैली-भाषिकस्तर-शुद्धोच्चारण-गति-यति-लयाभिनयप्रभृतिपक्षेषु ध्यानं देयम् ।<br>अथवा<br>कथां श्रुत्वा कथाकथने घटनापात्रपरिवेशादिवर्णने प्रवर्तनम्<br>**(आ) सस्वरवाचनम्** (३ **अङ्काः**)<br>पत्रपत्रिकाभ्योऽन्यलिखितसामग्रीभ्यो वा शब्दात्मकं गद्यांशं पद्यांशं वा निर्दिश्य गति-यति-लयानुकूल्येन भावानुकूल्येन च सस्वरवाचने प्रवर्तनम् । वाचनक्रमे वक्त्रा स्वाभिव्यक्तौ स्पष्टता-शैली-भाषिकस्तर-शुद्धोच्चारण-गति-यति-लयाभिनयप्रभृतिपक्षेषु विशेषतोऽवदानं देयम् |
| ४. | त्रैमासिक परीक्षा | मौखिकं लिखितं वा | ६ | त्रैमासिकपरीक्षायाः प्राप्ताङ्कस्यानुपातिकप्रतिशताधारेणाङ्कनिर्धारणं कर्तव्यम् |
| योगः | | | २५ | |

## ६. शिक्षणसहजीकरणप्रक्रिया

संस्कृतभाषायाः संस्कृतव्याकरणस्य च मूल्यमान्यताऽऽदर्शानामध्ययनस्य माध्यमेन विद्यार्थिनां भाषाव्याकरणयोर्विविधपक्षाणां संस्कृतसम्बद्धविषयाणां वा ज्ञानेन सह सच्चरित्रवतां नैतिकतायुतानां च नागरिकाणां निर्माणमस्य विषयस्योद्देश्यं विद्यते । एतस्मिन् समाविष्टानां विषयवस्तुनामध्यापनक्रमे सर्वेभ्यः क्षेत्रभ्यः समानं महत्त्वं प्रदातव्यं भवति । सम्बद्धविषयवस्तुनः सहजीकरणपूवर्कं ज्ञानशिल्पधारणानां विकासनमावश्यकम् । विद्यार्थिषु सैद्धान्तिकपक्षेण सह व्यावहारिकपक्षञ्च विकासस्यानुकूलचिन्तनव्यवहारयोः समुन्नयनमेतस्य विषयस्य मुख्योद्देश्यं निर्धारितं वर्तते ।

भाषाशिक्षणोपक्रमे भाषिकशिल्पस्य विकासाय अपरिहार्यतया अध्ययनसहजीकरणमपेक्षते । भाषायाः शिक्षणविधौ विद्यार्थिकेन्द्रिताः क्रियाकलापा अवलम्बनीया भवन्ति । सहजीकरणं च छात्रपृष्ठभूमि-पाठ्यक्रमोद्देश्य-पाठ्यविषयान् अवलम्बते । वैयक्तिकं सामूहिकं चाभ्यासं समाश्रित्य शिक्षणसहजीकरणं सम्पद्यते । अधो लिखिता

अध्ययनसहजीकरण-शिक्षणक्रियाकलापा अस्य पाठ्यक्रमस्य उद्देश्यसिद्धये उपादानानि भवन्ति -

१. विषयाणां (विधानां) माध्यमेन शिल्पानां शिक्षणम् - गद्यपद्यरूपकव्यावहारिकलेखनरूपाणां शिल्पविकासस्य साधनानामवलम्बनम् ।

२. शिल्पाश्रितं शिक्षणम् - भाषिकशिल्पस्य विकासाय भाषायाः श्रवण-भाषण-पठन-लेखनरूपाणां चतुर्णामेव शिल्पानामेकीकृतशिक्षणम् ।

३. अभ्यासप्रधानाः सर्जनात्मकाश्च क्रियाकलापाः - भाषिकशिल्पचतुष्टयस्य विकासाय अधो लिखितानामभ्यासप्रधानानां सर्जनात्मकानाञ्च क्रियाकलापानां सम्पादनमावश्यकं भवति -

(क) प्रस्तुतीकरणम् (ख) अभ्यासः (ग) उत्पादनम् (घ) पठनबोधः

(ङ) प्रयोगात्मककार्यम् (च) पृष्ठपोषणम् (छ) आत्ममूल्याङ्कनम्

४. बहुविधक्षमतायाः स्तराणाञ्चानुसारेण शिक्षणम्

५. सदसद्विवेकविकासः

६. सहकार्यप्रधानशिक्षणम्

७. सामूहिकमूल्याङ्कनापेक्षि शिक्षणम्

**शिक्षणप्रक्रियायाः सम्भाव्याः शिल्पगतसंयुक्तक्रियाकलापाः**

(क) श्रवणशिक्षणस्य सम्भाव्याः क्रियाकलापाः

- शुद्धाशुद्धोच्चारणं संश्राव्य विद्यार्थिभ्यः शुद्धोच्चारणं निश्चेतुं निर्देशनम्
- संवादप्रश्नोत्तरविमर्शनानि श्रावयित्वा प्रतिक्रियाभिव्यक्त्यै प्रेरणम्
- गद्यपद्ययोः प्रेरकमंशं श्रावयित्वा तस्य पुनरावृत्त्यै उत्प्रेरणम्
- प्रसिद्धां घटनां संश्राव्य तस्याः प्रमुखसूत्राणां कथनाय निर्देशनम्
- सञ्चारमाध्यमानां कार्यक्रमान् श्रावयित्वा तेषां विषये प्रश्नोत्तरविमर्शने सञ्चालयितुं प्रेरणम्

**(ख) सम्भाषणशिक्षणस्य सम्भाव्याः क्रियाकलापाः**

- सामूहिकरूपेण वर्णानां शुद्धोच्चारणाय निर्देशनम्
- पाठ्यवस्तुनः पद्यानां गतियतिलयमाधुर्यं संरक्ष्य प्रवाचनं विद्यार्थिभ्यस्तदनुरूपं प्रवाचनाय प्रेरणञ्च
- दृष्टानां श्रुतानामनुभूतानाञ्च विषयाणां चरित्रघटनापरिणामानां वर्णनाय निर्देशनम्
- रूपकस्य संवादं साभिनयं वक्तुं प्रेरणम्
- सुभाषितस्य भावार्थं निगदितुं निर्देशनम्
- व्यावहारिकलेखनस्य आवश्यकतां वर्णितुमुत्प्रेरणम्
- नेपालीभाषायां भाषितानि वाक्यानि संस्कृतभाषायामनुभाषितुं निर्देशनम्

**(ग) पठनशिक्षणस्य सम्भाव्याः क्रियाकलापाः**

- समस्तपदानि प्रयुज्य वाक्यनिर्माणपूर्वकं पठनाय अभिप्रेरणम्
- गद्यपद्यरूपकाणां विशिष्टार्थबोधकमंशं सञ्चित्य पठितुं निर्देशनम्
- पाठस्यानुच्छेदं पठित्वा तस्य मूलसूत्राणि निर्माय च पठनार्थमुत्प्रेरणम्
- व्यावहारिकलेखनसम्बद्धपाठानां प्रकारनिर्देशनपूर्वकं पठनाय प्रेरणम्
- पद्यानि पठित्वा तदनुपठितुं निर्देशनम्

- अनुच्छेदस्य मन्दगत्या द्रुतगत्या च पठनाय उत्प्रेरणम्

(घ) **लेखनशिक्षणस्य सम्भाव्याः क्रियाकलापाः**

- वर्णविन्यासविधिमवलम्ब्य शुद्धतया लेखनाय निर्देशनम्
- पाठ्यवस्तूनामुत्तरलेखनाय उत्प्रेरणम्
- पदवाक्यानुच्छेदानां श्रुतिलेखनाय निर्देशनम्
- लेख्यचिह्नरहितमनुच्छेदं दत्त्वा तादृशानां चिह्नानां प्रयोगाय प्रेरणम्
- पाठ्यवस्तुनो घटनाचरित्रपरिवेशान् वर्णयित्वा लेखनाय अभिप्रेरणम्
- मूलसूत्राणि निर्दिश्य व्यावहारिकलेखनाय निर्देशनम्
- यथेच्छं लिखितरचनां निर्मातुं निर्देशनम्
- अन्यैर्लिखितानां विषयाणां (सामग्रीणां) सम्पादनाय प्रेरणम्
- अशुद्धमनुच्छेदं प्रदाय तस्य शुद्धतया पुनर्लेखनाय अभिप्रेरणम्

## ७. विद्यार्थिमूल्याङ्कनप्रक्रिया

विद्यार्थिनां शिक्षणोपलब्धिं सुनिश्चेतुं निर्माणात्मकं निर्णयात्मकञ्चोभयप्रकारकमेव मूल्याङ्कनं विधातव्यं भवति । विद्यार्थिनां शिक्षणोपलब्धे, सुधाराय कक्षाशिक्षणस्यैव क्रमे कक्षाकार्य-परियोजनाकार्य-प्रस्तुतीकरणोपलब्धिपरीक्षासदृशान् क्रियाकलापान् कारयित्वा सैद्धान्तिकज्ञानशिल्पयो-रवाप्तिरावश्यकी । एतत्कार्यस्य प्रभावकारिरूपेण क्रियान्वयनाय, विद्यार्थिनां शिक्षणस्तरस्य सुधाराय च सहजीकरणक्रियाकलापस्य अभिन्नाङ्गस्य रूपेण निर्माणात्मकमूल्याङ्कनमुपयोक्तव्यम् । निर्माणात्मकमूल्याङ्कनस्य शिक्षणोपलब्धेर्निश्चितभारो निर्णयात्मकमूल्याङ्कनेऽपि संयोज्यते ।

पाठ्यक्रमेण निर्धारितस्योद्देश्यस्यानुरूपं विद्यार्थिनो ज्ञान-शिल्पाभिवृत्तीः प्राप्नुवन्नवेति विषयस्यान्वेषकं महत्त्वपूर्णं संयन्त्रं मूल्याङ्कनं भवति । विद्यार्थिनां मूल्याङ्कनं शिक्षणोपलब्धीर्ध्यात्वा सक्षमतां शिक्षणोपलब्धीनाञ्चानुरूपं शिक्षणस्य सर्वान् स्तरान् समाविश्य विधातव्यम् । आन्तरिकबाह्यमूल्याङ्कनयोर्माध्यमेन एतस्य विषयस्य मूल्याङ्कनं विधीयते । मूल्याङ्कनस्य समग्रभारतः पञ्चविंशतिप्रतिशतमान्तरिकं पञ्चसप्ततिप्रतिशतं बाह्यञ्च मूल्याङ्कनं विधीयेते । एवमेव बाह्यमूल्याङ्कनस्यान्तर्गतं लिखितपरीक्षा सञ्चाल्यते । विद्यार्थीमूल्याङ्कनस्यान्तर्गतं निर्माणात्मकं निर्णयात्मकञ्च मूल्याङ्कनं पद्धतिद्वयेनैव क्रियते । अस्य विषयस्य पाठ्यक्रमे समाविष्टानां स्तरगतसक्षमतानाम्, कक्षागतशिक्षणेपलब्धीनाम्, तासां विषयवस्तूनाम्, तैस्सह सम्बद्धस्य शिल्पस्य, शिक्षण सहभागितायाः शिक्षणसक्रियतायाश्चाधारेषु विद्यार्थिनां शिक्षणस्य मूल्याङ्कनं विधातव्यम् ।

अस्य स्तरस्य विद्यार्थिनां मूल्याङ्कनमक्षराङ्कनपद्धत्या विधीयते । मूल्याङ्कने निर्माणात्मिका निर्णयात्मिका च प्रक्रिया अवलम्ब्यते । छात्राणां स्तरगतसामर्थ्योपलब्धये विधातव्यैरध्ययनभ्रमण-घटनावलोकन-सर्जनकार्य-वैयक्तिकसामूहिकविमर्शन-लिखितपरीक्षा-प्रत्युत्पन्नमतिप्रदर्शन-प्रश्नोत्तरण-कक्षाकार्यपरीक्षण-भाषिकव्यवहारप्रभृति-कार्यै-र्निर्माणात्मकं मूल्याङ्कनं विधीयते, येन अविच्छिन्नं मूल्याङ्नं सम्पद्यते । स्तरगतसामर्थ्योपलब्धये कक्षागतसामर्थ्योपलब्धये च शैक्षिकसत्रस्यान्तेऽन्तिमपरीक्षाया माध्यमेन निर्णयात्मकमूल्याङ्कनं सम्पाद्यते । विद्यार्थिषु पाठ्यवस्तुबोधादर्शचरित्रनिर्माण-मानवीयमूल्यमान्यतावलम्बन-पर्यावरणसंरक्षण-भाषिकशिल्पार्जनप्रभृतिविषयाणां विकासो मूल्याङ्कनस्य मूलाधारो मन्यते ।

मूल्याङ्कनप्रक्रियां विश्वसनीयां विधिसम्मताञ्च सम्पाद्य एकरूपतायामानेतुं स्थानीय-प्रादेशिक-राष्ट्रियस्तरेषु बाह्यसार्वजनिकपरीक्षणविधौ सर्वेषु विषयेषु आन्तरं बाह्यं च मूल्याङ्कनं विधीयते । सार्वजनिकपरीक्षणे प्रतिविषयं प्रतिशतं पञ्चविंशत्याः अङ्कानां कृते आन्तरं परीक्षणं, प्रतिशतं पञ्चसप्तत्याः अङ्कानां कृते बाह्यं परीक्षणञ्च विधीयते । आन्तरं मूल्याङ्कनं सम्बद्धविद्यालयस्य शिक्षकेण विधातव्यम् । शिक्षणप्रक्रियया सहैव विषयवस्तुसम्बद्धं मूल्याङ्कनं नैरन्तर्येण विधेयम् । तत्र शिक्षणोपलब्धिः क्रमशः औपचारिकरूपेण अनौपचारिकरूपेण च परिमापनीया । शिक्षणसहजीकरणस्य क्रमे विद्यार्थिभिरधिगतानां ज्ञानशिल्पप्रयोगोच्चदक्षतासम्बद्धपक्षाणां मूल्याङ्कनञ्च अनिवार्यतया विधेयम् ।

**(क) आन्तरं मूल्याङ्कनम्**

शिक्षणसहजीकरणप्रक्रियया कक्षागतशिक्षणेन सहैव छात्राणामान्तरं निर्माणात्मकं वा मूल्याङ्कनमपि कर्तव्यम् । संस्कृतरचनाविषयस्य शिक्षणक्रमे छात्राणां निर्माणात्मकमूल्याङ्कनाय अधोऽङ्किता विधयोऽवलम्बयितुं शक्यन्ते-

- लिखितप्रश्नोत्तरमाध्यमेन
- मौखिकप्रश्नोत्तरमाध्यमेन
- छात्राणां परस्परविचारविमर्शमाध्यमेन

अधोलिखिताधारेणान्तरमूल्याङ्कनं कर्तव्यम् :

| **क्र.सं.** | **क्षेत्रम्** | **अङ्कभारः** |
|---|---|---|
| १. | शिक्षणसहभागिता | ३ |
| २. | कक्षाकार्यं परियोजनाकार्यं वा | ६ |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | १० |
| ४. | त्रैमासिकपरीक्षा | ६ |
| योगः | | २५ |

**(ख) बाह्यमूल्याङ्कनम्**

निर्णयात्मके बाह्ये वा मूल्याङ्कने पाठ्यक्रमे निर्धारितोद्देश्यानुरूपं छात्रैः ज्ञानम्, शिल्पमधिगतं नवेति सम्परीक्ष्य तदनुसारेण छात्राणामुत्तीर्णत्वमनुत्तीर्णत्वं वा निर्णीयते । एतादृशं मूल्याङ्कनमावधिकं भवति । शैक्षिकसत्रस्यान्त एतद् मूल्याङ्कनं विधीयते ।

अधोलिखिताधारेण बाह्यमूल्याङ्कनं कर्तव्यम् :

**कक्षा ११**

| **क्र.सं** | **विषयक्षेत्रगतस्वरूपम्** | **विषयक्षेत्रम् (पठनं लेखनञ्च)** | **अङ्कभारः** |
|---|---|---|---|
| १. | पठनबोधः (दृष्टांशः, अदृष्टांशश्च) | गद्यम् (ऐतिहासिकं नीतिकथाश्रितम्) | ५+५ |
| | वर्णपरिचयः, सन्देशप्रकाशनम् | गद्यम् (ऐतिहासिकं नीतिकथाश्रितम्) | ३+५ |
| | तव्य-तव्यत्-अनीयर्-यत्-क्यप्-ण्यत्-वनिप्-तृच्-क्विप्-प्रत्ययैर्निष्पन्नानां कृदन्तशब्दानाम् इतच्-आरकन्-घ-ख-आलच्- तद्धितप्रत्ययनिष्पन्नानां शब्दानाञ्च वाक्येषु प्रयोगः । | गद्यम् (ऐतिहासिकं नीतिकथाश्रितम्) | ३ |
| | केवलाव्ययीभावसमासयोः सोदाहरणलक्षणनिरूपणम्<br>समस्तपदानां विग्रहप्रदर्शनं विग्रह-वाक्यानां समसनञ्च | गद्यम् (ऐतिहासिकं वा नीतिकथाश्रितम्) | ३ |
| २. | बोधात्मकं प्रश्नोत्तरम् | पद्यम् (पौराणिकं वा नीतिपद्यम्) | ५ |

| | | | |
|---|---|---|---|
| | वर्णानां वर्गीकरणं लेखनञ्च । <br> वाक्यान्तरणम् (लिङ्ग-पुरुष-विध्यर्थनिषेधार्थानामाधारेण) | पद्यम् (पौराणिकं वा नीतिपद्यम्) | ३ |
| | अप्-अच्-ल्युट्-क्तिन्-घञ्-युच्-अङ्-प्रत्ययैर्निष्पन्नानां कृदन्तशब्दानां प्रयोगः । <br> कृदन्त-तद्धितान्तशब्दानां प्रयोगेण भाषाविषयकानुच्छेदरचना | पद्यम् (पौराणिकं वा नीतिपद्यम्) | १+३+३ |
| | सोदाहरणं तत्पुरुषसमासभेदप्रदर्शनम् | पद्यम् (पौराणिकं वा नीतिपद्यम्) | ३ |
| ३. | बोधात्मकं प्रश्नोत्तरम् | रूपकम् (कविकल्पनाश्रितम्) | ३ |
| | वाक्यान्तरणम् <br> (काल-वाच्य-वचनानामाधारेण) । | रूपकम् (कविकल्पनाश्रितम्) | २ |
| | अनुवादः (नेपालीतः संस्कृते, संस्कृताद् नेपाल्याम्) । | रूपकम् (कविकल्पनाश्रितम्) | ५ |
| | क्त-क्तवतु-विच्-मनिन्, क्वनिप्-प्रत्ययैर्निष्पन्नानां कृदन्तशब्दानां प्रयोगः <br> इन्-ठन्-वति-युस्-आलच्-आटच्-प्रत्ययैर्निष्पन्नानां तद्धितान्तशब्दानां प्रयोगः । | रूपकम् (कविकल्पनाश्रितम्) | २ |
| ४. | पत्रं निवेदनञ्च (नैजं कार्यालयीयं च) <br> सूचना-आमन्त्रण-वर्धापन-विज्ञापन-शुभकामनाः | व्यावहारिकलेखनम् (पत्र-निवेदन-सूचना-आमन्त्रण-वर्धापन-विज्ञापन-शुभकामनाः) | १३ |
| | मतुप्-लच्-इलच्-श-न-उरच्-ण-र-व-वलच्-अण्-वुन्-अञ्-इञ्-प्रत्ययैर्निष्पन्नानां तद्धितान्तशब्दानां प्रयोगः । <br> क्मरच्-षाकन्-ल्यु-णिनि-प्रत्ययैर्निष्पन्नानां कृदन्तशब्दानां वाक्येषु प्रयोगः । | व्यावहारिकलेखनम् (पत्र-निवेदन-सूचना-आमन्त्रण-वर्धापन-विज्ञापन-शुभकामनाः) | ४ |
| | समासस्वरूपम् । <br> वाक्येषु सन्धिविमर्शनम् । | व्यावहारिकलेखनम् (पत्र-निवेदन-सूचना-आमन्त्रण-वर्धापन-विज्ञापन-शुभकामनाः) | १+३ |
| योगः | | | ७५ |

**कक्षा १२**

| क्र.सं | विषयक्षेत्रगतस्वरूपम् | विषयक्षेत्रम् (पठनं लेखनञ्च) | अङ्कभारः |
|---|---|---|---|
| १. | पठनबोधः (दृष्टांशः, अदृष्टांशश्च) | गद्यम् (उपदेशात्मकं योगाभ्यासविषयकम्) | ५+३ |
| | कोशप्रविष्टिमनुसृत्य शब्दानां क्रमनिर्धारणम् । | गद्यम् (उपदेशात्मकं | ३+२ |

| | | | |
|---|---|---|---|
| | वाक्यान्तरणम् (काल-वाच्य-वचनानामाधारेण)। | योगाभ्यासविषयकम्) | |
| | अण्-वुञ्-वत्-छ- प्रत्ययैर्निष्पन्नानां तद्धितान्त-शब्दानां वाक्येषु प्रयोगः।<br>अच्-उ-अण्-उकञ्- प्रत्ययैर्निष्पन्नानां कृदन्त-शब्दानां प्रयोगः।<br>क्त-क्तवतु-तव्यत्-अनीयर्-तृच्-प्रत्ययैर्निष्पन्नानां शब्दानां त्रिषु लिङ्गेषु रूपावलीलेखनम्। | गद्यम् (उपदेशात्मकं योगाभ्यासविषयकम्) | २ |
| | अव्ययीभाव-तत्पुरुष-कर्मधारय-बहुव्रीहि-द्वन्द्वसमासयुतानां शब्दानां प्रयोगेणानुच्छेदरचना | गद्यम् (उपदेशात्मकं योगाभ्यासविषयकम्) | ५ |
| २. | बोधात्मकं प्रश्नोत्तरम् | पद्यम् (प्रकृतिप्रधानम् वा विद्यामहिमप्रकाशम्) | ४ |
| | वाक्यान्तरणम् (लिङ्ग-पुरुष-विध्यर्थनिषेधार्थानामाधारेण) | पद्यम् (प्रकृतिप्रधानम् वा विद्यामहिमप्रकाशम्) | ३ |
| | फक्-ढक्-यञ्-ठञ्-ख- प्रत्ययैर्निष्पन्नानां तद्धितान्तशब्दानां प्रयोगः।<br>ण्वुल्, तृच्, आलुच्, कञ्प्रत्ययैर्निष्पन्नानां कृदन्तशब्दानां प्रयोगः।<br>दानीम्, दा, थाल्, द्युस्-प्रत्ययैर्निष्पन्नानां तद्धितान्तशब्दानां प्रयोगः। | पद्यम् (प्रकृतिप्रधानम् वा विद्यामहिमप्रकाशम्) | ८ |
| | कर्मधारयसमासस्य सभेदं स्वरूपनिर्देशनम्।<br>तत्पुरुषकर्म-धारययोरन्तरप्रकाशनम्। | पद्यम् (प्रकृतिप्रधानम् वा विद्यामहिमप्रकाशम्) | ५ |
| ३. | बोधात्मकं प्रश्नोत्तरम् | रूपकम् (पौराणिकम्) | ४ |
| | शतृ-शानच्-घञ्-प्रत्ययनिर्मित-शब्दानां त्रिषु एव लिङ्गेषु रूपावलीलेखनम्<br>जातीयर्-मात्रच्-देशीयर्- ठक्-तसिल्-त्रल्-तद्धितप्रत्ययैर्निष्पन्नानां शब्दानां प्रयोगः | रूपकम् (पौराणिकम्) | ६ |
| | बहुव्रीहिसमासस्य सभेदं लक्षणोदाहरणनिरूपणम्। | रूपकम् (पौराणिकम्) | ५ |
| ४. | सहमतिपत्रा-नुबन्धसेवा-भिनन्दनसम्मानपत्रवैयक्तिक-विवरणलेखनम्<br>निर्णयपुस्तिका- प्राशासनिक-टिप्पणी-लेखनम्। | व्यावहारिकलेखनम् | ५ |
| | क्त्वा-ल्यप्-तुमुन्-णमुल्-प्रत्ययैर्निष्पन्नानां कृदन्तशब्दानां प्रयोगः।<br>आहि-अतसुच्-त्व-तल्- इमनिच्-ष्यञ्-ण्य-यत्-इतच्-ईष्ठन्, ईयसुन्-तरप्-तमप्-प्रत्ययैर्निष्पन्नानां | व्यावहारिकलेखनम् | ५ |

| | | | |
|---|---|---|---|
| | तद्धितान्तशब्दानां प्रयोगः ।<br>निर्धारितप्रत्ययान्तानां पदानां प्रयोगेणानुच्छेदरचना | | |
| | द्विगुसमासस्य सभेदं लक्षणोदाहरणनिरूपणम् ।<br>सभेदं द्वन्द्वसमासस्य लक्षणोदाहरणनिरूपणम् । | व्यावहारिकलेखनम् | ५ |
| | अनुवादः (नेपालीभाषातः संस्कृते, संस्कृताद् नेपालीभाषायाम्) | व्यावहारिकलेखनम् | ५ |
| योगः | | | ७५ |

# संस्कृतभाषाव्याकरणम्

**कक्षा** : ११ र १२ **विषय सङ्केत** : [SLG. 017] (**कक्षा** ११), [SLG. 018] (**कक्षा** १२)

**पाठ्यघण्टा** : ५ **वार्षिक कार्यघण्टा** : १६०

## १. परिचयः

संस्कृतभाषाव्याकरणविषयस्य पाठ्यक्रमः लौकिकसंस्कृतभाषासम्बद्धानां विषयाणां पाणिनीयव्याकरणाधारितविषयक्षेत्राणाञ्च सैद्धान्तिकानां व्यावहारिकाणां च पक्षाणां पठनपाठनयोरुद्देश्येन विकसितो वर्तते । एतदर्थं २०७६ विक्रमवर्षीयस्य राष्ट्रियपाठ्यक्रमप्रारूपस्य मार्गदर्शनानुसारेण विद्यालयशिक्षाया माध्यमिकरस्तरे (एकादश्यां द्वादश्याञ्च कक्षयोः) संस्कृतभाषाव्याकरणविषयस्य एतस्मिन् पाठ्यक्रमे विधागतविविधताया अवलम्बनम्, प्रेरकव्यावहारिकविषयवस्तूनां चयनम्, विद्यार्थिनां क्रियाशीलताया अपेक्षिणोऽभ्यासस्य समावेशनम्, भाषिकशिल्पक्षमतायाः परीक्षणानुरूपं मूल्याङ्कनम्, तिङ्कृत्तद्धितप्रत्ययनिष्पन्नानां शब्दानां व्युत्पादनम्, समासप्रक्रियायाः परिज्ञानम्, कारकीयनियमानाञ्च विवेचनञ्च कृत्वा अधीतविषयाणां बोधो बुद्धविषयाणामभिव्यक्तिसामर्थ्यञ्च छात्रेषु स्यादिति हेतोर्बोधाभिव्यक्त्योरुल्लेखोऽपि विहितो विद्यते । एतस्माद् वर्तमानसन्दर्भे संस्कृतमितोऽपि व्यावहारिकं निर्माय विद्यार्थिनां रुच्यकाङ्क्षे प्रपूर्य शिक्षाया राष्ट्रियोद्देश्यं प्राप्स्यते, एतस्य सान्दर्भिकतां विस्तार्य विधाय उपयुक्तता सुनिश्चिता च विधास्यते इत्यपेक्षितमस्ति । अनेन पाठ्यक्रमेण सम्बद्धविषये उच्चशिक्षाया आधारोऽपि निर्मास्यते इति चापेक्षितं वर्तते ।

संस्कृतमाविश्वं व्यापृतं वाङ्मयं वर्तते । एतस्मिन् वाङ्मये मानवोपयोगिनो बहुशो विषयाः सन्निहिताः सन्ति । मानवानां बौद्धिक-चारित्रिक-सामाजिकविकासाय संस्कृतं बहूपयोगि वर्तते । संस्कृतेनाखिलं विश्वं लाभान्वितं भवितुं शक्नोति । संस्कृतस्य पठनेन विद्यार्थिनां बहुवायामिकव्यक्तित्वस्य विकासः सम्भवति । सत्यमेतद् विचिन्त्य पाश्चात्त्यदेशेष्वपि विद्यालयस्तरादारभ्य विश्वविद्यालयस्तरीयशिक्षायां संस्कृतं समावेशयितुं प्रयासः सञ्चाल्यमानो वर्तते । नेपाले प्राचीनकाले शिक्षानाम्ना संस्कृतमेव बुद्ध्यते स्म । अनौपचारिकरूपेण संस्कृतस्य पठनपाठनपरम्परा प्रचलिता आसीत् । औपचारिकरूपेणापि चिराय संस्कृतस्याध्ययनाध्यापनपद्धतिरचलत् । अधुनापि विद्यालयेषु संस्कृतस्य पठनपाठनकार्यं प्रचलितं वर्तते । संस्कृतस्य मानवोपयोगिनो विषयान् शिक्षयित्वा विद्यार्थिनो लाभान्वितान् विधातुं प्रयासाः सञ्चलन्तः सन्ति । तेषु पाठ्यक्रमोऽयमन्यतमप्रयासरूपेण वर्तते । संस्कृतस्य गद्य-पद्य-चम्पूविधानां वैविध्यास्वादनेन मानवीयमूल्यानां प्रवर्धनपुरस्सरं विद्यार्थिनो भाषिकशिल्पेषु निपुणान् विधातुं पाठ्यक्रमोऽसौ निर्मितोऽस्ति । अत्र संस्कृतभाषिकक्षमताभिवृद्ध्यर्थं भाषिकशुद्धतासम्पादनाय च संस्कृतव्याकरणस्य तिङन्त-कृदन्त-समास-तद्धितान्त-शब्दव्युत्पादनसम्बद्धा अंशा अपि समाविष्टाः सन्ति ।

परिचयम्, स्तरगतसक्षमताम्, कक्षागतशिक्षणोपलब्धिम्, विषयवस्तुनः क्षेत्रक्रमौ, शिक्षणसहजीकरणप्रक्रियाम्, विद्यार्थिमूल्याङ्कनञ्च समाविश्य पाठ्यक्रमोऽसौ विकासं नीतः । एतस्मिन् क्रमे पाठ्यक्रमलेखनस्य विकासस्य च विषयगतौचित्यम्, पाठ्यक्रमे विद्यमाना मुख्यविशेषताः, पाठ्यक्रमस्य स्वरूपञ्च संयोज्य परिचयं, विषयगतरूपेणापेक्षितं ज्ञानम्, शिल्पम्, अभिवृत्तिम्, मूल्यञ्च, कार्यतत्परतां संयोज्य एतस्याः क्रियात्मकस्वरूपे सक्षमताम्, शिक्षणस्य स्तरम्, सक्षमताया विशिष्टीकृतविस्तृतीकरणेन शिक्षणोपलब्धिम्, सक्षमताम्, पूर्वकक्षाभिस्सह लम्बीयसन्तुलनस्याधारे विषयवस्तुनो क्षेत्रक्रमौ च, विषयगतविशिष्टतामौलिकते संयोज्य शिक्षणसहजीकरणस्य विधिम्, प्रक्रियाञ्च, निर्माणात्मकनिर्णयात्मकमूल्याङ्कनयोर्विधिं प्रक्रियाञ्चोल्लिख्य विद्यार्थिमूल्याङ्कनं व्यवस्थितं वर्तते ।

२. **स्तरगतयोग्यताः**

**माध्यमिकस्तरे ११-१२ कक्षयोः संस्कृतभाषाव्याकरणविषयमधीत्य विद्यार्थिनो निर्दिष्टविषयेषु क्षमा भविष्यन्ति –**

**भाषाखण्डः**

१. पाठ्यवस्तुनो माध्यमेन भाषिकव्यावहारिकपरिष्करणम्

२. विविधविषयेषु मौलिकचिन्तनानुशीलनयोर्विकासनम्

३. राष्ट्रिय-सामाजिक-पारिवारिकदायित्वपूर्तये उत्साहाभिवर्धनम्

४. भाषिक-जातीय-सांस्कृतिक-भौगोलिकवैविध्यस्य संरक्षणपूर्वकं सम्मानप्रकटनम्

५. स्वास्थ्यसंरक्षणे सावधानतावलम्बनम्

६. उच्चस्तरीयाध्ययनाय तत्परताप्रदर्शनं योग्यतोपार्जनम्,

**व्याकरणखण्डः**

१. संस्कृतभाषायास्तिङन्तक्रियापदानां रूपसिद्धिप्रक्रियाया अभिव्यक्तिः

२. तिङन्तपदानां शुद्धतया रूपावलिकथनलेखने

३. कारकीयव्यवस्थामनुश्रित्य वाक्यानुच्छेदनिबन्धादिरचना

४. शब्दव्युत्पादनस्य कृत्तद्धितप्रक्रियागतविधीन् आश्रित्य सार्थकानेकशब्दनिर्मितिः

५. समस्तपदानां सविग्रहरूपसिद्धिप्रक्रियाकथनलेखने

६. शब्दव्युत्पादनस्य समासकृत्तद्धितप्रक्रियागतविधीन् आश्रित्य सार्थकानेकशब्दनिर्मितिः

७. समस्तशब्दकृदन्ततद्धितान्तशब्दानामर्थानुरूपप्रयोगेण वाक्यनिबन्धादिरचना च

**न्यायखण्डः**

१. कारिकावल्या मुक्तावल्याश्च निर्धारितानां श्लोकानां व्याकरणदृष्ट्या विग्रहव्युत्पत्तिप्रदर्शनेन सह व्याख्यानम्

२. न्यायवैशेषिकदृष्ट्या अतिरिक्तपदार्थत्ववादिनां मतं निरस्य सप्तपदार्थवादप्रतिष्ठापनम्

३. कार्यकारणभावनिदर्शनेन सह द्रव्यत्वजातिसिद्धिप्रक्रियामवलम्ब्य द्रव्यत्वजातिसाधनम्

४. गुणकर्मसामान्यविशेषसमवायानां लक्षणनिरूपणेन सह तद्घटकानां पदानां सार्थक्यप्रदर्शनम्

५. लौकिकालौकिकसन्निकर्षाणां परिचयेन सह सोदाहरणं लौकिकालौकिकसन्निकर्षयोः पार्थक्यप्रदर्शनम्

३. **कक्षागतशिक्षणोपलब्धिः**

**कक्षा ११**

**माध्यमिकस्तरीयायां ११ कक्षायां संस्कृतभाषाव्याकरणविषयमधीत्य छात्रा अधो निर्दिष्टविषयेषु क्षमा भविष्यन्ति –**

**श्रवणभाषणशिल्पम्**

**भाषाखण्डः**

१. पाठस्य सारांशं श्रुत्वा शुद्धं सम्भाषणम्

२. पाठेतरसामग्रीं श्रुत्वा तार्किकाभिव्यक्तिप्रकटनम्

३. परिचितेषु अपरिचितेषु च विषयेषु विमर्शनम्

४. श्रुत-दृष्टानुभूतघटनानां यथाक्रमं वर्णनम्

**व्याकरणखण्डः**

१. लकाराणां परिचयप्रदानम्

२. तिङन्ते निर्धारितानां सूत्रवार्तिकादीनां शुद्धरूपश्रवणमर्थप्रकाशनञ्च

३. कारकनियमानां श्रवणं प्रकटीकरणञ्च

**न्यायखण्डः**

१. कारिकावल्या मुक्तावल्याश्च मङ्गलाचरणश्लोकानां स्पष्टतः श्रवणं श्रावणञ्च

२. द्रव्यगुणकर्मसामान्यविशेषसमवायाभावादीनां लक्षणोपस्थापने सावधानतया तद्विषयकश्रवणं श्रावणञ्च

३. पदार्थादिभेदबोधिकानां कारिकाणां स्पष्टतः श्रवणं श्रावणञ्च

४. द्रव्यादिपदार्थानां साधर्म्यवैधर्म्यस्वरूपश्रवणं श्रावणञ्च

५. द्रव्यत्वादिजातिसाधकानुमानप्रतिपादकानां लक्षणानां स्पष्टतः श्रवणं श्रावणञ्च

६. द्रव्यादीनां पदार्थानां साधर्म्यवैधर्म्ययोरर्थप्रत्यायकत्वेन स्पष्टतः श्रवणं श्रावणञ्च

७. पृथिव्या लक्षणादिवाक्यानां स्पष्टतया श्रवणं श्रावणञ्च

**पठनशिल्पम्**

**भाषाखण्डः**

१. पाठ्यवस्तुनः सहायतया पठनगतेरभिवर्धनम्

२. पाठस्य प्रेरकं विशिष्टञ्चांशं सङ्केत्य पठनम्

३. लिखितवाङ्मयस्य गति-यति-लयसौष्ठवं परिपाल्य पठनम्

४. पठितांशविषये उत्तरप्रदानार्हतया पठनम्

**व्याकरणखण्डः**

१. निर्धारितानां सूत्रवार्तिकादीनां शुद्धोच्चारणम्

२. निर्धारितानां धातूनां रूपावलिकथनम्

३. कारकनियमानुसारेण शुद्धोच्चारणञ्च

**न्यायखण्डः**

१. ईश्वरसिद्धिद्रव्यत्वादिजातिसाधकानुमानोपस्थापनप्रसङ्गे उपस्थापितवाक्यानां सबोधमुच्चारणम् तत्तल्लक्षणवाक्यानामुच्चारणम्

२. लक्षणघटकपदानां सार्थक्यप्रदर्शनावसरे चाभिव्यक्तिः

३. द्रव्यत्वजातिसाधकानुमानेषु पक्षसाध्यहेतुदृष्टान्तबोधकानि पदानि पृथक्कृत्य तेषां स्फुटीकरणम्,

४. पूर्वपक्षिणां मतखण्डनपूर्वकं स्वमतस्थापनम्

५. द्रव्यादिपदार्थानां सामान्यपरिचयाभिव्यक्तिः

६. द्रव्यादीनां साधर्म्यवैधर्म्योच्चारणम्

७. पृथिव्या लक्षणभेदाद्युच्चारणम्

**लेखनशिल्पम्**

**भाषाखण्डः**

१. लेख्यचिह्नानुच्छेदयोजनविधिना लेखनम्

२. पाठस्य मर्मसन्देशयोर्लेखनम्

३. पाठ्यवस्तु आधृत्य प्रश्ननिर्माणमुत्तरलेखनञ्च

४. संस्कृतनेपालीभाषयोर्लिखितांशस्य परस्परं भाषान्तरणम्

**व्याकरणखण्डः**

१. निर्धारितानां सूत्रवार्तिककारिकादीनां शुद्धं लेखनम्

२. निर्धारितानां सूत्रवार्तिककारिकादीनामर्थलेखनम्

२. प्रकरणगतानां रूपाणां क्रमबद्धतया रूपसिद्धिप्रक्रियालेखनम्

३. कारकनियमानुसारेण शुद्धवाक्यलेखनञ्च

**न्यायखण्डः**

१. कारिकावल्या मुक्तावल्याश्च मङ्गलबोधकानां श्लोकानां सव्युत्पत्तिकलेखनम्

२. मङ्गलस्य साफल्यादिसाधकानुमानवाक्ये पक्षसाध्यहेतुदृष्टान्तबोधकानि पदानि पृथक् पृथङ् निर्दिश्य शुद्धतया तल्लेखनम्

३. शक्तिसादृश्याद्यतिरिक्तपदार्थवादिनां मतं प्रतिपाद्य तन्निराकरणेन सह तद्विषयलेखनम्

४. द्रव्यादिपदार्थानां सामान्यपरिचयविषयकलेखनम्

५. द्रव्यादिपदार्थानां साधर्म्यवैधर्म्याणां शुद्धतया स्पष्टतया च लेखनम्

६. कारणत्वविषयकलेखनम्

७. पृथिव्या लक्षणभेदादिलेखनम्

**कक्षा १२**

**माध्यमिकस्तरीयायां १२ कक्षायां संस्कृतभाषाव्याकरणविषयमधीत्य छात्रा अधो निर्दिष्टविषयेषु क्षमा भविष्यन्ति –**

**श्रवणभाषणशिल्पम्**

**भाषाखण्डः**

१. विविधमाध्यमैः श्रुतेषु विषयेषु प्रतिक्रियाप्रकटनम्

२. पाठेषु पाठेतरविषयेषु च विमर्शनम्

३. श्रुतानां विषयाणां यथाक्रममनुभाषणम्

४. अन्येषां विचारान् निशम्य स्वमतोपस्थापनम्

**व्याकरणखण्डः**

१. सूत्रवार्तिकादीनां शुद्धस्वरूपं श्रुत्वा तदनुसारेणोच्चारणम्

२. निर्दिष्टकृत्प्रत्ययानां शुद्धोच्चारणम्

३. समासस्य परिचयकथनम्

४. समासानां पार्थक्यनिर्देशनम्

५.	तद्धितान्तशब्दानां शुद्धस्वरूपं श्रुत्वा समुचितप्रकृतिप्रत्ययकथनञ्च

**न्यायखण्डः**

१.	जलतेजोवायुवाकाशकालदिगात्मप्रत्यक्षादिप्रमासन्निकर्षप्रतिपादिकानां कारिकाणमर्थबोधकत्वेन श्रवणं श्रावणञ्च

२.	पृथिवीजलतेजोवायुवाकाशकालदिगात्मादिलक्षणवाक्यानां श्रवणं श्रावणञ्च

३.	चार्वाकबौद्धादिमतनिरसनेन सह आत्मस्वरूपोपस्थापनावसरे तद्विषयकश्रवणं श्रावणञ्च

४.	ज्ञानसामान्यभेदपूर्वकप्रत्यक्षज्ञानस्य वैविध्यश्रवणं श्रावणञ्च

५.	सन्निकर्षबोधिकानां कारिकाणां स्पष्टतः श्रवणं श्रावणञ्च

**पठनशिल्पम्**

**भाषाखण्डः**

१.	पाठ्यवस्तुनो द्रुतपठनम्

२.	पाठानां विचारसन्देशोपयोगित्वप्रकाशकत्वेन पठनम्

३.	लिखितसामग्रीणां गति-यति-लयसौष्ठवं संरक्ष्य पठनम्

४.	लेख्यसमग्रीणां समीक्षात्मकदृष्ट्या पठनम्

**व्याकरणखण्डः**

१.	निर्दिष्टसूत्रवार्तिककारिकाणां ह्रस्वदीर्घमात्रानुरूपेण वर्णगतस्थानानुकूल्येन च पठनञ्च

**न्यायखण्डः**

१.	जलतेजोवायुवाकाशकालदिगात्मप्रमासन्निकर्षप्रतिपादिकानां कारिकाणां सम्यक्तया शुद्धतया चार्थबोधकत्वेन पठनम्, उक्तानां द्रव्याणां लक्षणपठनम्

२.	चार्वाकबौद्धादिमतनिरसनेन सह आत्मस्वरूपोपस्थापनविधौ तद्विषयकपाठपठनम्

३.	प्रत्यक्षप्रमितिलक्षणोच्चारणम्

४.	सन्निकर्षभेदोच्चारणम्

**लेखनशिल्पम्**

**भाषाखण्डः**

१.	पठितपाठस्य सङ्क्षेपेण स्वशैल्या लेखनम्

२.	पद्यात्मकपाठं गद्यरूपेण परिवर्त्य लेखनम्

३.	प्रत्यक्षीकृतानां घटनानां क्रमानुसारेण लेखनम्

४.	लेख्यचिह्नानुच्छेदसंरचनाविषयक्रमादीनां संयोजनपूर्वकं लेखनम्

**व्याकरणखण्डः**

१.	निर्दिष्टसूत्र–वार्तिक-कारिकाणां शुद्धरूपेण लेखनम्

२.	रूपसिद्धिप्रक्रियायाः क्रमानुरूपं लेखनम्

३.	कृदन्ततद्धितान्तशब्दव्युत्पादनप्रकारलेखनम्

४.	समासप्रक्रियानुसारेण शब्दसाधुत्वप्रकारलेखनम्

५.	कृदन्ततद्धितसमासप्रक्रियामनुसृत्य शुद्धवाक्यरचना

**न्यायखण्डः**

१.	जलतेजोवाय्वाकाशकालदिगात्मप्रमासन्निकर्षाणां शुद्धतया स्पष्टतया च लक्षणलेखनम्

२.	पृथिवीत्वादिजातिसाधनप्रक्रियामवलम्ब्य तद्विषयकलेखनम्

३.	चार्वाकबौद्धादिमतनिरसनेन सह आत्मस्वरूपविवेचनपूर्वकं लेखनम्

४.	भेदनिर्देशनपूर्वकं प्रत्यक्षादिलक्ष्यलक्षणनिरूपणम्

५.	लौकिकालौकिकसन्निकर्षयोः पार्थक्यप्रदर्शनेन सह स्फुटीकरणम्

## ४.	विषयक्षेत्रं क्रमश्च

**कक्षा ११**

**भाषाखण्डः**

| **क्र.सं.** | **विधा** | **उपविधा** | **क्षेत्रम्** | **बोधः** | **अभिव्यक्तिः** | **पाठ्य घण्टाः** |
|---|---|---|---|---|---|---|
| १. | गद्यम् | (क) कथा | गुरुशिष्यविषयकम् | - कथायाः पठनबोधः<br>- कथाया आदर्शपठनेन मर्मबोधः<br>- गुरुपूर्णिमाविषयका-नुच्छेदबोधः | - कथाया मर्मप्रकाशनम्<br>- गुरुपूर्णिमाविषयकानुच्छेदस्य विषये प्रश्नोत्तरणम् | १६ |
| | | (ख)दैनिकी | अध्ययनप्रेरणाप्रदायकम् | - दैनिक्याः पठनबोधः<br>- दैनिक्याः संरचनावबोधः<br>- शैक्षिकभ्रमणमहत्त्व-विषयकानुच्छेदबोधः | - दैनिक्याः स्वरूपविषये विमर्शनम्<br>- दैनिक्या लाभस्य कथनम्<br>- शैक्षिकभ्रमणायोजनाविषये विमर्शनम्<br>- दैनिकी-रचना | १६ |
| | | (ग) जीवनी | परोपकारविषयकम् | - जीवनीलेखनक्रमस्य बोधः<br>- जीवनीलेखने तथ्याङ्कस्य महत्त्वबोधः<br>- नारीसम्मानविषय-कानुच्छेदबोधः | - जीवनीलेखनक्रमाभिव्यक्तिः<br>- जीवनीलेखने तथ्याङ्कस्य महत्त्ववर्णनम्<br>- नारीसम्मानस्य आवश्यकताया व्याख्यानम्<br>- नारीसम्मानविषयकानुच्छेदमा-श्रित्य प्रश्नानां निर्माणमुत्तरलेखनञ्च | १६ |
| २. | पद्यम् | (क) | सुभाषितभरितम् | - सुभाषितस्य वस्तुबोधः<br>- सुभाषितमर्मबोधः<br>- सत्सङ्गतिसम्बद्धानु-च्छेदबोधः | - सुभाषितस्य प्रवाचनम्<br>- सुभाषितस्य वस्तुवर्णनम्<br>- पाठ्यवस्तुसदृशस्य सुभाषितस्य कथनम् | १६ |
| | | (ख) | राष्ट्रगौरवबोधकम् | - पद्यवस्तुबोधः<br>- राष्ट्रस्य गौरवावबोधः | - पद्यस्य वस्तुविमर्शनम्<br>- राष्ट्रगौरवानुभूतिप्रकटनम् | १६ |

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | - हिमालयसम्बद्धानुच्छेदस्य बोधः | - हिमालयसम्बद्धानुच्छेदस्य सूत्राणि निर्माय सङ्क्षेपीकरणम् | |
| योगः | | | | | | योगः |

**व्याकरणखण्डः**

| क्र.सं | प्रकरणानि | विषयक्षेत्रम् | बोधः | अभिव्यक्तिः | पाठ्य घण्टाः |
|---|---|---|---|---|---|
| १ | भ्वाद्य-दाद्योरध्ययनम् | भ्वादिप्रकरणे- दशलकाराणां परिचयः, लकाराणामर्थनिर्धारणम्, लकारार्थानां तिङाञ्च व्यवस्थापकानि सूत्राणि- वर्तमाने लट्, लः कर्मणि च ..., लस्य, तिप्तस्झि ..., लः परस्मैपदम्, तङानावात्मनेपदम्, अनुदात्तङित ..., स्वरितञितः ..., शेषात्कर्तरि ..., तिङस्त्रीणि ..., तान्येकवचन ..., युष्मद्युपपदे ..., प्रहासे च, अस्मद्युत्तमः, शेषे प्रथमः, परोक्षे लिट्, अनद्यतने लुट्, लृट् शेषे च, लोट् च, आशिषि लिङ्लोटौ, अनद्यतने लङ्, विधिनिमन्त्रणामन्त्रणाधीष्ट ..., लुङ्, लिङ्निमित्ते लृङ् ...,<br><br>लादेशानां तिङां परिचयः, परस्मैपदात्मनेपदानां लादेशानां विभागः, लादेशेषु वचनपुरुषनिर्धारणम्, सार्वधातुकार्धधातुकत्वादिव्यवस्था,<br><br>भू सत्तायाम्, संहितैकपदे नित्या ... (कारिका), अत सातत्यगमने, उपसर्गात्सुनोति ... गद व्यक्तायां वाचि, णद् अव्यक्ते शब्दे, टुनदि ... समृद्धौ, मन्थ विलोडने, व्रज गतौ, गुपू रक्षणे, अजन्तोऽकारवान्वा ... (कारिका), क्षि क्षये, तप सन्तापे, क्रमु पादविक्षेपे, स्खल सञ्चलने, पा पाने, गै शब्दे, घ्रा गन्धोपादाने, ष्ठा गतिनिवृत्तौ, स्मृ चिन्तायाम्, सृ गतौ, ध्यै चिन्तायाम्, दृशिर् प्रेक्षणे, गम्लृ गतौ, त्यज हानौ, रक्ष पालने, जि जये, जीव प्राणधारणे, एध वृद्धौ, कमु कान्तौ, क्षमूष् सहने, स्पदि किञ्चिच्चलने, मुद हर्षे, यती प्रयत्ने, शकि शङ्कायाम्, श्लाघृ कत्थने, कपि चलने, ऊह वितर्के, भिक्ष भिक्षायाम्, द्युत दीप्तौ, वृतु वर्तने, रमु क्रीडायाम्, श्रिञ् सेवायाम्, भृञ् भरणे, हृञ् हरणे, णीञ् प्रापणे, डुपचष् पाके, भज सेवायाम्, यज देवपूजासङ्गतिकरणदानेषु, वह प्रापणे, वेञ् तन्तुसन्ताने, राजृ दीप्तौ, टुयाचृ याच्ञायाम्, बुधिर् बोधने, खनु अवदारणे, धावु गतिशुद्ध्योः ।<br><br>अदादिषु– अद भक्षणे, हन हिंसागत्योः, या प्रापणे, भा दीप्तौ, विद ज्ञाने, अस भुविभावे, इण् गतौ, वच परिभाषणे, रुदिर् अश्रुविमोचने, ञिष्वप् शये, जागृ निद्राक्षये, दरिद्रा दुर्गतौ, चकासृ दीप्तौ, शासु अनुशिष्टौ, शीङ् स्वप्ने, इङ् अध्ययने, आस उपवेशने, दुह प्रपूरणे, ब्रूञ् व्यक्तायां वाचि<br><br>एतेषां धातूनां सूत्रसमन्वयपूर्वकं सर्वेषु लकारेषु | लकाराणां वर्तमान–भूत–भविष्यत्कालाद्यर्थबोधः,<br><br>लोट्लिङो विधिराशीराद्यर्थबोधः,<br><br>लकाराणां कर्तृ–कर्म-भाव- वाच्यार्थपरिज्ञानम्,<br><br>लकारादेशानां तिङां प्रथम–मध्यमोत्तमपुरुषबोधकत्वज्ञानम्,<br><br>तिङामेदकत्वद्वित्वबहुत्वसङ्ख्याप्रतिपादकत्वज्ञानम्, निर्धारितानां धातूनां कर्तृवाच्ये रूपसिद्धिप्रक्रियाबोधः, सूत्राणां शुद्धोच्चारणपूर्वकमर्थज्ञानम्, तिङन्तपदानां रूपसिद्धिप्रक्रियाज्ञानम्, साधितानां तिङन्तपदानां यथायथं वाक्यप्रयोगनिर्धारणम् । | लकाराणां वर्तमानादिकालार्थकथनम्, लकाराणां कर्तृत्वाद्यर्थकथनेन सह कर्तृ–कर्म–भाववाच्यत्वप्रकाशनम्, लादेशानां तिङां प्रथम–मध्यमोत्तमपुरुषार्थप्रतिपादनम्, तिङामेकत्व–द्वित्व–बहुत्वसङ्ख्याकथनम्, सूत्रसमन्वयपूर्वकं रूपसिद्धिप्रक्रियालेखनम्, सूत्रार्थव्याख्यानम्, रूपावलिकथनम्, साधितानां रूपाणां वाक्ये प्रयोगनिदर्शनञ्च । | ३१ |

| | | | | | |
|---|---|---|---|---|---|
| | | रूपसिद्धिप्रक्रियायाः शिक्षणं रूपावलिसञ्चालनेन सह वाक्यप्रयोगव्यापारनिदर्शनञ्च । | | | |
| २ | जुहोत्यादितः ण्यन्ताध्ययनम् | जुहोत्यादिषु हु दानाऽऽनयोः, ञिभी भये, ह्री लज्जायाम्, पृ पालनपूरणयोः, डुभृञ् धारणपोषयोः, डुदाञ् दाने ।<br>दिवादिषु दिवु क्रीडाविजिगीषादिषु, नृती गात्रविक्षेपे, त्रसी उद्वेगे, पुष पुष्टौ, णश अदर्शने, तृप प्रीणने, द्रुह जिघांसायाम्, मुह वैचित्ये, ष्णिह प्रीतौ, तुष तुष्टौ, क्रुध क्रोधे, शमु उपशमे, षूङ् प्राणिप्रसवे, जनी प्रादुर्भावे, विद सत्तायाम्, दीपी दीप्तौ ।<br>स्वादिषु षुञ् अभिषवे, चिञ् चयने, धूञ् कम्पने, वृञ् वरणे ।<br>तुदादिषु तुद व्यथने, मुच्लृ मोक्षणे, मिल सङ्गमने, लिप उपदेहे, कृती छेदने, लुभ विमोहने, तृप तृप्तौ, इष इच्छायाम्, स्फुट विकसने, टुमस्जो शुद्धौ, प्रच्छ ज्ञीप्सायाम्, मृङ् प्राणत्यागे,<br>रुधादिषु रुधिर् आवरणे, भिदिर् विदारणे, छिदिर् द्वैधीकरणे, युजिर् योगे, हिसि हिंसायाम्, भुज पालनाभ्यवहारयोः ।<br>तनादिषु तनु विस्तारे, डुकृञ् करणे, मनु अवबोधने ।<br>क्र्यादिषु डुक्रीञ् द्रव्यविनिमये, प्रीञ् तर्पणे कान्तौ च, पूञ् पवने, लुञ् छेदने, ग्रह उपादाने, ज्ञा अवबोधने, मुष स्तेये, बन्ध बन्धने, पुष पुष्टौ ।<br>चुरादिषु चुर स्तेये, चिति स्मृत्याम्, पीड अवगाहे, तड आघाते, पाल रक्षणे, पूज पूजायाम्, तुल उन्माने, कथ वाक्यप्रबन्धे, गण सङ्ख्याने ।<br>एतेषां धातूनां सूत्रसमन्वयपूर्वकं सर्वेषु लकारेषु रूपसिद्धिप्रक्रियाया शिक्षणं रूपावलिसञ्चालनेन सह वाक्यप्रयोगव्यापारनिदर्शनञ्च ।<br>ण्यन्ते स्वतन्त्रः कर्ता, तत्प्रयोजको हेतुश्च, हेतुमति च, ओः पुयण्ज्यपरे, हनस्तोऽचिण्णलोः, अर्तिह्रीब्लीरीक्नूयीक्ष्मा ..., तिष्ठतेरित्, जिघ्रतेर्वा, शाच्छासाह्वाव्यावेपां युक्, रुहः पोऽन्यतरस्याम्, दोषो णौ, णौ गमिरवबोधने, घटादयो मितः ( ग.सू.), मितां ह्रस्वः ।<br>एतेषां सूत्राणामर्थबोधपुरस्सरमुपरि निर्दिष्टानां भ्वादिधातूनां सूत्रसमन्वयपूर्वकं णिजन्तरूपसिद्धिप्रक्रियाशिक्षणं, रूपावलिसञ्चालनं साधितानां णिजन्तरूपाणां प्रेरकार्थेषु वाक्येषु प्रयोगव्यापारनिदर्शनञ्च । | निर्दिष्टप्रकरणगतविकरण बोधः, निर्धारितानां धातूनामर्थज्ञानम्, निर्धारितानां सूत्राणामर्थावबोधः, सूत्रसमन्वयपूर्वकं रूपसिद्धिप्रक्रियायाः परिज्ञानम्, सर्वेषु लकारेषु रूपावलिज्ञानम्, वाक्ये कर्तृपदेन सह क्रियापदस्य सामानाधिकरण्येन प्रयोगबोधः । | नवगणेषु प्रकरणगतानां विकरणानां पार्थक्यकथनम्, निर्धारितानां धातूनामर्थाभिव्यक्तिः, निर्दिष्टानां सूत्राणामर्थकथनम्, सूत्रसमन्वयपूर्वकं रूपसिद्धिप्रक्रियाप्रकाशनम्, रूपावलिकथनं लेखनञ्च, वाक्ये क्रियाकारकयोः सामानाधिकरण्येन प्रयोगनिदर्शनम् । | ३१ |
| ३. | कारकाध्ययनम् | कारकपरिचयः – कारकभेदनिदर्शनम्, कर्तृ–कर्म–करण–सम्प्रदानापादानाधिकरणकारकाणां परिचयः, प्रथमा–द्वितीया–तृतीया–चतुर्थी– | कारकपरिचयबोधः, कारकभेदज्ञानम्, कर्तृकारकादीनां | कारकपरिचयप्रदानम्, कारकाणां भेदनिर्धारणम्, | १८ |

| | | | | | |
|---|---|---|---|---|---|
| | | पञ्चमी–षष्ठी–सप्तमीविभक्तीनां परिचयः, विभक्त्यर्थनिदर्शनम्, कारकनियमानुसारेण वाक्यरचनाप्रकारः, वाक्यरचनायां शुद्धाशुद्धिपरीक्षणप्रकारः, तत्राध्ययनक्रमेऽधोनिर्दिष्टानां नियमानां परिज्ञानमावश्यकम्–<br><br>प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा, सम्बोधने च, कर्तुरीप्सिततमं कर्म, तथायुक्तं चानीप्सितम्, अकथितं च, दुह्याच्-पच्-दण्ड … (कारिका), कर्मणि द्वितीया, अकर्मकधातुभिर्योगे … (वार्तिकम्), अभिनिविशश्च, उपान्वध्याङ्वसः, अनुर्लक्षणे, हीने, तृतीयार्थे, उपोऽधिके च, अभिरभागे, अभितः परितः समया निकषा … (वार्तिकम्), अधिशीङ्स्थासां कर्म, उभसर्वतसोः कार्या … (कारिका), कालाध्वनोरत्यन्तसंयोगे, साधकतमं करणम्, स्वतन्त्रः कर्ता, कर्तृकरणयोस्तृतीया, इत्थम्भूतलक्षणे, येनाङ्गविकारः, हेतौ, पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम्, प्रकृत्यादिभ्य उपसङ्ख्यानम् (वा.), सह युक्तेऽप्रधाने, कालाध्वनोरत्यन्त संयोगे, कर्मणा यमभिप्रैति स सम्प्रदानम्, क्रियया यमभिप्रैति … (वा.), चतुर्थी सम्प्रदाने, तादर्थ्ये चतुर्थी वाच्या (वा.), उत्पातेन ज्ञापिते च (वा.) हितयोगे च, स्पृहेरीप्सितः, मन्यकर्मण्यनादरे विभाषाऽप्राणिषु, क्रुधद्रुहेर्ष्याऽसूयार्थानां यं प्रति कोपः, परिक्रयणे सम्प्रदानमन्यतरस्याम्, क्रियार्थोपपदस्य च, नमः-स्वस्ति-स्वाहा-स्वधा …, ध्रुवमपायेऽपादानम्, अपादाने पञ्चमी, भीत्रार्थानां भयहेतुः, जुगुप्साविराम … (वा.), वाराणार्थानामीप्सितः, आख्यातोपयोगे, पराजेरसोढः, भुवः प्रभवश्च, पञ्चमी विभक्तेः, पञ्चम्यपाङ्परिभिः, आङ् मर्यादावचने, अपपरी वर्जने, षष्ठी शेषे, षष्ठी हेतुप्रयोगे, सर्वनाम्नस्तृतीया च, कर्तृकर्मणोः कृति, कृत्यानां कर्तरि वा, दिवस्तदर्थस्य, आधारोऽधिकरणम्, सप्तम्यधिकरणे च, निमित्तात् कर्मयोगे (वा.), यतश्च निर्धारणम्, यस्य च भावेन भावलक्षणम्, साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः । | लक्षणबोधः, प्रथमाया विभक्तेः प्रातिपदिकार्थत्वावबोधः, कारकविभक्तिविधाने उक्तत्वानुक्तत्वयोर्व्यवस्थावबोधः, द्वितीयादीनां विभक्तीनां कारकार्थप्रतिपादकत्वज्ञानम्, कारकोपपदविभक्त्योः पार्थक्यावबोधः, कारके निर्धारितानां सूत्रवार्तिकादीनामर्थबोधः, साधितानां सुबन्तपदानां कारकीयार्थप्रतिपादकत्वपरिज्ञानम्, विविधानां कारकीयपदानां वाक्ये प्रयोगावबोधः । | कर्त्रादिकारकाणां लक्षणकथनम्, प्रथमाया विभक्तेः प्रातिपदिकार्थत्वनिर्वचनम्, उक्तत्वानुक्तत्वयो-र्व्याख्यानम्, कारकोपपदविभक्तिविवेचनम्, निर्धारितानां सूत्रवार्तिकादीनामर्थाविशदीकरणे, वाक्ये प्रयुक्तानां सुबन्तपदानां कारकत्वनिर्वचनम्, क्रियाकारकयोः सामानाधिकरण्येन वाक्येषु प्रयोगश्च । | |
| योगः | | | | | ८० |

**न्यायखण्डः**

| क्र.सं. | प्रकरणम् | शीर्षकम् | बोधः | अभिव्यक्तिः | पाठ्य घण्टाः |
|---|---|---|---|---|---|
| १. | पदार्थनिर्वचनम् | पारिभाषिक-पदानि<br>(कर्तृत्वम्, कारणत्वम्, कार्यत्वम्, व्यापारः,<br>अव्याप्तिः, अतिव्याप्तिः, असम्भवः, प्रतियोगित्वम्, अनुयोगित्वम्, पक्षः, साध्यम्, हेतुः, दृष्टान्तः, प्रतिबन्धकत्वम्, उत्तेजकत्वम्, अप्रयोजकत्वम्) | न्यायसम्बद्धनिर्दिष्ट-पारिभाषिकपदानां सोदाहरणमर्थबोधः | लक्षणपरिष्कारे न्यायसम्बद्धनिर्दिष्टपारिभाषिक-पदप्रयोगः | ८ |

| | | | | | |
|---|---|---|---|---|---|
| २. | मङ्गलश्लोक-मङ्गलवादेश्वर-वादौ | मङ्गलश्लोकाः ।<br>मङ्गलस्य साफल्यसाधकानुमानम् । मङ्गलवादे प्राचीननव्यमतोपस्थापनम् ।<br>ईश्वरसाधकानुमानोपस्थापनम् । ईश्वरसाधकानुमाने सत्प्रतिपक्षोद्भावनम्, तन्निराकरणञ्च | मङ्गलश्लोकार्थबोधः ।<br>मङ्गलस्य साफल्यसाधका-नुमानाङ्गबोधः ।<br>मङ्गलवादे प्राचीननव्यमतबोधः ।<br>ईश्वरसाधनानुमाने पूर्वपक्षबोधपूर्वकं तदङ्गबोधः । | मङ्गलश्लोकार्थनिरूपणम् ।<br>मङ्गलस्य साफल्यसाधकानुमान-निरूपणम् ।<br>मङ्गलवादे प्राचीननव्यमत-भेदविवेचनम् ।<br>ईश्वरसाधकानुमानोपस्थापनम् ।<br>तत्र सत्प्रतिपक्षोद्भावनपूर्वकं तन्निराकरणोपायनिरूपणम् । | १६ |
| ३.. | द्रव्यादिसामान्या-न्तपदार्थपरिचयः | पदार्थविभजनम् ।<br>शक्तिसादृश्यादीनामतिरिक्तपदार्थत्वमाशङ्क्य तन्निराकरणम् ।<br>द्रव्यविभजनम् ।<br>द्रव्यत्वजातिसाधनम् ।<br>तमसोऽतिरिक्तद्रव्यत्वमाशङ्क्य तत्खण्डनम् ।<br>गुणकर्मविभजनम् ।<br>सामान्यम् । जातिबाधकाः । | पदार्थविभागबोधः ।<br>शक्तिसादृश्यादीनामनतिरिक्त-पदार्थत्वबोधः ।<br>द्रव्यविभागबोधः । द्रव्यत्वजातिसिद्धिः ।<br>तमसोऽनतिरिक्त-द्रव्यत्वबोधः ।<br>गुणकर्मविभागबोधः ।<br>सामान्यपदार्थबोधः । जातिबाधकदोषबोधः । | पदार्थविभजनम् ।<br>शक्तिसादृश्यादीनामतिरिक्तपदार्थत्वमाशङ्क्य तन्निराकरणम् ।<br>द्रव्यविभजनम् ।<br>द्रव्यत्वजातिसाधनम् ।<br>तमसोऽतिरिक्तद्रव्यत्वमाशङ्क्य तत्खण्डनम् ।<br>गुणकर्मविभजनम् ।<br>सामान्यनिरूपणम् ।<br>जातिबाधकदोषनिरूपणम् । | १६ |
| ४. | विशेषसमवाया-भावपदार्थपरिचयः | विशेषसाधनम् ।<br>समवायसाधकानुमानोपस्थापनम्<br>भेदसहितोऽभावः । | विशेषपदार्थबोधः ।<br>समवायसाधकानुमानप्रक्रियाबोधः<br>भेदबोधपूर्वकाभावबोधः | विशेषनिरूपणम् ।<br>समवायसाधकानुमानोपस्थापनम्<br>भेदनिदर्शनपूर्वकाभावनिरूपणम् । | ८ |
| ५. | साधर्म्यवैधर्म्य-परिचयः | द्रव्यादिसप्तपदार्थानां साधर्म्यम्<br>द्रव्यादिपञ्चपदार्थानां साधर्म्यम् ।<br>द्रव्यादित्रिपदार्थसाधर्म्यम् ।<br>गुणादीनां षण्णां साधर्म्यम् ।<br>जात्यादीनां चतुर्णां साधर्म्यम् ।<br>पारिमाण्डल्यभिन्नसाधर्म्यनिरूपणम्<br>सभेदकारणम् ।<br>अन्यथासिद्धिः । | द्रव्यादिसप्तपदार्थानां साधर्म्यबोधः<br>द्रव्यादिपञ्चपदार्थानां साधर्म्यबोधः<br>द्रव्यादित्रिपदार्थसाधर्म्यबोधः ।<br>गुणादीनां षण्णां साधर्म्यबोधः ।<br>जात्यादीनां चतुर्णां | द्रव्यादिसप्तपदार्थानां साधर्म्यकथनम्<br>द्रव्यादिपञ्चपदार्थानां साधर्म्यनिरूपणम् ।<br>द्रव्यादित्रिपदार्थसाधर्म्यनिर्वचनम्<br>गुणादीनां षण्णां साधर्म्यविवेचनम् ।<br>जात्यादीनां चतुर्णां | २० |

| | | | | | |
|---|---|---|---|---|---|
| | | नित्यद्रव्यान्यसाधर्म्यम् ।<br>द्रव्यसाधर्म्यम् ।<br>पृथिव्यादीनां चतुर्णां साधर्म्यम् ।<br>आकाशादीनां चतुर्णां साधर्म्यम् । आकाशशरीरिणां साधर्म्यम् । उक्तानां पदार्थानां विपरीतक्रमेण वैधर्म्यम् ।<br>पृथिव्यादिषु आश्रितगुणाः । | साधर्म्यबोधः<br>पारिमाण्डल्यभिन्नसाधर्म्य बोधः<br>सभेदकारणबोधः ।<br>अन्यथासिद्धिबोधः ।<br>नित्यद्रव्यान्यबोधः ।<br>द्रव्यसाधर्म्यबोधः ।<br>पृथिव्यादीनां चतुर्णां साधर्म्यबोधः ।<br>आकाशादीनां चतुर्णां साधर्म्यबोधः । आकाशशरीरिणां साधर्म्यबोधः<br>उक्तानां पदार्थानां विपरीतक्रमेण वैधर्म्यबोधः ।<br>पृथिव्यादिषु आश्रितगुणबोधः | साधर्म्यनिरूपणम् ।<br>पारिमाण्डल्यभिन्नसाधर्म्यनिरुक्तिः<br>सभेदकारणनिर्वचनम् ।<br>अन्यथासिद्धिव्याख्यानम् ।<br>नित्यद्रव्यान्यसाधर्म्यप्रदर्शनम् ।<br>द्रव्यसाधर्म्यनिरूपणम् ।<br>पृथिव्यादीनां चतुर्णां साधर्म्यनिरूपणम् ।<br>आकाशादीनां चतुर्णां साधर्म्यनिरूपणम् । आकाशशरीरिणां साधर्म्यव्याख्यानम् ।<br>उक्तानां पदार्थानां विपरीतक्रमेण वैधर्म्यकथनम् ।<br>पृथिव्यादिषु आश्रितगुणानां गणना । | |
| ६. | पृथिवीद्रव्य-परिचयः | पृथिवीलक्षणम् ।<br>पाषाणे गन्धवत्त्वम् ।<br>पृथिव्याः स्पर्शः ।<br>पृथिव्या नित्यत्वानित्यत्वे ।<br>पृथिव्या विषयाः ।<br>अवयविसाधनम् ।<br>पार्थिवपरमाणुः ।<br>पार्थिवशरीरम् ।<br>पार्थिवेन्द्रियम् । | पृथिवीद्रव्यबोधः ।<br>पाषाणे गन्धवत्त्वबोधः ।<br>पृथिव्याः स्पर्शबोधः ।<br>पृथिव्या नित्यत्वानित्यत्वबोधः ।<br>अवयविबोधः ।<br>पार्थिवपरमाणुबोधः ।<br>पार्थिवशरीरबोधः ।<br>पार्थिवेन्द्रियबोधः । | पृथिवीलक्षणनिरूपणम् ।<br>पाषाणे गन्धवत्त्वनिरूपणम् ।<br>पृथिव्याः स्पर्शकथनम् ।<br>पृथिव्या नित्यत्वानित्यत्वनिरूपणम् ।<br>पार्थिवावयविसिद्धिः ।<br>पार्थिवपरमाणुव्याख्यानम् ।<br>पार्थिवशरीरव्याख्यानम् ।<br>पार्थिवेन्द्रियनिरूपणम् । | १२ |
| आहत्य / योगः | | | | | ८० |

**कक्षा १२**

**भाषाखण्डः**

| क्र.सं. | विधा | उपविधा | क्षेत्रम् | बोधः | अभिव्यक्तिः | पाठ्य घण्टाः |
|---|---|---|---|---|---|---|
| १. | गद्यम् | (क) कथा | चरित्रनिर्माणविषयकम् | -कथाचरित्रवैशिष्ट्यबोधः<br>-कथायाः प्रेरकपक्षस्य बोधः<br>-शिष्टाचारविषयकानुच्छेदस्य बोधः | -कथाचरित्रप्रकाशनम्<br>-कथायाः प्रेरकपक्षस्य विषये विमर्शनम्<br>-शिष्टाचारविषयकानुच्छेदमाश्रित्य प्रश्नोत्तरणम् | १६ |
| | | (ख) प्रबन्धः | राष्ट्रियैकताविषयकम् | -प्रबन्धवस्तुबोधः<br>-प्रबन्धसङ्घटनावबोधः<br>-राष्ट्रियैकताविषये धारणानिर्माणम्<br>-नववर्षसम्बद्धानुच्छेदबोधः | -प्रबन्धस्य निष्कर्षणम्<br>-प्रबन्धतत्त्वविमर्शः<br>-राष्ट्रियैकताया आवश्यकतावर्णनम्<br>-नववर्षसम्बद्धानुच्छेदमाश्रित्य प्रश्ननिर्माणमुत्तरलेखनञ्च | १६ |
| | | (ग) जीवनी | स्वास्थ्यविज्ञानविषयकम् | -जीवनीवर्णितचरित्रस्य वैशिष्ट्यबोधः<br>-जीवनीलेखनाय आवश्यकतत्त्वविचारणा<br>-मूलौषधसम्बद्धानुच्छेदस्य बोधः | -जीवनीलेखनाय योग्यव्यक्तेर्विषये विमर्शनम्<br>-जीवनीलेखनाय आवश्यकतत्त्वानां सङ्कलनं प्रदर्शनञ्च<br>-मूलौषधानां महत्त्ववर्णनम्<br>-मूलौषधसम्बद्धानुच्छेदेऽनुकूलांशस्य संयोजनम् | १६ |
| | | (घ) घटना-वर्णनम् | प्राकृतिकम् | -घटनायाः कारणावबोधः<br>-घटनायाः प्रभावबोधः<br>-जलाशयस्वच्छीकरणसम्बद्धानुच्छेदबोधः | -घटनायाः कारणसङ्केतनम्<br>-भविष्यति समानप्रकृतेर्घटनानां नियन्त्रणाय सामूहिकविमर्शनम्<br>-घटनातः सुरक्षणोपायवर्णनम्<br>-जलाशयस्वच्छीकरणस्यावश्यकताभिव्यक्तिः | १६ |
| क्र.सं. | विषयाः | प्रकरणानि | बोधाः | अभिव्यक्तयः | पाठ्य घण्टाः |
|---|---|---|---|---|---|
| १ | ब्राह्मणपाठः | शतपथब्राह्मणस्य १.१-२ अध्यायौ | शतपथब्राह्मणस्य सस्वरपाठनियमावबोधः | -शतपथब्राह्मणस्य निर्दिष्टकण्डिकानां सस्वरं पठनम् ।<br>-शतपथब्राह्मणस्य निर्दिष्टकण्डिकानां सस्वरं लेखनम् । | २४ |
| २ | वैदिकच्छन्दः | पिङ्गलच्छन्दःसूत्रम् | -सूत्राणां पठनबोधः ।<br>-गायœयादिच्छन्दसां सोदाहरणम् अर्थबोधः । | -सूत्राणां सोदाहरणमर्थकथनं लेखनं च<br>-वैदिकच्छन्दसां भेदोपभेदनिरूपणम् । | २४ |
| ३ | शब्दार्थज्ञानम् | पारिभाषिकशब्दार्थज्ञानम् | वैदिकपारिभाषिकशब्दार्थबोधः | वैदिकपारिभाषिकशब्दार्थनिर्वचनं लेखनं च । | २४ |
| ४ | वैदिकवाङ्मयम् | वेदवेदाङ्गस्वरूपज्ञानम् | वेदवेदाङ्गशास्त्राणां स्वरूपबोधः | -वेदवेदाङ्गशास्त्राणां स्वरूपनिरूपणम्<br>-वेदवेदाङ्गशास्त्राणां स्वरूपलेखनम् । | २४ |
| ५ | ग्रन्थपरिचयः | वेदवेदाङ्गग्रन्थपरिचयः | -संहिता-ब्राह्मणारण्यकोपनिषद्-ग्रन्थानां स्वरूपबोधः ।<br>-शिक्षा-कल्प-व्याकरण-निरुक्त-छन्दोज्योतिषग्रन्थानां स्वरूपबोधः | -संहिता-ब्राह्मणारण्यकोपनिषद्-ग्रन्थानां स्वरूपकथनम् ।<br>-शिक्षा-कल्प-व्याकरण-निरुक्त-छन्दोज्योतिषग्रन्थानां स्वरूप-निरूपणम् ।<br>-वेदवेदाङ्गग्रन्थानां स्वरूपलेखनम् । | २४ |
| सैद्धान्तिकाभ्यासः | | | | | १२० |
| प्रयोगाभ्यासः | | | | | ४० |
| योगः | | | | | १६० |

## पाठ्यवस्तुविवरणम्

**प्रकरणम् १**

शुक्लयजुर्वेदीय-माध्यन्दिन-शतपथब्राéणस्य प्रथमकाण्डस्य १-२ अध्यायगतानां सर्वेषां कण्डिकानां सस्वरं कण्ठस्थीकरणम् ।

**प्रकरणम् २**

पिङ्गलच्छन्दःसूत्रस्य वैदिकप्रकरणे (१.१-४.७) समुक्तानां गायत्री-उष्णिग्-अनुष्टुब्-बृहती-पङ्क्ति-त्रिष्टुभ्-जगती-अतिजगती-शक्वरी-अतिशक्वरीणां छन्दसां भेदोपभेदज्ञानम्, गणबोधकसूत्रार्थज्ञानम्, गायत्र्यादिच्छन्दसाम्

अक्षरवृद्धिक्षयादि-सूत्रार्थज्ञानम्, उत्कृतिच्छन्दोभेदज्ञानञ्चेति ।

## प्रकरणम् ३

वक्ष्यमाणानां वैदिकपारिभाषिकशब्दानां प्राकरणिकमर्थज्ञानम्-

अग्निष्टोमः, अग्निहोत्रम्, अग्निहोत्रहवणी, अथर्वन्, अथर्ववेदः, अध्यायः, अध्वर्युः, अनुक्रमणी, अनुवाकः, अभ्रिः, अरणिः, अर्थवादः, अष्टकः, अष्टविकृतयः, आगमः, आचार्यः, आम्नायः, आरण्यकम्, आरण्यगानम्, आसन्दी, इडापात्री, इष्टिः, उद्गाता, उपनिषद्, उपभृत्, उपला, उपवेदाः, उपवेषः (धृष्टिः), उपाङ्गानि, उलूखलः, ऊहगानम्, ऊह्यगानम्, ऋक्, ऋग्वेदः, ऋत्विक्, ऋषिः, कण्डिका, कपालानि, कल्पः, क्रमपाठः, गृह्यसूत्रम्, ग्रहः, चमसः, चषालः, चात्रम्, छन्दः, जुहूः, ज्योतिषम्, त्रयी, दर्शपूर्णमासौ, दशतिः, धर्मसूत्रम्, ध्रुवा, निगमः, निघण्टुः, निरुक्तम्, निर्वचनम्, पदपाठः, परिशिष्टम्, पितृमेधः, पुराणम्, पूर्णपात्रम्, प्रकृतिपाठः, प्रणीता, प्रपाठकः, प्रमन्थः, प्रातिशाख्यम्, प्राशित्रहरणम्, प्रोक्षणीधानी, ब्रह्मा ( ऋत्विक्), ब्राह्मणम्, भाष्यम्, मण्डलम्, मुसलम्, मेक्षणम्, यजुः, यजुर्वेदः, यागः, यूपः, विधिः, विनियोगः, वेदाङ्गनि, शकटः, शम्या, शिक्षा, शृतावदानम्, श्रुतिः, श्रौतम्, श्रौतसूत्रम्, संहिता, सामन्, सामवेदः, सूक्तम्, सोमयागः, स्फ्यः, स्मार्तम्, स्रुक्, स्रुवः, स्वाध्यायः, होता चेति संहत्य शतं (१००) शब्दाः ।

## प्रकरणम् ४

**वेदस्वरूपसम्बद्धा वक्ष्यमाणविषयाः–** १. वेदलक्षणम्, २. वेदवाचकाः शब्दाः, ३. वेदस्य भागद्वयम्- मन्त्रसंहिता, ब्राह्मणञ्च, ४. मन्त्रब्राéणयोः सम्बन्धः, ५. ऋग्यजुःसामाथर्वशब्दार्थाः, ६. त्रयीशब्दस्य तात्पर्यम्, ७. वेदचातुर्विध्यम्, ८. शाखापदार्थः, ९. वेदचतुष्टयस्योपलभ्यमानाः शाखाः, १०. यजुषां शुक्लत्व-कृष्णत्वविभागः, ११. ऋग्यजुःसामाथर्वसंहितानां स्वरूपाणि, १२. ब्राह्मणग्रन्थस्य परिचयः (लक्षणम्, मुख्यविषयाश्चेति) ।

**वेदाङ्गस्वरूपसम्बद्धा वक्ष्यमाणविषयाः–** १. शिक्षाशास्त्रपरिचयः (लक्षणम्, प्रयोजनञ्च), २. प्रातिशाख्यपरिचयः ( प्रयोजनं, मुख्यं प्रतिपाद्यं च), ३. कल्पशास्त्रपरिचयः (विभागः, प्रयोजनञ्च), ४. व्याकरणशास्त्रपरिचयः (लक्षणम्, प्रयोजनञ्च), ५. निरुक्तपरिचयः (प्रयोजनम्, स्वरूपम्, निघण्टु-निरुक्तयोर्विभागश्च), ६. छन्दःपरिचयः (छन्दश्शब्दार्थः, छन्दःशास्त्रप्रयोजनञ्च), ७. वेदाङ्गज्योतिषपरिचयः ।

## प्रकरणम् ५

वक्ष्यमाणग्रन्थानाधारीकृत्य प्रत्येकग्रन्थानां सङ्क्षिप्तस्वरूपनिदर्शनम्–

ऋग्यजुःसामाथर्ववेदसंहिताः । ऐतरेय-शतपथ-तैत्तिरीय-ताण्डच-गोपथब्राह्मणानि । ऐतरेय-तैत्तिरीय-बृहदारण्यकानि । ऐतरेय-तैत्तिरीय-ईशावास्य-छान्दोग्य-मुण्डकोपनिषदः । शौनक-याज्ञवल्क्य-व्यास-नारदीय-माण्डूकीशिक्षाग्रन्थाः । आश्वलायन-श्रौत-गृह्यसूत्रे, बौधायनश्रौत-गृह्यसूत्रे, कात्यायनश्रौत-गृह्यसूत्रे, लाटचायनश्रौतसूत्र-गोभिलगृह्यसूत्रे, वैतानश्रौतसूत्र-कौशिकगृह्यसूत्रे, आपस्तम्ब-वासिष्ठ-गौतमधर्मसूत्राणि चेति कल्पग्रन्थाः । पाणिनीयाष्टाध्यायी, वैयाकरणमहाभाष्यम्, काशिका, सिद्धान्तकौमुदी चेति व्याकरणग्रन्थाः । निरुक्तम् । पिङ्गलच्छन्दःसूत्रम् । वेदाङ्गज्योतिषम् ।

## ५. प्रयोगात्मककार्यं परियोजनाकार्यञ्च

| क्र.सं. | क्षेत्रम् | परीक्षणीयाः पक्षाः | अङ्क भारः | मूल्याङ्कनाधाराः |
|---|---|---|---|---|
| १. | शिक्षण-सहभागिता | (क) उपस्थितिः<br>(ख) सहभागिता | ३ | ● विद्यार्थिनां दैनिकोपस्थितेरभिलेखः<br>● कुण्डमण्डपनिर्माण-वर्णोच्चारण-अष्टविकृतिपाठ-ब्राह्मणपाठ-वैदिकच्छन्दप्रयोगादिविषये चिन्तन-मनन-प्रश्नोत्तर-समूहविमर्शनादिकक्षागतशिक्षणसहभागिता |
| २. | कक्षाकार्यं परियोजना-कार्यं वा | कक्षाकार्यं परियोजनाकार्यं वा | ६ | ● कुण्डमण्डपनिर्माण-वर्णोच्चारण-अष्टविकृतिपाठ-चरित्रपरिचयसम्बद्धा मौखिकी प्रस्तुतिः, प्रश्नोत्तरलेखन-विमर्श-तात्पर्यस्फुटीकरणञ्च |

| | | | | |
|---|---|---|---|---|
| | | | | ● ब्राह्मणपाठ-वैदिकच्छन्द-शब्दार्थज्ञान-वैदिकवाङ्मयसम्बद्धा मौखिकी प्रस्तुतिः, प्रश्नोत्तरलेखन-विमर्श-तात्पर्यस्फुटीकरणञ्च<br>● गृहकार्यं कक्षाकार्यं वा<br>● सम्पादितानां कार्याणां प्रतिवेदनानामभिलेखस्य संरक्षणञ्च<br>● अधीतविषयाणामनुसरणम्, तेषां दैनन्दिनव्यवहारे प्रदर्शनञ्च |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | (क) बोधः | ५ | ● कुण्डमण्डपनिर्माणप्रक्रियाप्रदर्शनम्<br>● वर्णोच्चारण-विकृतिपाठ-ब्राह्मणपाठ-छन्दोज्ञानसम्बद्धनियमानामनुशीलनम्<br>● निर्धारितचरित्राणां वेदवेदाङ्गशास्त्राणां ग्रन्थानाञ्च स्वरूपान्वेषणम् |
| | | (ख) अभिव्यक्तिः | ५ | ● कुण्डमण्डपनिर्माणप्रक्रियाकथनपुरस्सरं सम्बद्धपद्यानां स्पष्टवाचनम्<br>● स्वरवर्णोच्चारणस्य यथोक्तनियमकथनपुरस्सरं सम्बद्धस्वर-वर्णानां यथानियममुच्चारणम्<br>● जटाद्यष्टविकृतिपाठनियमकथनपुरस्सरं निर्धारितमन्त्राणामुदाहरणप्रकटनम्<br>● निर्धारितचरित्राणां संक्षिप्तविवरणप्रदानम्<br>● शतपथब्राह्मणस्य निर्दिष्टकण्डिकानां यथोक्तनियम-परिपालनपूर्वकं सस्वरं वाचनम्<br>● वैदिकच्छन्दसां सोदाहरणं भेदोपभेदकथनम्<br>● वैदिकपारिभाषिकशब्दानामर्थप्रकाशनम्<br>● वेदवेदाङ्गशास्त्राणां स्वरूपवर्णनम्<br>● निर्दिष्टानां वेदवेदाङ्गग्रन्थानां स्वरूपनिरूपणम् |
| ४. | त्रैमासिक-परीक्षा | मौखिकं लिखितं वा | ६ | त्रैमासिकपरीक्षायाः प्राप्ताङ्कस्यानुपातिकप्रतिशताधारेणाङ्कनिर्धारणं कर्तव्यम् |
| योगः | | | २५ | |

## ६. शिक्षणसहजीकरणप्रक्रिया

नैपालकमूल्यमान्यताऽऽदर्शानामध्ययनस्य माध्यमेन विद्यार्थिनां मौलिकसंस्कृतिसभ्यतयोर्विविधपक्षाणां ज्ञानेन सह सच्चरित्रवतां नैतिकतायुतानां च नागरिकाणां निर्माणमस्य विषयस्योद्देश्यं विद्यते । एतस्मिन् सन्दर्भे नेपालस्य सभ्यता-संस्कृति-मर्यादाऽऽदर्शमौलिकपरम्पराप्रभृतिनैतिकसांस्कृतिकवैभवौस्सह सम्बद्धानि विविधक्षेत्राणि समाविश्य अयं पाठ्यक्रमो निर्मितोऽस्ति । एतस्मिन् समाविष्टानां विषयवस्तुनामध्यापनक्रमे सर्वेभ्यः क्षेत्रभ्यः समानं महत्त्वं प्रदातव्यं भवति । सम्बद्धविषयवस्तुनः सहजीकरणपूर्वकं ज्ञानशिल्पधारणानां विकासनमावश्यकम् । विद्यार्थिषु सैद्धान्तिकपक्षेण सह व्यावहारिकपक्षञ्च विकासस्यानुकूलचिन्तनव्यवहारयोः समुन्नयनमेतस्य विषयस्य मुख्योद्देश्यं निर्धारितं वर्तते ।

वेदविषयस्य शिक्षणोपक्रमे शिक्षकैर्वार्षिकीं दैनिकीं वा पाठयोजनाञ्च निर्माय शिक्षणसहजीकरणं कर्तव्यम् । सोद्देश्यं छात्राणां पाठश्रवणस्य पाठमननस्य पाठ्यविषयान्तर्गतानां विविधपक्षाणां नैसर्गिकप्रतिभया चिन्तनपूर्वकं प्रश्नोत्तरलेखनस्य शिल्पविकासाय शिक्षकैर्दत्तचित्तैः प्रेरणादश्च भवितव्यम् । कक्षायां विषयानुसारेण प्रश्नोत्तर-लेखन-प्रयोगाभ्यास-विमर्शादिकार्ये शिक्षकैरेवच्छात्राः प्रेरयितव्याः । पाठ्यविषयाणां पाठ्यवस्तूनां वा प्रकृत्यनुसारमेव चिन्तन-मनन-अभ्यास-प्रश्नोत्तरलेखनादिकार्ये शिक्षककैरेवच्छात्राः प्रेरणीयाः ।

शिक्षणसहजीकरणप्रक्रियायां पाठ्यवस्तूनां प्रकृत्यनुसारेण चिन्तन-मनन-प्रश्नोत्तरलेखनादिकार्येषु शिक्षकैरेवच्छात्राः

प्रेरणीयाः । प्रकरणनिर्दिष्टग्रन्थान्तर्गतानां पद्य-गद्य-सूत्राणां, पुरुषसूक्तगतमन्त्राणां, जटाद्यष्टविकृतीनां, ब्राह्मणकण्डिकानाञ्च यथानियमं शिक्षकैरादर्शपाठपुरःसरं तदनुकूलपठनाय छात्राः प्रेरयितव्याः । अनन्तरमुक्तविषयाणां सामूहिकरूपेण पृथक्-पृथग्रूपेण चोच्चारणाय शिक्षकैश्छात्रा निर्देष्टव्याः । ततः पाठचविषयाणां प्रकृत्यनुसारं गुरु-शिष्यैः परस्परं प्रश्न-प्रतिप्रश्नकरणेन, मन्त्राणां विकृतिपाठानां ब्राह्मणकण्डिकानाञ्च वारंवारं गुरुशिष्यैः सामूहिकाभ्यासेन, श्यामपट्टिकायां वर्णाक्षरचित्रादीनां समुल्लेखनेन, श्रव्यदृश्योपकरणप्रयोगेण, हस्तस्वरप्रदर्शनेन, मुखाकृतिप्रदर्शनेन, शब्द-वाक्यादीनामर्थकरणेन, व्याख्यानेन, शब्दानामन्वयकरणेन, पर्यायार्थनिर्देशेन, भावार्थप्रकाशनेन, उदाहरण-प्रत्युदाहरणनिर्देशेन, सन्दर्भग्रन्थाध्ययनाय प्रेरणाप्रदानेन, आख्यायिकाश्रावणेन च पाठचविषयाणां शिक्षणं कर्तव्यम् । शिक्षणकार्ये शिक्षकैः विषयवस्तूनां सामान्यपरिचयमुद्देश्यकथनं प्रस्तुतिविधिञ्च बोधयित्वाच्छात्रछात्राभ्यस्तत्सम्बद्धं कक्षाकार्य गृहकार्यञ्च प्रदेयम् । अधोलिखितानामभ्यासप्रधानानां सर्जनात्मकानाञ्च क्रियाकलापानां सम्पादनमावश्यकं भवति -

(क) प्रस्तुतीकरणम्  (ख) अभ्यासः  (ग) उत्पादनम्  (घ) पठनबोधः

(ङ) प्रयोगात्मककार्यम्  (च) पृष्ठपोषणम्  (छ) आत्ममूल्याङ्कनम्

## ७. विद्यार्थिमूल्याङ्कनप्रक्रिया

विद्यार्थिनां शिक्षणोपलब्धिं सुनिश्चेतुं निर्माणात्मकं निर्णयात्मकञ्चोभ्यप्रकारकमेव मूल्याङ्कनं विधातव्यं भवति । विद्यार्थिनां शिक्षणोपलब्धे, सुधाराय कक्षाशिक्षणस्यैव क्रमे कक्षाकार्य-परियोजनाकार्य-प्रस्तुतीकरणोपलब्धिपरीक्षासदृशान् क्रियाकलापान् कारयित्वा सैद्धान्तिकज्ञानशिल्पयोरवाप्तिरावश्यकी । एतत्कार्यस्य प्रभावकारिरूपेण क्रियान्वयनाय, विद्यार्थिनां शिक्षणस्तरस्य सुधाराय च सहजीकरणक्रियाकलापस्य अभिन्नाङ्गस्य रूपेण निर्माणात्मकमूल्याङ्कनमुपयोक्तव्यम् । निर्माणात्मकमूल्याङ्कनस्य शिक्षणोपलब्धेर्निश्चितभारो निर्णयात्मकमूल्याङ्कनेऽपि संयोज्यते ।

पाठ्यक्रमेण निर्धारितस्योद्देश्यस्यानुरूपं विद्यार्थिनो ज्ञान-शिल्पाभिवृत्तीः प्राप्नुवन्नवेति विषयस्यान्वेषकं महत्त्वपूर्णं संयन्त्रं मूल्याङ्कनं भवति । विद्यार्थिनां मूल्याङ्कनं शिक्षणोपलब्धीर्ध्यात्वा सक्षमतां शिक्षणोपलब्धीनाञ्चानुरूपं शिक्षणस्य सर्वान् स्तरान् समाविश्य विधातव्यम् । आन्तरिकबाह्यमूल्याङ्कनयोर्माध्यमेन एतस्य विषयस्य मूल्याङ्कनं विधीयते । मूल्याङ्कनस्य समग्रभारतः पञ्चविंशतिप्रतिशतमान्तरिकं पञ्चसप्ततिप्रतिशतं बाह्यञ्च मूल्याङ्कनं विधीयेते । एवमेव बाह्यमूल्याङ्कनस्यान्तर्गतं लिखितपरीक्षा सञ्चाल्यते । विद्यार्थीमूल्याङ्कनस्यान्तर्गतं निर्माणात्मकं निर्णयात्मकञ्च मूल्याङ्कनं पद्धतिद्वयेनैव क्रियते । अस्य विषयस्य पाठ्यक्रमे समाविष्टानां स्तरगतसक्षमतानाम्, कक्षागतशिक्षणेपलब्धीनाम्, तासां विषयवस्तूनाम्, तैस्सह सम्बद्धस्य शिल्पस्य, शिक्षण सहभागितायाः शिक्षणसक्रियतायाश्चाधारेषु विद्यार्थिनां शिक्षणस्य मूल्याङ्कनं विधातव्यम् ।

अस्य स्तरस्य विद्यार्थिनां मूल्याङ्कनम् अक्षराङ्कनपद्धत्या विधीयते । मूल्याङ्कने निर्माणात्मकी निर्णयात्मिकी च प्रक्रिया अवलम्ब्यते । छात्राणां स्तरगतसामर्थ्योपलब्धये विधातव्यैरध्ययनभ्रमण-घटनावलोकन-सर्जनकार्य-वैयक्तिकसामूहिकविमर्शन-लिखितपरीक्षा-प्रत्युत्पन्नमतिप्रदर्शन-प्रश्नोत्तरण-कक्षाकार्यपरीक्षण-व्यवहारप्रभृति-कार्यैर्निर्माणात्मकं मूल्याङ्कनं विधीयते येन अविच्छिन्नं मूल्याङ्नं सम्पद्यते । स्तरगतसामर्थ्योपलब्धये कक्षागतसामर्थ्योपलब्धे च शैक्षिकसत्रस्यान्तेऽन्तिमपरीक्षाया माध्यमेन निर्णयात्मकमूल्याङ्कनं सम्पाद्यते । विद्यार्थिषु पाठ्यवस्तुबोधादर्शचरित्रनिर्माण-मानवीयमूल्य-मान्यतावलम्बन-संस्कारसंरक्षण-प्रयोगाभ्यास-प्रभृतिविषयाणां विकासो मूल्याङ्कनस्य मूलाधारो मन्यते ।

मूल्याङ्कनप्रक्रियां विश्वसनीयां विधिसम्मताञ्च सम्पाद्य एकरूपतायामानेतुं स्थानीय-प्रादेशिक-राष्ट्रियस्तरेषु बाह्यसार्वजनिकपरीक्षणविधौ सर्वेषु विषयेषु आन्तरं बाह्यं च मूल्याङ्कनं विधीयते । सार्वजनिकपरीक्षणे प्रतिविषयं प्रतिशतं पञ्चविंशत्याः अङ्कानां कृते आन्तरं परीक्षणं, प्रतिशतं पञ्चसप्तत्याः अङ्कानां कृते बाह्यं परीक्षणञ्च विधीयते । आन्तरं मूल्याङ्कनं सम्बद्धविद्यालयस्य शिक्षकेण विधातव्यम् । शिक्षणप्रक्रियया सहैव विषयवस्तुसम्बद्धं मूल्याङ्कनं नैरन्तर्येण विधेयम् । तत्र शिक्षणोपलब्धिः क्रमशः औपचारिकरूपेण अनौपचारिकरूपेण च परिमापनीया । शिक्षणसहजीकरणस्य क्रमे विद्यार्थिभिरधिगतानां ज्ञानशिल्पप्रयोगोच्चदक्षतासम्बद्धपक्षाणां मूल्याङ्कनञ्च अनिवार्यतया विधेयम् ।

## (क) आन्तरं मूल्याङ्कनम्

शिक्षणसहजीकरणप्रक्रियया कक्षागतशिक्षणेन सहैव छात्राणामान्तरं निर्माणात्मकं वा मूल्याङ्कनमपि कर्तव्यम् । व्याकरणस्य शिक्षणक्रमे छात्राणां निर्माणात्मकमूल्याङ्कनाय अधोऽङ्किता विधयोऽवलम्बयितुं शक्यन्ते-

- लिखितप्रश्नोत्तरमाध्यमेन
- मौखिकप्रश्नोत्तरमाध्यमेन
- छात्राणां परस्परविचारविमर्शमाध्यमेन

अधोलिखिताधारेणान्तरमूल्याङ्कनं कर्तव्यम् :

| क्र.सं. | क्षेत्रम् | अङ्कभारः |
|---|---|---|
| १. | शिक्षणसहभागिता | ३ |
| २. | कक्षाकार्यं परियोजनाकार्यं वा | ६ |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | १० |
| ४. | त्रैमासिकपरीक्षा | ६ |
| योगः | | २५ |

## (ख) बाह्यमूल्याङ्कनम्

निर्णयात्मके बाह्ये वा मूल्याङ्कने पाठ्यक्रमे निर्धारितोद्देश्यानुरूपं छात्रैः ज्ञानम्, शिल्पमधिगतं नवेति सम्परीक्ष्य तदनुसारेण छात्राणामुत्तीर्णत्वमनुत्तीर्णत्वं वा निर्णीयते । एतादृशं मूल्याङ्कनमावधिकं भवति । शैक्षिकसत्रस्यान्त एतद् मूल्याङ्कनं विधीयते ।

अधोलिखिताधारेण बाह्यमूल्याङ्कनं कर्तव्यम् :

**कक्षा ११**

| क्र.सं | विषयक्षेत्रगतस्वरूपम् (पठनं लेखनञ्च) | विषयक्षेत्रम् | अङ्कभारः |
|---|---|---|---|
| १ | कुण्डमण्डपनिर्माणप्रक्रियाबोधः | कुण्डमण्डपनिर्माणम् | १+१ |
| | कुण्डमण्डपनिर्माणप्रक्रियालेखनम्<br>कुण्डमण्डपनिर्माणप्रक्रियाप्रकाशनम् | कुण्डमण्डपनिर्माणम् | ८ |
| | ग्रन्थनिर्दिष्टकुण्डमण्डपनिर्माणप्रयोगः | कुण्डमण्डपनिर्माणम् | ८ |
| २ | वर्णोच्चारणनियमबोधः | वर्णोच्चारणम् (याज्ञवल्क्यशिक्षा) | १+१ |
| | शु.य.मा.संहितागतमन्त्राणां निर्दिष्ट-वर्णोच्चारणनियमप्रकटनम् | वर्णोच्चारणम् (याज्ञवल्क्यशिक्षा) | ४ |
| | निर्दिष्टवर्णानां नियमानुसारेणोच्चारणम् ।<br>वर्णोच्चारणनियमलेखनम् । | वर्णोच्चारणम् (याज्ञवल्क्यशिक्षा) | ८ |
| ३ | वेदाध्ययने सम्प्रदायानुगत-विषयाणां बोधः | स्वरवर्णोच्चारणम् ( | १२ |

| | | | |
|---|---|---|---|
| | सम्प्रदायानुगतविषयाणां निरूपणम् । सम्प्रदायानुगतविषयाणां लेखनम् । | सम्प्रदायप्रबोधिनी शिक्षा) | |
| ४ | संहितायां स्वरवर्णोच्चारण-नियमावबोधः | स्वरवर्णोच्चारणम् (प्रतिज्ञापरिशिष्टम्) | १+२ |
| | स्वरवर्णोच्चारणनियमप्रकटनं लेखनञ्च । स्वरवर्णानां निर्दिष्टनियमानुसारेण समुच्चारणम् । | स्वरवर्णोच्चारणम् (प्रतिज्ञापरिशिष्टम्) | ४ |
| ५ | जटाद्यष्टविकृतिज्ञानम् | अष्टविकृतिपाठः | १+१ |
| | जटाद्यष्टविकृतीनां स्वरूपबोधः । जटाद्यष्टविकृतिपाठनियमबोधः । | अष्टविकृतिपाठः | ४ |
| | जटाद्यष्टविकृतीनां स्वरूपप्रकाशनम् ।<br>जटाद्यष्टविकृतीनां पाठनियमप्रकटनम् । जटाद्यष्टविकृतीनां समुच्चारणं लेखनं च । | अष्टविकृतिपाठः | ८ |
| ६ | निर्दिष्टवैदिकचरित्राणामितिवृत्त-बोधः । | चरित्रपरिचयः | १+१ |
| | निर्दिष्टवैदिकचरित्राणामितिवृत्तविषये संक्षिप्तविवरणप्रकटनं समुल्लेखनञ्च । | चरित्रपरिचयः | ८ |
| | | **योगः** | **७५** |

**कक्षा १२**

| **क्र.सं** | **विषयक्षेत्रगतस्वरूपम् (पठनं लेखनञ्च)** | **विषयक्षेत्रम्** | **अङ्कभारः** |
|---|---|---|---|
| १ | ब्राह्मणस्य सस्वरपाठनियमावबोधः | ब्राह्मणपाठः | १+१ |
| | शतपथब्राह्मणस्य निर्दिष्टकण्डिकानां स्वरूपबोधः । | ब्राह्मणपाठः | ४ |
| | शतपथब्राह्मणस्य निर्दिष्टकण्डिकानां सस्वरं लेखनम् | ब्राह्मणपाठः | ८ |
| २ | सूत्राणां पठनबोधः | वैदिकच्छन्दः | १+१ |
| | गायत्र्यादिच्छन्दसां सोदाहरणम् अर्थबोधः | वैदिकच्छन्दः | ४ |
| | सूत्राणां सोदाहरणमर्थकथनं लेखनं च<br>वैदिकच्छन्दसां भेदोपभेदनिरूपणम् । | वैदिकच्छन्दः | ८ |
| ३ | पारिभाषिकशब्दार्थज्ञानम् । वैदिकपारिभाषिकशब्दार्थबोधः । | शब्दार्थज्ञानम् | २+३ |
| | वैदिकपारिभाषिकशब्दार्थनिर्वचनं लेखनं च | शब्दार्थज्ञानम् | १२ |
| ४ | वेदवेदाङ्गस्वरूपज्ञानम् । वेदवेदाङ्गशास्त्राणां स्वरूपबोधः । | वैदिकवाङ्मयम् | १+१ |

| | | | |
|---|---|---|---|
| | वेदवेदाङ्गशास्त्राणां स्वरूपनिरूपणम् | वैदिकवाङ्मयम् | ४ |
| | वेदवेदाङ्गशास्त्राणां स्वरूपलेखनम् | वैदिकवाङ्मयम् | ८ |
| ५ | वेदवेदाङ्गग्रन्थपरिचयः ।<br>-संहिता-ब्राह्मणारण्यकोपनिषद्-ग्रन्थानां स्वरूपबोधः ।<br>-शिक्षा-कल्प-व्याकरण-निरुक्त-छन्दोज्योतिषग्रन्थानां स्वरूपबोधः ।<br>-संहिता-ब्राह्मणारण्यकोपनिषद्-ग्रन्थानां स्वरूपकथनम् ।<br>-शिक्षा-कल्प-व्याकरण-निरुक्त-छन्दोज्योतिषग्रन्थानां स्वरूप-निरूपणम् ।<br>-वेदवेदाङ्गग्रन्थानां स्वरूपलेखनम् । | ग्रन्थपरिचयः | १६ |
| | | **योगः** | **७५** |

# सामवेदः

**कक्षा** : ११ र १२ **विषय सङ्केत** : [SAB. 503] (**कक्षा** ११), [SAB. 504] (**कक्षा** १२)

**पाठ्यघण्टा** : ५ **वार्षिक कार्यघण्टा** : १६०

## १. परिचयः

संस्कृतव्याकरणविषयस्य पाठ्यक्रमः सामवेदाध्ययनपरम्परानुरूपपाठ्यविषयाणां सैद्धान्तिकानां व्यावहारिकाणां च पक्षाणां पठनपाठनयोरुद्देश्येन विकसितो वर्तते । एतदर्थं २०७६ विक्रमवर्षीयस्य राष्ट्रियपाठ्यक्रमप्रारूपस्य मार्गदर्शनानुसारेण विद्यालयशिक्षाया माध्यमिकस्तरे (एकादश्यां द्वादश्याञ्च कक्षयोः) सामवेदविषयस्य एतस्मिन् पाठ्यक्रमे सामवेदवाङ्मयातिरिक्तं समग्रवेदसम्बद्धज्ञानप्रदायकविषयाणां प्रतिप्रकरणमधीतविषयाणां बोधो बुद्धविषयाणामभिव्यक्तिसामर्थ्यञ्च छात्रेषु स्यादिति हेतोर्बोधाभिव्यक्त्योरुल्लेखोऽपि विहितो विद्यते । एतस्माद् वर्तमानसन्दर्भे वेदाधारितविषयवस्तूनामुपयोगेन विद्यार्थिनां रुच्यकाङ्क्षे प्रपूर्य शिक्षाया राष्ट्रियोद्देश्यं प्राप्स्यते, एतस्य सान्दर्भिकतां विस्तार्य विधाय उपयुक्तता सुनिश्चिता च विधास्यते इत्यपेक्षितमस्ति । अनेन पाठ्यक्रमेण सम्बद्धविषये उच्चशिक्षाया आधारोऽपि निर्मास्यते इति चापेक्षितं वर्तते ।

सहस्रशाखात्मकः सामवेदः । अस्य सम्प्रति कौथुमजैमिनिराणायनीयाख्याः तिस्रः शाखाः समुपलब्धाः सन्ति । पाठ्यक्रमोऽयं सामवेदस्य कौथुमशाखासम्बद्धः । तदनुरूपमस्मिन् पाठ्यक्रमे सामवेदकौथुमसंहितागतमन्त्राः, ग्रामेगेयारण्येगेय- ऊहपठितगानमन्त्राः, पिङ्गलच्छन्दःसूत्रस्य वैदिक-प्रकरणम्, विश्वामित्र-जमदग्निप्रभृतयः सप्तर्षयः भाष्यकाराश्चेत्येषां प्राचीनचरित्राणां परिचयसम्बद्धविषयाः, वेद-वेदाङ्ग-शास्त्रस्य लक्षण-स्वरूप-प्रयोजन-परिचयादिसम्बद्धा विषयाश्च पाठ्यविषयत्वेन निर्धारिताः सन्ति । अतोऽस्य पाठ्यक्रमस्याध्ययनेन छात्रा स्वशाखासम्बद्धायाः सामवेदमन्त्रसंहितायाः पारम्परिकाध्ययने, यज्ञानुष्ठानार्थमाधारभूत-कुण्डमण्डपादि-निर्माण-प्रक्रियायाः सैद्धान्तिकस्य व्यावहारिकस्य च ज्ञानार्जने, स्वरवर्णोच्चारणस्य नियमपरिज्ञानपुरःसरं सामवेदमन्त्रसंहिताया अध्ययने, वैदिकच्छन्दसाम् अक्षरसङ्ख्या-भेदोपभेदविज्ञाने, वैदिकचरित्राणां परिचयप्रदाने, वैदिकपारिभाषिकशब्दानामर्थावबोधे, वेद-वेदाङ्गग्रन्थानां स्वरूपज्ञाने समर्था भविष्यन्तीति भिन्नभिन्नशीर्षकेषु पृथक्-पृथग् विवरणं समुल्लिखितं वर्तते ।

परिचयम्, स्तरगतसक्षमताम्, कक्षागतशिक्षणोपलब्धिम्, विषयवस्तुनः क्षेत्रक्रमौ, शिक्षणसहजीकरणप्रक्रियाम्, विद्यार्थिमूल्याङ्कनञ्च समाविश्य पाठ्यक्रमोऽसौ विकासं नीतः । एतस्मिन् क्रमे पाठ्यक्रमलेखनस्य विकासस्य च विषयगतौचित्यम्, पाठ्यक्रमे विद्यमाना मुख्यविशेषताः, पाठ्यक्रमस्य स्वरूपञ्च संयोज्य परिचयं, विषयगतरूपेणापेक्षितं ज्ञानम्, शिल्पम्, अभिवृत्तिम्, मूल्यञ्च, कार्यतत्परतां संयोज्य एतस्याः क्रियात्मकस्वरूपे सक्षमताम्, शिक्षणस्य स्तरम्, सक्षमताया विशिष्टीकृतविस्तृतीकरणेन शिक्षणोपलब्धिम्, सक्षमताम्, पूर्वकक्षाभिस्सह लम्बीयसन्तुलनस्याधारे विषयवस्तुनो क्षेत्रक्रमौ च, विषयगतविशिष्टतामौलिकते संयोज्य शिक्षणसहजीकरणस्य विधिम्, प्रक्रियाञ्च, निर्माणात्मकनिर्णयात्मकमूल्याङ्कनयोर्विधिं प्रक्रियाञ्चोल्लिख्य विद्यार्थिमूल्याङ्कनं व्यवस्थितं वर्तते ।

## २. स्तरगतयोग्यताः

**माध्यमिकस्तरे ११-१२ कक्षयोः सामवेदविषयमधीत्य विद्यार्थिनो निर्दिष्टविषयेषु क्षमा भविष्यन्ति –**

१. दिक्साधन-द्वारमण्डपस्तम्भतोरणमान-कुण्डमण्डपनिर्माणविषयकप्रक्रियावबोधे अभिव्यक्तौ च ।
२. सामवेदकौथुमसंहितायाः स्वरवर्णोच्चारणविषयकनियमावबोधे, अभिव्यक्तौ, पठने, लेखने च ।
३. निर्दिष्टवैदिकचरित्राणामितिवृत्तबोधे, तेषां पृथक्-पृथग्रूपेण परिचयप्रदाने, पठने, लेखने च ।
४. सामवेदीय-कौथुमसंहिताया ऋक्पाठानां गानानां च निर्दिष्टभागस्य सस्वरवाचने लेखने च ।
५. वैदिकच्छन्दसाम् अक्षरसंख्या-भेदोपभेदविज्ञाने, अभिव्यक्तौ, पठने, लेखने, च ।
६. निर्दिष्टवैदिकपारिभाषिकशब्दानामर्थावबोधे, अभिव्यक्तौ, पठने, लेखने, च ।
७. वेद-वेदाङ्गशास्त्राणां स्वरूपावबोधे, अभिव्यक्तौ, पठने, लेखने च ।

### ३. कक्षागतशिक्षणोपलब्धिः

**कक्षा ११**

**माध्यमिकस्तरीयायां ११ कक्षायां सामवेदविषयमधीत्य छात्रा अधो निर्दिष्टविषयेषु क्षमा भविष्यन्ति –**

**श्रवणभाषणशिल्पम्**

१. प्रकरणनिर्दिष्टग्रन्थान्तर्गतानां पद्य-गद्य-सूत्राणां साममन्त्राणाञ्च यथानियमं श्रवणं तत्पश्चात् शुद्धोच्चारणम्

२. प्रकरणनिर्दिष्टग्रन्थान्तर्गतानां विषयाणां श्रवणानन्तरं तदनुरूपं विषयविवरणकथनम्

**पठनशिल्पम्**

१. निर्दिष्टपद्य-गद्य-सूत्रगतविषयाणां व्याख्योदाहरणसहितं बोधपूर्वकं पठनम्

२. कौथुमसंहितान्तर्गतसामगानस्य ससम्प्रदायं सस्वरोच्चारणम्

३. सामवेदकौथुमसंहितान्तर्गतर्क्पाठस्य ससम्प्रदायं सस्वरोच्चारणम्

४. निर्दिष्टचरित्राणामितिवृत्तज्ञानपुरःसरं पठनम् ।

**लेखनशिल्पम्**

१. प्रकरणनिर्दिष्टग्रन्थान्तर्गतानां निर्दिष्टमन्त्राणां सशुद्धि लेखनम्

२. निर्दिष्ट-पद्य-गद्य-सूत्रगतविषयाणां व्याख्योदाहरणसहितं लेखनम्

३. निर्दिष्टचरित्राणामितिवृत्तलेखनम्

४. पठितविषयाणां प्रश्ननिर्माणमुत्तरलेखनञ्च

**कक्षा १२**

**माध्यमिकस्तरीयायां १२ कक्षायां सामवेदविषयमधीत्य छात्रा अधो निर्दिष्टविषयेषु क्षमा भविष्यन्ति –**

**श्रवणभाषणशिल्पम्**

१. प्रकरणनिर्दिष्टग्रन्थान्तर्गतानां गानमन्त्र-सूत्र-शब्द-विषयाणां श्रवणम्, शुद्धोच्चारणञ्च

**पठनशिल्पम्**

१. कौथुमगानसंहिताया निर्दिष्टमन्त्राणां सस्वरं पठनम्

२. सामवेदोत्तरार्चिकस्य निर्दिष्टमन्त्राणां सस्वरं पठनम्

३. ऊहगानस्य निर्दिष्टस्तोत्राणां सस्वरं पठनम्

४. पिङ्गलच्छन्दःसूत्रगतसूत्राणां व्याख्योदाहरणसहितं बोधपूर्वकं पठनम्

५. वैदिकच्छन्दसाम् अक्षरसङ्ख्या-भेदोपभेदविज्ञानपुरःसरं पठनम्

६. वैदिकपारिभाषिकशब्दानामर्थबोधपूर्वकं पठनम्

७. वेद-वेदाङ्गशास्त्राणां स्वरूपावबोधाय सन्दर्भग्रन्थगतनिर्दिष्टभागस्य बोधपूर्वकं पठनम्

**(ग) लेखनशिल्पम्**

१. कौथुमगानसंहिताया निर्दिष्टमन्त्राणां सस्वरं लेखनम्

२. सामवेदोत्तरार्चिकस्य निर्दिष्टमन्त्राणां सस्वरं लेखनम्

३. ऊहगानस्य निर्दिष्टस्तोत्राणां सस्वरं लेखनम्

४. पिङ्गलच्छन्दःसूत्रगतसूत्राणां व्याख्योदाहरणसहितं लेखनम्

५. वैदिकच्छन्दसाम् अक्षरसङ्ख्या-भेदोपभेदविज्ञानपुरःसरं लेखनम्

६. वैदिकपारिभाषिकशब्दानामर्थलेखनम्

७. वेदवेदाङ्गशास्त्राणां निर्दिष्टांशस्य लक्षणस्वरूपप्रयोजनपरिचयादिलेखनम्

८. पठितविषयाणां प्रश्ननिर्माणमुत्तरलेखनञ्च

**४. विषयक्षेत्रं क्रमश्च**

**कक्षा ११**

| क्र.सं. | विषयाः | प्रकरणानि | बोधाः | अभिव्यक्तयः | पाठ्य घण्टाः |
|---|---|---|---|---|---|
| १ | कुण्डमण्डपनिर्माणम् | मण्डपकुण्डसिद्धिः | कुण्डमण्डपनिर्माणप्रक्रिया-बोधः | -कुण्डमण्डपनिर्माणप्रक्रियाप्रकाशनम्<br>-ग्रन्थनिर्दिष्टकुण्डमण्डपनिर्माणप्रयोगः<br>-कुण्डमण्डपनिर्माणप्रक्रियालेखनम् | २५ |
| २. | स्वरवर्णोच्चारणम् | नारदीयशिक्षा | स्वरवर्णोच्चारणनियमबोधः | -सामवेदकौथुमसंहितागतमन्त्राणां निर्दिष्टवर्णोच्चारणनियमप्रकटनम्<br>-निर्दिष्टस्वराणां नियमानुसारेणोच्चारणम्<br>-स्वरवर्णोच्चारणनियमलेखनम् | २५ |
| ३. | गानाधार-मन्त्राः | सामवेदसंहिता | सस्वरपाठनियमबोधः | -सामवेदसंहितायाः निर्दिष्टमन्त्राणां सस्वरं पठनम्<br>-सामवेदसंहितायाः निर्दिष्टमन्त्राणां सस्वर लेखनम् | ३२ |
| ४. | सामगानानि | ग्रामेगेयगानम् | सस्वरपाठनियमबोधः | -ग्रामेगेयगानसंहितायाः निर्दिष्टमन्त्राणां सस्वरं पठनम्<br>-ग्रामेगेयगानसंहितायाः निर्दिष्टमन्त्राणां सस्वरं लेखनम् | ३२ |
| ५. | चरित्रपरिचयः | वैदिकचरित्रपरिचयः | निर्दिष्टवैदिकचरित्राणामि-तिवृत्तबोधः | निर्दिष्टवैदिकचरित्राणामितिवृत्तविषये संक्षिप्तविवरणप्रकटनम् समुल्लेखनञ्च | ६ |
| प्रयोगात्मकोऽभ्यासः | | | | | ४० |
| योगः | | | | | १६० |

**पाठ्यवस्तुविवरणम्**

**प्रकरणम् १**

मण्डपकुण्डसिद्धिगतानां वक्ष्यमाणविषयाणामध्ययनम्–

ग्रन्थकर्तृपरिचयः, हस्तादिमानानि, दिक्साधनार्थमितिकर्त्तव्यता, मण्डपनिर्माणप्रकारः, द्वारादिमानानि, ध्वजपताका-निवेशनम्, नवकुण्ड-पञ्चकुण्डैककुण्डपक्षाणां विशेषविधयः, हवनसङ्ख्यया कुण्डमानम्, कुण्डेषु योनिनिवेशनप्रकारः, चतुरस्रार्धचन्द्र-वर्तुलकुण्डसाधनम्, मेखलारचनाप्रकारः स्थण्डिलविवेचनञ्चेति विषयाः ।

**प्रकरणम् २**

नारदीयशिक्षाया गद्यपद्यान्तर्गतानां सर्वेषां स्वरवर्णोच्चारणसम्बद्धानां द्वितीयप्रपाठकगतानां विषयाणां सोदाहरणमध्ययनम् ।

**प्रकरणम् ३**

**(क) सामवेदीयकौथुमसंहितायाः २-३ अध्यायगतानां निम्नाक्तितमन्त्राणामध्ययनम् ।**

उत्वा मन्दन्तु, गिर्वणः पाहि, सदा न इन्द्र, आत्वा विशन्त्विन्दवः, इन्द्रमिद्गाथिनः, इन्द्र इषे, इन्द्रो अङ्ग, इमा उत्वा, इन्द्रो नु, न कि इन्द्र, तरणिं वः, अरं त इन्द्र, धानावन्तम्, अपां फेनेन, आव इन्द्रं, अतश्चिदिन्द्र, आनो मित्रावरुणा, इदं विष्णुः, अतीहि, कदु प्रचेतसे, एवाह्यसि, अभि त्वा शूरनः, त्वामिद्धि हवामहे, अभि प्रभ, तंवो दस्म, तरोभिर्वो, पिबा सुतस्य, न किष्टं कर्मणा, आत्वा सहस्रमा, आ मन्द्रैरिन्द्र, इन्द्रमिद्देवता, शग्ध्यूषु शचीपते, बृहदिन्द्राय, वयं घत्वा, श्रायन्त इव, आनो विश्वासु, तवेदिन्द्रावमम्, यो राजा चर्षणीनां, यत इन्द्र, वास्तोष्पते, बण्महाँ असि, यद्याव इन्द्रते, कस्तमिन्द्र त्वा, मो षु त्वा, सुनोत सोमपाव्ने, वस्याँ इन्द्रासि, इम इन्द्राय, त्वष्टा नो, कदाचन, प्रत्यु अदर्श्याय, त्वमिन्द्र प्रतू, असावि, अदर्दरुत्, सुष्वाणास, इन्द्रं नरो, ब्रह्म जज्ञानं, अपूर्व्या, अव द्रप्सो, उदु ब्रह्माण्यैरत, चक्रं यदस्याप्स्वा, त्यमूषु वाजिनम्, त्रातारमिन्द्रम्, इन्द्राय गिरः, को अद्य युङ्क्ते, गायन्ति त्वा, इममिन्द्र, असावि सोम, एतो न्विन्द्रं ।

(ख) सामवेदीयकौथुमसंहितायाः ४-६ अध्यायगतानां निम्नाङ्कितमन्त्राणामध्ययनम्-

प्रत्यस्मै पिपीषते, स पूर्व्यो, दधिक्राव्णः, पुरां भिन्दुर्युवा, कश्यपस्य, अर्चत प्रार्चत, ऋचं साम, श्रत्ते दधामि, समेत विश्वा, घृतवती भुवना, उभे यदिन्द्र, इन्द्र सुतेषु, गृणे तदिन्द्र, अक्षन्नमीमदन्त, चन्द्रमा अप्स्वा, इन्दुः पविष्ट, विश्वते दावन्, एष ब्रह्मा, ब्रह्माण इन्द्रं, अनवस्ते रथमश्वाय, उप प्रक्षे, अर्चन्त्यर्क, अस्तु श्रौषट्, अया रुचा, अग्निं होतारं, उच्चाते, स्वादिष्ठया, वृषा पवस्व, उपो षु जातमप्तुरं, आविशन्, पुनानःसोम, परीतो षिञ्चता, सोम उ ष्वाणः, मृज्यमानः, अभि सोमास, प्र काव्यमुशनेव, तिस्रोवाच, अक्रान्त्समुद्रः, कनिक्रन्ति हरिरा, पवस्व सोम, प्र सेनानीः, पुरोजिती वो, धर्ता दिवः, पवित्रं ते विततं, सोमः पुनान, परि कोशं, स सुन्वे यो, एषस्य धारया, य उस्त्रिया, इन्द्र ज्येष्ठं, इन्द्रो राजा, यस्येदमा, उदुत्तमं वरुण, एना विश्वा, अहमस्मि प्रथमजा, नियुत्वान् वायवा, त्वमिमा ओषधीः, अग्निमीडे पुरोहितम्, ते मन्वत, समन्या यन्त्यु, प्रक्षस्य वृष्णो, पात्यग्निर्विपो, सहस्रशीर्षाः, त्रिपादूर्ध्व, पुरुष एवेदं, एतावानस्य, ततो विराडजायत, मन्ये वां द्यावापृथिवी, हरीत इन्द्र, सहर्षभाः सहवत्सा, अग्न आयूँषि, विभ्राड् बृहत्, सप्तत्वा हरितः ।

**प्रकरणम् ४**

**(क) ग्रामेगेयगानस्य निम्नाक्तितानां ५-९ प्रपाठकपठितानां नामसम्बद्धगानानामध्ययनम्-**

सैन्धुक्षितानि त्रीणि, सौमेधानि त्रीणि, प्रैयमेधानि त्रीणि, गौरीविते द्वे, आकूपारे द्वे, वाचस्सामनी द्वे, त्वाष्ट्रीसाम, सवितुस्साम, उषसस्साम, त्वष्टुरातिथ्ये द्वे, भारद्वाजम्, सौभरम्, पाष्ठौहे द्वे, धुरासाकमश्वम्, आंगिरसं हरिश्रीनिधनम्, वैरूपम्, सिन्धुसाम, सौमित्रम्, तौभम्, श्रौतम्, आभीशवम्, पौषम्, क्षुरपवि, उक्थ्यामहीयवम्, इन्द्रस्य भारद्वाजम् ( त्वामिद्धिहवामहे-२), श्यैतम्, नौधसम्, यौक्तस्रजम्, संशानानि चत्वारि सामानि, श्रायन्ती, कावषम्-१, सूर्यसाम, वैरूपम्, ऐन्द्रम् इन्द्रस्य त्रातम्, दधिक्राब्णम्, ।

**(ख) ग्रामेगेयगानस्य १०-१७ प्रपाठकपठितानां निम्नाक्तितानां नामसम्बद्धगानानामध्ययनम्-**

श्रत्ताष्टकम् (८) जागतं वरुणसाम, यामम्, त्रैतम्, (चन्द्रमा आउवा) अवभृथसाम, प्रवर्ग्य साम, आजिगम्, आमहीयवम्, भासम्, सोमसाम, प्राजापत्यम्, जनित्रे द्वे, वार्षाहरम्, तरन्तस्य साम, तिरश्चीन द्वे, रौरवम्, वैष्णवे द्वे, औक्ष्णोरंध्राणि त्रीणि, वाराहाणि चत्वारि , रौरवम्, वैष्णवम्, अर्कपुष्पम् (२) सन्तनिः ।

**प्रकरणम् ५**

**अधस्तनर्षिग्रन्थकाराणां (चरित्राणां) देशकालचरितादिविषये संक्षिप्तविवरणप्रदानम्-**

सायणः, पैलः, वैशम्पायनः, जैमिनिः, सुमन्तु, यास्कः, पाणिनिः, पतञ्जलिः, गौतमः, व्यासः, मशकः, गुणविष्णुः, तण्डिः, सुश्रुतः, शङ्करः, वरदराजः, गार्ग्यः, औदव्रजिः, शाकटायनः, द्विजराजभट्टः, माधवः, गोभिलः, लाट्यायनः, वशिष्ठः, विश्वामित्रः, पराशरः, कात्यायनः, सत्यव्रतसामश्रमी, शौनकः, पिङ्गलः, ।

**कक्षा १२**

| क्र.स | विषयाः | प्रकरणानि | बोधाः | अभिव्यक्तयः | पाठ्य घण्टाः |
|---|---|---|---|---|---|
| १ | गानपाठः | अरण्येगेयगानम् | अरण्येगेयगानपाठनियमावबोधः | अरण्येगेयगानस्य निर्दिष्टगानानां सस्वरं पठनम्<br>अरण्येगेयगानस्य निर्दिष्टगानानां सस्वर लेखनम् | २४ |
| २ | स्तोत्रगानपाठः | ऊहगानम् | ऊहगानपाठनियमावबोधः | ऊहगानस्य निर्दिष्टगानानां सस्वरं पठनम्<br>ऊहगानस्य निर्दिष्टगानानां सस्वर लेखनम् | १२ |
| ३. | स्तोत्राधारर्क्पाठः | सामवेदसंहिता (उत्तरार्चिकम्) | स्तोत्राधारर्क्पाठनियमावबोधः | सामवेदासंहिताया उत्तरार्चिकस्य निर्दिष्टानामृक्पाठानां सस्वरं पठनम्<br>सामवेदासंहिताया उत्तरार्चिकस्य निर्दिष्टानामृक्पाठानां सस्वरं लेखनम् | २४ |
| ४. | वैदिकच्छन्दः | पिङ्गलच्छन्दसूत्रम् | -सूत्राणां पठनबोधः<br>-गायत्र्यादिच्छन्दसां सोदाहरणमर्थबोधः | -सूत्राणां सोदाहरणमर्थकथनं लेखनञ्च<br>-वैदिकच्छन्दसां भेदोपभेदनिरूपणम् | २४ |
| ५. | शब्दार्थज्ञानम् | पारिभाषिकशब्दार्थज्ञानम् | पारिभाषिकशब्दार्थबोधः | वैदिकपारिभाषिकशब्दार्थनिर्वचनम् लेखनञ्च | १२ |
| ६. | वैदिकवाङ्मयम् | वेदवेदाङ्गस्वरूपज्ञानम् | वेदवेदाङ्गशास्त्राणां स्वरूपबोधः | वेदवेदाङ्गशास्त्राणां स्वरूपनिरूपणम्<br>वेदवेदाङ्गशास्त्राणां स्वरूपलेखनम् | २४ |
| प्रयोगात्मकोऽभ्यासः | | | | | ४० |
| योगः | | | | | १६० |

## पाठ्यवस्तुविवरणम्

### प्रकरणम् १

सामवेदस्य अरण्येगेयगानस्य लक्ष्मीसूक्त-अर्कपर्व-द्वन्द्वपर्व-व्रतपर्व-शुक्रियपर्वगतानां निम्नाङ्कितगानमन्त्राणां सस्वरं कण्ठस्थीकरणम् ।

**लक्ष्मीसूक्तम्-**

अष्टौ वैरूपाणि, ह्रस्वावैरूपम्, पञ्चनिधनम् वैरूपम्, षण्णिधनं वैरूपम्, सप्तनिधनं वैरूपम्, अष्टानिधनं वैरूपम्, द्वादशनिधनं वैरूपम्, पुष्यम् वैरूपम् ।

**अर्कपर्व-**

बृहत्साम, वरुणगोतमयोरर्कः, ज्येष्ठसाम आज्यदोहम्, ईनिधनमाज्यदोहम्, ऋतनिधनमाज्यदोहम्, रुद्रस्य त्रय ऋषभाः, त्रिसन्धिः, वशिष्ठस्य रथन्तरम्, पञ्च पविमन्ति महासामानि, अग्नेश्च प्रियम्, सेतुसाम ।

**द्वन्द्वपर्व-** यशः, आयुर्नवस्तोभम्, शुक्रसाम, चन्द्रसाम ।

**व्रतपर्व-**वाचो व्रतम्, सत्रस्यर्द्धिः साम, कृष्णव्रतम्, रौहिणम्, देवव्रतम् (३) पुरुषव्रतम् (६), दिशां व्रतम्, तृतीयमनुगानम्, प्रजापतेर्हृदयम्,

**शुक्रियपर्व-** अग्नेव्रतम्, वायोर्व्रतम्, वैश्वानरो बृहती वैश्वानरः (ओऽ३१म्) सूर्यस्य भ्राजाभ्राजे द्वे (२) ग्रीवानाम द्वितीयमनुगानम्, ऊरुनाम नवमानुगानम्, एकविंशत्यनुगाने आदित्यव्रतम् , सर्पस्य घर्मरोचनम्, वागादिपित्र्यं साम, आदित्यस्यात्मा, महानाम्न्यः (१) ।

**प्रकरणम् २**

**सामवेदसंहिताया उत्तरार्चिकगतानां १-३ अध्यायपठितानां निम्नाक्तितानां स्तोत्राधारभूतानाम् ऋङ्मन्त्राणामध्ययनम्-**

उपास्मै गायत, अभिते मधुना, स नः पवस्व, इन्द्रमग्निम्, सन इन्द्राय, दुहान ऊधर्दिव्यम्, प्रतुद्रव परिकोशम्, स्वायुधः पवते, ऋषिर्विप्रः, न यं दुघ्ना, ऊर्जो नपातम्, पुरुहुतं पुरुष्टुतम्, इन्द्र इन्नः, शंसेदुक्थम्, त्वन्न इन्द्र, नघे मन्यदा, इच्छन्ति देवाद्य, यस्मिन् विश्वा, त्रिकद्रुकेषु, शाचिगो शाचि, यस्ते शृङ्गवृषः, विद्मा हि त्वा, मा त्वा मूरा, इहत्वा गोपरीणसम्, नृभिर्धौतः, सघानो योगः, अनुप्रत्नस्य, आघा गमत्, सप्रथमे व्यामनि, तमु हुवे, उदुस्त्रियाः, इमा उवां दिविष्टय, युवं चित्रं ददथुः, अयं सूर्य इव, अयं विश्वानि, एष प्रत्नेन जन्मना, दुहानः प्रत्नम्, उप शिक्षापतस्थुषः, उपोषु जातम्, अभिद्रोणानि, सुता इन्द्राय वायवे, प्रसोम देववीतये, आ हर्यतः, आदीं हंसः, आदीं त्रितस्य, अया पवस्व, देवयू, पवते हर्यतः, प्रसुन्वानाय, पवस्व वाचः, त्वं समुद्रिया, तुथ्येमा भुवना, यस्य ते सख्ये, या ते भीमानि, अश्वो न चक्रदः, वृषा ह्यसि, आ पवस्व सुवीर्यम् , मित्रं वयं हवामहे, वरुणः प्रविता, ता वां गीर्भिः, रसाय्यः पयसा, एवा पवस्व मदिरः, शतानीकेव, त्वामिदा ह्यः, मत्वा सुशिप्रम् , अयं पुनानः उषसः, इन्द्रं विश्वा, पूर्वीरिन्द्रस्य ।

**प्रकरणम् ३**

**ऊहगानस्य ं दशरात्रपर्वपठितानां निम्नाक्तितानां स्तोत्रगानानामध्ययनम्-**

आमहीयवम्, रौरवम्, यौधाजयम्, औशनम्, वामदेव्यम्, नौषधम्, कालेयम्, संहितम्, पौष्कलम्, यज्ञायज्ञीयम्, सौभरम्, काण्वम्, आकूपारम्, आर्षभम्, सौमेधम्, कौत्सम्, सोमसाम, गौतमम्, ऐडमायास्यम् ।

**प्रकरणम् ४**

पिङ्गलच्छन्दःसूत्रस्य वैदिकप्रकरणे (१.१-४.७) समुक्तानां गायत्री-उष्णिग्-अनुष्टुब्-बृहती-पङ्क्ति-त्रिष्टुभ्- जगती-अतिजगती-शक्वरी-अतिशक्वरीणां छन्दसां भेदोपभेदज्ञानम्, गणबोधकसूत्रार्थज्ञानम्, गायत्र्यादिच्छन्दसामक्षरवृद्धि-क्षयादिसूत्रार्थज्ञानम्, उत्कृतिच्छन्दोभेदज्ञानञ्चेति ।

**प्रकरणम् ५**

**वक्ष्यमाणानां वैदिकपरिभाषिकशब्दानां प्राकरणिकमर्थज्ञानम्-**

अग्निष्टोमः, अग्निहोत्रम्, अथर्वन्, अथर्ववेदः, अध्वर्युः, अनुवाकः, अभ्रिः, अरणिः, अर्थवादः, अष्टकः, आगमः, आचार्यः, आम्नायः, आरण्यकम्, आरण्यकज्ञानम्, आसन्दी, इडापात्री, इष्टिः, उत्तरार्चिकम्, उद्गाता, उदूहः, उद्गीथः, उपगाता, उपनिषद्, उपवेदाः, उपवेषः (धृष्टिः), उपाङ्गानि, ऊहगानम्, ऊह्यगानम्, ऋक्, ऋग्वेदः, ऋत्विक्, ऋषिः, कण्डिका, कपालानि, कल्पः, कुशा, क्रमपाठः, क्षलाक्षरम्, गृह्यसूत्रम्, ग्रहः, चमसः, छन्दः, छन्दोमः, जुहूः, ज्योतिषम्, त्रयी, दर्शपूर्णमासौ, दशतिः, धर्मसूत्रम्, ध्रुवा, निगमः, निघण्टुः, निरुक्तम्, निर्वचनम्, निदानसूत्रम्, निधनम्, पदपाठः, परिशिष्टम्, पितृमेधः, पुराणम्, पूर्णपात्रम्, प्रकृतिपाठः, प्रणीता, प्रपाठकः, प्रमन्थः, प्रस्तावः, प्रातिशाख्यम्, प्राशित्रहरणम्, ब्रह्मा (ऋत्विक्), ब्राह्मणम्, भक्तिः, भाष्यम्, मण्डलम्, यजुः, यजुर्वेदः, यागः, यूपः, रोहः, वृद्धः, वेदाङ्गानि, शिक्षा, श्रुतिः, श्रौतम्, श्रौतसूत्रम्, संहिता, सामन्, सामवेदः, सूक्तम्, सोमयागः, स्तोत्रम्, स्तोभः, स्फ्यः, स्मार्तम्, स्रुवः, स्वरमण्डलम्, होता चेति

संहत्य नवतिः (९०) शब्दाः ।

**प्रकरणम् ६**

(क) वेदस्वरूपसम्बद्धा वक्ष्यमाणविषयाः-

१. वेदलक्षणम्

२. वेदवाचकाः शब्दाः

३. वेदस्य भागद्वयम्- मन्त्रसंहिता, ब्राह्मणञ्च

४. मन्त्रब्राह्मणयोः सम्बन्धः

५. ऋग्यजुःसामाथर्वशब्दार्थाः

६. त्रयीशब्दस्य तात्पर्यम्

७. वेदचातुर्विध्यम्

८. शाखापदार्थः

९. वेदचतुष्टयस्योपलभ्यमानाः शाखाः, ।

(ख) वेदाङ्गस्वरूपसम्बद्धा वक्ष्यमाणविषयाः-

१. शिक्षाशास्त्रपरिचयः (लक्षणम्, प्रयोजनञ्च)

२. प्रातिशाख्यपरिचयः (प्रयोजनं, मुख्यं प्रतिपाद्यं च)

३. कल्पशास्त्रपरिचयः (विभागः, प्रयोजनञ्च)

४. व्याकरणशास्त्रपरिचयः (लक्षणम्, प्रयोजनञ्च)

५. निरुक्तपरिचयः (प्रयोजनम्, स्वरूपम्, निघण्टु-निरुक्तयोर्विभागश्च)

६. छन्दःपरिचयः (छन्दश्शब्दार्थः, छन्दःशास्त्रप्रयोजनञ्च)

७. वेदाङ्गज्योतिषपरिचयः ।

**५. प्रयोगात्मककार्यं परियोजनाकार्यञ्च**

| क्र.सं. | क्षेत्रम् | परीक्षणीयाः पक्षाः | अङ्क भारः | मूल्याङ्कनाधाराः |
|---|---|---|---|---|
| १. | शिक्षण- सहभागिता | (क) उपस्थितिः<br>(ख) सहभागिता | ३ | विद्यार्थिनां दैनिकोपस्थितेरभिलेखः<br>कुण्डमण्डपनिर्माण-स्वरवर्णोच्चारण-सामसंहितापाठ-सस्वरसामगानपाठ- वैदिकच्छन्दःप्रयोगादिविषये मनन-चिन्तन-प्रश्नोत्तर-समूहविमर्शनादि-कक्षागतशिक्षण- सहभागिता |
| २. | कक्षाकार्यं परियोजना-कार्यं वा | कक्षाकार्यं परियोजनाकार्यं वा | ६ | शब्दार्थज्ञान-वैदिकवाङ्मय-चरित्र-गानसम्बद्धा मौखिकी च प्रस्तुतिः,<br>कुण्डमण्डपनिर्माण-स्वरवर्णोच्चारण-सामसंहितापाठ-सस्वरसामगानम् ।<br>गानपाठ-वैदिकच्छन्दःप्रयोगसम्बद्धा मौखिकी प्रस्तुतिः, प्रश्नोत्तरलेखन-विमर्श-तात्पर्यस्फुटीकरणञ्च ।<br>गृहकार्यं कक्षाकार्यं वा<br>अधीतानां विषयाणामनुसरणं दैनन्दिनव्यवहारे प्रदर्शनम् |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | (क) बोधः | ५ | रतचरित्राणां देशकाल-चरितादिविषये सङ्क्षिप्तविवरणप्रदानम् |
| | | (ख) अभिव्यक्तिः | ५ | कुण्डमण्डपनिर्माणप्रक्रियाकथनपुरस्सरं सम्बद्धपद्यानां स्पष्टवाचनम्<br>नारदीयशिक्षाया निर्धारितविषयाणामध्ययनम्,<br>सामवेदकौथुमसंहिता-अरण्येगेयगान-सामवेदोत्तरार्चिक- संहिता-ऊहगानसम्बद्धानां निर्धारितगानानां ससम्प्रदायं पाठाभ्यासः ।<br>वैदिकच्छन्दसां सोदाहरणं भेदोपभेदकथनम्<br>वैदिकपारिभाषिकशब्दानामर्थप्रकाशनम् |

| | | | | |
|---|---|---|---|---|
| | | | | वेदवेदाङ्गशास्त्राणां स्वरूपवर्णनम् |
| ४. | त्रैमासिक- परीक्षा | मौखिकं लिखितं वा | ६ | त्रैमासिकपरीक्षायाः प्राप्ताङ्कस्यानुपातिकप्रतिशताधारेणाङ्कनिर्धारणं कर्तव्यम् |
| योगः | | | २५ | |

## ६. शिक्षणसहजीकरणप्रक्रिया

नैपालकमूल्यमान्यताऽऽदर्शानामध्ययनस्य माध्यमेन विद्यार्थिनां मौलिकसंस्कृतिसभ्यतयोर्विविधपक्षाणां ज्ञानेन सह सच्चरित्रवतां नैतिकतायुतानां च नागरिकाणां निर्माणमस्य विषयस्योद्देश्यं विद्यते । एतस्मिन् सन्दर्भे नेपालस्य सभ्यता-संस्कृति-मर्यादाऽऽदर्श- मौलिकपरम्पराप्रभृतिनैतिकसांस्कृतिकवैभवौस्सह सम्बद्धानि विविधक्षेत्राणि समाविश्य अयं पाठ्यक्रमो निर्मितोऽस्ति । एतस्मिन् समाविष्टानां विषयवस्तुनामध्यापनक्रमे सर्वेभ्यः क्षेत्रभ्यः समानं महत्त्वं प्रदातव्यं भवति । सम्बद्धविषयवस्तुनः सहजीकरणपूवर्कं ज्ञानशिल्पधारणानां विकासनमावश्यकम् । विद्यार्थिषु सैद्धान्तिकपक्षेण सह व्यावहारिकपक्षञ्च विकासस्यानुकूलचिन्तनव्यवहारयोः समुन्नयनमेतस्य विषयस्य मुख्योद्देश्यं निर्धारितं वर्तते ।

वेदविषयस्य शिक्षणोपक्रमे शिक्षकैर्वार्षिकीं दैनिकीं वा पाठयोजनाञ्च निर्माय शिक्षणसहजीकरणं कर्त्तव्यम् । सोद्देश्यं छात्राणां पाठश्रवणस्य पाठमननस्य पाठ्यविषयान्तर्गतानां विविधपक्षाणां नैसर्गिकप्रतिभया चिन्तनपूर्वकं प्रश्नोत्तरलेखनस्य शिल्पविकासाय शिक्षकैर्दत्तचित्तैः प्रेरणादैश्च भवितव्यम् । कक्षायां विषयानुसारेण प्रश्नोत्तर-लेखन-प्रयोगाभ्यास-विमर्शादिकार्ये शिक्षकैरेवच्छात्राः प्रेरयितव्याः । पाठ्यविषयाणां पाठ्यवस्तूनां वा प्रकृत्यनुसारमेव चिन्तन-मनन-अभ्यास-प्रश्नोत्तरलेखनादिकार्ये शिक्षकैरेवच्छात्राः प्रेरणीयाः ।

शिक्षणसहजीकरणप्रक्रियायां सुखासनस्थितिपूर्वकं गुरुमुखोच्चारणानूच्चारणानुकूलोच्चारणम्, समूहोच्चारणम्, प्रश्नप्रतिप्रश्नकरणम्, श्यामश्वेतपट्टाङ्कनम्, श्रव्यदृश्योपकरणप्रयोगः, हस्तस्वरप्रदर्शनम्, मुखस्वरोच्चारणम्, एकैकोच्चारणम्, अर्थापनम्, व्याख्यानम्, अन्वयकरणम्, पर्यायशिक्षणम्, भावार्थप्रकाशनम्, मन्त्र-श्लोकोच्चारणानुशिक्षणं कर्त्तव्यम् । सम्बद्धपरिभाषिकशब्दप्रयोगं विधाय तेषां लाक्षणिकविषयवस्तुबोधे सान्वयं सोदाहरणं छात्राः प्रशिक्षणीयाः । शिक्षकैः शिक्षणकार्ये विषयवस्तूनां सामान्यपरिचयमुद्देश्यकथनं प्रस्तुतिविधिञ्च बोधयित्वा छात्रेभ्यस्तत्सम्बद्धं कक्षाकार्यं गृहकार्यञ्च प्रदेयम् । अधोलिखितानामभ्यासप्रधानानां सिर्जनात्मकानाञ्च क्रियाकलापानां सम्पादनमावश्यकं भवति-

(क) प्रस्तुतिकरणम्  (ख) अभ्यासः  (ग) उत्पादनम्  (घ) पठनबोधः

(ङ) प्रयोगात्मककार्यम्  (च) पृष्ठपोषणम्  (छ) आत्ममूल्याङ्कनम्

## ७. विद्यार्थिमूल्याङ्कनम्

विद्यार्थिनां शिक्षणोपलब्धिं सुनिश्चेतुं निर्माणात्मकं निर्णयात्मकञ्चोभ्यप्रकारकमेव मूल्याङ्कनं विधातव्यं भवति । विद्यार्थिनां शिक्षणोपलब्धे, सुधाराय कक्षाशिक्षणस्यैव क्रमे कक्षाकार्य-परियोजनाकार्य-प्रस्तुतीकरणोपलब्धिपरीक्षासदृशान् क्रियाकलापान् कारयित्वा सैद्धान्तिक- ज्ञानशिल्पयोरवाप्तिरावश्यकी । एतत्कार्यस्य प्रभावकारिरूपेण क्रियान्वयनाय, विद्यार्थिनां शिक्षणस्तरस्य सुधाराय च सहजीकरणक्रियाकलापस्य अभिन्नाङ्गस्य रूपेण निर्माणात्मकमूल्याङ्कनमुपयोक्तव्यम् । निर्माणात्मकमूल्याङ्कनस्य शिक्षणोपलब्धे- र्निश्चितभारो निर्णयात्मकमूल्याङ्कनेऽपि संयोज्यते ।

पाठ्यक्रमेण निर्धारितस्योद्देश्यस्यानुरूपं विद्यार्थिनो ज्ञान-शिल्पाभिवृत्तीः प्राप्नुवन्नवेति विषयस्यान्वेषकं महत्त्वपूर्णं संयन्त्रं मूल्याङ्कनं भवति । विद्यार्थिनां मूल्याङ्कनं शिक्षणोपलब्धीर्ध्यात्वा सक्षमतां शिक्षणोपलब्धीनाञ्चानुरूपं शिक्षणस्य सर्वान् स्तरान् समाविश्य विधातव्यम् । आन्तरिकबाह्यमूल्याङ्कनयोर्माध्यमेन एतस्य विषयस्य मूल्याङ्कनं विधीयते । मूल्याङ्कनस्य समग्रभारतः पञ्चविंशतिप्रतिशतमान्तरिकं पञ्चसप्ततिप्रतिशतं बाह्यञ्च मूल्याङ्कनं विधीयेते । एवमेव बाह्यमूल्याङ्कनस्यान्तर्गतं लिखितपरीक्षा सञ्चाल्यते । विद्यार्थीमूल्याङ्कनस्यान्तर्गतं निर्माणात्मकं निर्णयात्मकञ्च मूल्याङ्कनं पद्धतिद्वयेनैव क्रियते । अस्य विषयस्य पाठ्यक्रमे समाविष्टानां स्तरगतसक्षमतानाम्, कक्षागतशिक्षणेपलब्धीनाम्, तासां विषयवस्तूनाम्, तैस्सह सम्बद्धस्य शिल्पस्य, शिक्षण सहभागितायाः

शिक्षणसक्रियतायाश्चाधारेषु विद्यार्थिनां शिक्षणस्य मूल्याङ्कनं विधातव्यम् ।

विद्यार्थिनामस्य स्तरस्य मूल्याङ्कनं अक्षराङ्कनपद्धत्या विधीयते । मूल्याङ्कने निर्माणात्मकी निर्णयात्मिकी च प्रक्रिया अवलम्ब्यते । छात्राणां स्तरगतसामर्थ्योपलब्धये विधातव्यैरध्ययनभ्रमणघटनावलोकन-सर्जनकार्यवैयक्तिक-सामूहिकविमर्शनलिखित-परीक्षाप्रत्युत्पन्नमति-प्रदर्शन- प्रश्नोत्तरण-कक्षाकार्यपरीक्षण-व्यवहारप्रभृतिकार्यैर्निर्माणात्मकं मूल्याङ्कनं विधीयते, येन अविच्छिन्नं मूल्याङ्कनं सम्पद्यते । स्वरगतसामर्थ्योपलब्धये कक्षागत-सामर्थ्योपलब्धये च शैक्षिकसत्रस्यान्तेऽन्तिमपरीक्षाया माध्यमेन निर्णयात्मकमूल्याङ्कनं सम्पाद्यते । विद्यार्थिषु पाठ्यवस्तुबोधादर्शचरित्रनिर्माण-मानवीयमूल्य-मान्यतावलम्बन -संस्कारसंरक्षणप्रयोगाभ्यास- प्रभृतिविषयाणां विकासो मूल्याङ्कनस्य मूलाधारो मन्यते । मूल्याङ्कनप्रक्रियां विश्वसनीयां विधिसम्मताञ्च सम्पाद्य एकरूपतामानेतुं स्थानीय-प्रादेशिक-राष्ट्रियस्तरेषु बाह्यसार्वजनिकपरीक्षणविधौ सर्वेषु विषयेषु आन्तरं बाह्यं च मूल्याङ्कनं विधीयते । सार्वजनिकपरीक्षणे प्रतिविषयं प्रतिशतं पञ्चविंशत्याः अङ्कानां कृते आन्तरं परीक्षणं, प्रतिशतं पञ्चसप्तत्याः अङ्कानां कृते बाह्यं परीक्षणञ्च विधीयते । आन्तरं मूल्याङ्कनं सम्बद्धविद्यालयस्य शिक्षकेण विधातव्यम् । शिक्षणप्रक्रियया सहैव विषयवस्तुसम्बद्धं मूल्याङ्कनं नैरन्तर्येण विधेयम् । तत्र शिक्षणोपलब्धिः क्रमशः औपचारिकरूपेण अनौपचारिकरूपेण च परिमापनीया । शिक्षणसहजीकरणस्य क्रमे विद्यार्थिभिरधिगतानां ज्ञानशिल्पप्रयोगोच्चदक्षतासम्बद्धपक्षाणां मूल्याङ्कनञ्च अनिवार्यतया विधेयम् ।

**(क) आन्तरं मूल्याङ्कनम्**

शिक्षणसहजीकरणप्रक्रियया कक्षागतशिक्षणेन सहैव छात्राणामान्तरं निर्माणात्मकं वा मूल्याङ्कनमपि कर्तव्यम् । सामवेदस्य शिक्षणक्रमे छात्राणां निर्माणात्मकमूल्याङ्कनाय अधोऽङ्किता विधयोऽवलम्बयितुं शक्यन्ते-

- लिखितप्रश्नोत्तरमाध्यमेन
- मौखिकप्रश्नोत्तरमाध्यमेन
- छात्राणां परस्परविचारविमर्शमाध्यमेन

अधोलिखिताधारेणान्तरमूल्याङ्कनं कर्तव्यम् :

| **क्र.सं.** | **क्षेत्रम्** | **अङ्कभारः** |
|---|---|---|
| १. | शिक्षणसहभागिता | ३ |
| २. | कक्षाकार्यं परियोजनाकार्यं वा | ६ |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | १० |
| ४. | त्रैमासिकपरीक्षा | ६ |
| योगः | | २५ |

**(ख) बाह्यमूल्याङ्कनम्**

निर्णयात्मके बाह्ये वा मूल्याङ्कने पाठ्यक्रमे निर्धारितोद्देश्यानुरूपं छात्रैः ज्ञानम्, शिल्पमधिगतं नवेति सम्परीक्ष्य तदनुसारेण छात्राणामुत्तीर्णत्वमनुत्तीर्णत्वं वा निर्णीयते । एतादृशं मूल्याङ्कनमावधिकं भवति । शैक्षिकसत्रस्यान्त एतद् मूल्याङ्कनं विधीयते ।

**अधोलिखिताधारेण बाह्यमूल्याङ्कनं कर्तव्यम् :**

**कक्षा ११**

| **क्र.सं** | **विषयक्षेत्रगतस्वरूपम्** | **विषयक्षेत्रम्** | **अङ्क भारः** |
|---|---|---|---|
| १. | कुण्डमण्डपनिर्माणप्रक्रियाबोधः<br>कुण्डमण्डपनिर्माणप्रक्रियालेखनम्<br>कुण्डमण्डपनिर्माणप्रक्रियाप्रकाशनम् | कुण्डमण्डपनिर्माणम् | १२ |
| | ग्रन्थनिर्दिष्टकुण्डमण्डपनिर्माणप्रयोगः | कुण्डमण्डपनिर्माणम् | ८ |
| २. | स्वरवर्णोच्चारणनियमबोधः | स्वरवर्णोच्चारणम् (नारदीयशिक्षा) | १+२ |
| | सामवेदसंहितागतमन्त्राणां निर्दिष्टस्वरवर्णोच्चारणनियम-प्रकटनम् । निर्दिष्टवर्णानां नियमानुसारेणोच्चारणम् । | स्वरवर्णोच्चारणम् (नारदीयशिक्षा) | ४ |
| | वर्णोच्चारणनियमलेखनम् । | स्वरवर्णोच्चारणम् (नारदीयशिक्षा) | ८ |
| ३. | सामवेदाध्ययने सम्प्रदायानुगत-विषयाणां बोधः<br>सम्प्रदायानुगतविषयाणां निरूपणम् । सम्प्रदायानुगत-विषयाणां लेखनम् । | गानाधारभूता ऋङ्मन्त्राः ( सामवेदसंहिता) | १२ |
| | सम्प्रदायानुगतविषयाणां निरूपणम् । सम्प्रदायानुगत-विषयाणां लेखनम् । | गानाधारभूता ऋङ्मन्त्राः ( सामवेदसंहिता) | ८ |
| ४. | गानसंहितायाः स्वरवर्णोच्चारण-नियमावबोधः । | देवादिसम्बद्धगानानि (ग्रामगेयगानम्) | २+३ |
| | स्वरवर्णोच्चारणनियमप्रकटनं लेखनञ्च । स्वरवर्णानां निर्दिष्टनियमानुसारेण समुच्चारणम् । | देवादिसम्बद्धगानानि (ग्रामगेयगानम्) | ८ |
| ५ | निर्दिष्टवैदिकचरित्राणामितिवृत्त-बोधः । | वैदिकचरित्रपरिचयः | २+१ |
| | निर्दिष्टवैदिकचरित्राणामितिवृत्तविषये संक्षिप्तविवरणप्रकटनं समुल्लेखनञ्च । | वैदिकचरित्रपरिचयः | ४ |
| योगः | | | ७५ |

**कक्षा १२**

| **क्र.सं** | **विषयक्षेत्रगतस्वरूपम्** | **विषयक्षेत्रम्** | **अङ्क भारः** |
|---|---|---|---|
| १. | सामगानाध्ययने सम्प्रदायानुगत-विषयाणां बोधः | गानपाठः (अरण्येगेयगानम्) | १+२ |
| | सम्प्रदायानुगतविषयाणां निरूपणम् । सम्प्रदायानुगत-विषयाणां लेखनम् । | गानपाठः (अरण्येगेयगानम्) | ४ |
| | सम्प्रदायानुगतविषयाणां निरूपणम् । सम्प्रदायानुगत-विषयाणां लेखनम् । | गानपाठः (अरण्येगेयगानम्) | ८ |
| २. | सामवेदसम्बद्धानां स्तोत्राणामध्ययने सम्प्रदायानुगत-विषयाणां बोधः | स्तोत्रगानपाठः (ऊहगानम्) | १+२ |

| | | | |
|---|---|---|---|
| | सम्प्रदायानुगतविषयाणां निरूपणम् । सम्प्रदायानुगत-विषयाणां लेखनम् । | स्तोत्रगानपाठः (ऊहगानम्) | ४ |
| ३. | सामवेदोत्तरार्चिकाध्ययने सम्प्रदायानुगत-विषयाणां बोधः | स्तोत्राधारर्क्पाठः (सामवेदोत्तरार्चिकसंहिता) | १+१ |
| | सम्प्रदायानुगतविषयाणां निरूपणम् । | स्तोत्राधारर्क्पाठः (सामवेदोत्तरार्चिकसंहिता) | ४ |
| | सम्प्रदायानुगत-विषयाणां लेखनम् । | स्तोत्राधारर्क्पाठः (सामवेदोत्तरार्चिकसंहिता) | ८ |
| ४. | वैदिकच्छन्दसूत्राणां पठनबोधः,<br>गायत्र्यादिच्छन्दसां सोदाहरणमर्थबोधः<br>-सूत्राणां सोदाहरणमर्थकथनं लेखनञ्च<br>-वैदिकच्छन्दसां भेदोपभेदनिरूपणम् | वैदिकच्छन्दः (पिङ्गलच्छन्दःसूत्रम्) | १६ |
| ५ | पारिभाषिकशब्दार्थज्ञानम् । वैदिकपारिभाषिकशब्दार्थबोधः । | शब्दार्थज्ञानम्, | १+१ |
| | वैदिकपारिभाषिकशब्दार्थनिर्वचनं लेखनं च | शब्दार्थज्ञानम्, | ४ |
| ६ | वेदवेदाङ्गस्वरूपज्ञानम् । | वैदिकवाङ्मयम् | १ |
| | वेदवेदाङ्गशास्त्राणां स्वरूपबोधः । | वैदिकवाङ्मयम् | ८ |
| | वेदवेदाङ्गशास्त्राणां स्वरूपलेखनम् | वैदिकवाङ्मयम् | ८ |
| योगः | | | ७५ |

# ऋग्वेदः

कक्षा : ११ र १२ विषयसङ्केतः **Rib** ५०५(कक्षा ११), **Rib** ५०६ (कक्षा १२)

पाठ्यघण्टा : ५ वार्षिककार्यघण्टा : १६०

## १. परिचयः

ऋग्वेदस्य एष पाठ्यक्रमः ऋग्वेदस्य शाकलशाखान्तर्गतानां विषयाणां सैद्धान्तिकानां व्यावहारिकाणाञ्च पक्षाणामध्ययनाध्यापनयोरुद्देश्येन विकसितो वर्तते । एतदर्थं २०७६ विक्रमवर्षस्य राष्ट्रियपाठ्यक्रमप्रारूपस्य मार्गदर्शनानुसारेण विद्यालयशिक्षाया माध्यमिकस्तरे (एकादशद्वादशकक्षयोः) ऋग्वेदस्य समावेशाय एतस्मिन् पाठ्यक्रमे अत्यावश्यकीयसमग्रवैदिकवाङ्मयस्य सङ्क्षिप्तज्ञानप्रदायकविषयाणाम्, ऋग्वेदातिरिक्तं विविधानां रुचिकराणामुत्साहवर्धकविषयाणाञ्च बोधो ज्ञेयविषयाणामभिव्यक्तिसामर्थ्यञ्च छात्रेषु स्यादिति बोधाभिव्यक्त्योरुल्लेखोऽपि विहितो विद्यते । एतस्मात् पाठ्यक्रमाद् वर्तमानसन्दर्भे ऋग्वेदस्य व्यावहारिकपक्षं सन्दर्श्य विद्यार्थिनां रुचिं प्रपूर्य शिक्षाया राष्ट्रियोद्देश्यञ्च प्राप्स्यते । अतोऽस्य सान्दर्भिकतां विस्तार्य उपयुक्तता सुनिश्चितता च विधास्यत इत्यपेक्षितमस्ति । अनेन पाठ्यक्रमेण सम्बद्धविषय उच्चशिक्षाया आधारोऽपि निर्मात्स्यत इति चाशास्यते ।

ऋग्वेदस्य पाठ्यक्रमे ऋग्वेदीय-शाकलसंहितायाश्चतुर्थमण्डलादारभ्य दशममण्डलपर्यन्तानां निर्दिष्टसूक्तगतर्चा-मृग्वेदस्य परम्परागतशैल्या सस्वरवाचनम्, ऋग्वेदस्यैव शाकलसंहिताया पुरुषसूक्तगतर्चां संहिता-पदक्रमपाठपुरस्सरं यथासम्भवं जटाद्यष्टविकृतिपाठाः, मण्डपकुण्डसिद्धिः, पिङ्गलच्छन्दःसूत्रस्य वैदिकप्रकरणम्, विश्वामित्र-वशिष्ठप्रभृतयोर्मन्त्रद्रष्टर्षय आपस्तम्ब-आश्वलायनप्रभृतयः सूत्रकाराः, पैल-वैशम्पायन-व्यास-पाणिनि-प्रभृतय आचार्याः, सायण-महीधरप्रभृतयो भाष्यकाराश्चेत्येतेषां प्राचीन-चरित्राणां परिचयसम्बद्धविषयाः, वैदिकपारिभाषिकशब्दाः, वेदवेदाङ्गग्रन्थानां स्वरूप-प्रयोजन-परिचयादिसम्बद्धा विषयाः, वेदवेदाङ्गशास्त्रसम्बद्धानां प्रमुखग्रन्थानां स्वरूपनिरूपणसम्बद्धा विषयाश्च पाठ्यविषयत्वेन निर्धारिताः सन्ति । अतोऽस्य पाठ्यक्रमस्याध्ययनेन छात्रा ऋक्संहितायाः पारम्परिकसस्वरवाचने प्रकृतिविकृतिपाठे, याज्ञिककुण्डमण्डपादिनिर्माणप्रक्रियायाः सैद्धान्तिक-व्यावहारिकज्ञानार्जने, वैदिकच्छन्दसामक्षरसङ्ख्या-भेदोपभेदविज्ञाने, वैदिकचरित्राणां परिचयप्रदाने, वैदिकपारिभाषिकशब्दानामर्थबोधे, वेदवेदाङ्गशास्त्राणां ग्रन्थानाञ्च स्वरूपज्ञाने समर्था भविष्यन्तीति शीर्षकान्तरे पृथक्-पृथग् विवरणं समुल्लिखितं वर्तते ।

एतस्मिन् क्रमे पाठ्यक्रमलेखनस्य विकासस्य च विषयगतौचित्यम्, पाठ्यक्रमे विद्यमानमुख्यविशेषताः, पाठ्यक्रमस्य स्वरूपञ्च संयोज्य परिचयं, विषयगतरूपेणापेक्षितं ज्ञानम्, शिल्पम्, अभिवृत्तिम्, मूल्यम्, कार्यतत्परताञ्च निश्चित्य एतस्याः क्रियात्मकस्वरूपे योग्यताम्, शिक्षणस्य स्तरम्, क्षमताया विशिष्टीकृतविस्तृतीकरणेन शिक्षणोपलब्धिम्, पूर्वकक्षाभिस्सह लम्बीयसन्तोलनस्याधारे विषयवस्तुनः क्षेत्रक्रमौ, विषयगतविशिष्टतामौलिकते शिक्षणसहजीकरणस्य विधिं प्रक्रियाम्, निर्माणात्मकनिर्णयात्मकमूल्याङ्कनयोर्विधिं प्रक्रियाञ्चोल्लिख्य विद्यार्थिमूल्याङ्कनं व्यवस्थितं वर्तते ।

## २. स्तरगतयोग्यताः

**अस्य स्तरस्याध्ययनानन्तरं छात्रा अधोनिर्दिष्टेषु विषयेषु निपुणा भविष्यन्ति :**

१. दिक्साधन–द्वारमण्डपस्तम्भतोरणमान कुण्डमण्डपनिर्माणविषयकप्रक्रियावबोधे, अभिव्यक्तौ च ।

२. ऋग्वेदशाकलसंहिताध्ययनसम्बद्धानां सम्प्रदायानुगतविषयाणां बोधे, अभिव्यक्तौ च ।

३. ऋग्वेदशाकलसंहितागतनिर्दिष्टभागस्य यथानियमं सस्वरवाचने, शुद्धोच्चारणे, लेखने च ।

४. संहिता-पद-क्रमसहितानां जटाद्यष्टविकृतीनां पाठनियमावबोधे, अभिव्यक्तौ च ।

५. निर्दिष्टवैदिकचरित्राणामितिवृत्तबोधे तेषां पृथक्–पृथग्रूपेण परिचयप्रदाने, पठने, लेखने च ।

६. वैदिकच्छन्दसामक्षरसङ्ख्या–भेदोपभेदविज्ञाने, अभिव्यक्तौ च ।

७. ऋग्वेदीयशाकलशाखानुगतनियमानुरूपं पाठ्यक्रमनिर्दिष्टानामृचां हस्तसञ्चालनपूर्वकं सस्वरवाचने, लेखने च ।

८. निर्दिष्टवैदिकपारिभाषिकशब्दानामर्थावबोधे, अभिव्यक्तौ च ।

९. वेदवेदाङ्गशास्त्राणां वेदवेदाङ्गग्रन्थानां च स्वरूपावबोधे, अभिव्यक्तौ च ।

**३. कक्षागतशिक्षणोपलब्धयः**

**कक्षा ११**

**(क) श्रवणभाषणशिल्पम्**

१. प्रकरणनिर्दिष्टानामृग्वेदीयसूक्तगतर्चां यथानियमं गुरोर्मुखात् श्रवणं तत्पश्चात् शुद्धोच्चारणम् ।

२. प्रकरणनिर्दिष्टग्रन्थान्तर्गतानां पद्य-गद्यसूत्राणां पुरुषसूक्तगतर्चां च यथानियमं श्रवणं तदन्तरं शुद्धोच्चारणम् ।

३. पदपाठ-क्रमपाठ-क्रमजटापाठ-क्रममालापाठ-क्रमशिखापाठ-क्रमरेखापाठ-क्रमध्वजपाठ-क्रमदण्डपाठ-क्रमरथपाठ-घनपाठसम्बद्धानां नियमानां सोदाहरणं पृथक् पृथक् श्रवणम् ।

४. अष्टविकृतिपाठानां पृथक् पथक् सोदाहरणं सस्वरमुच्चारणम्

५. प्रकरणनिर्दिष्ट ग्रन्थान्तर्गतानां विषयाणां श्रवणानन्तरं तदनुरूपं विषयविवरणकथनम् ।

**(ख) पठनशिल्पम्**

१. प्रकरणनिर्दिष्टानामृग्वेदस्य सूक्तगतर्चां यथानियमं सस्वरं पठनम् ।

२. निर्दिष्टपद्य–गद्य–सूत्रगतविषयाणां व्याख्योदाहरणसहितं बोधपूर्वकं पठनम् ।

३. ऋक्संहितायाः पुरुषसूक्तगतर्च आहत्य संहिता–पद–क्रमरूपाणां प्रकृतिपाठानाम्, जटा–माला–शिखा–रेखा–ध्वज–दण्ड–रथ–घनरूपाणां विकृतिपाठानां चाभ्यासार्थं पठनम् ।

४. निर्दिष्टचरित्राणमितिवृत्तज्ञानपुरःसरं पठनम् ।

**(ग) लेखनशिल्पम्**

१. प्रकरणनिर्दिष्टानामृग्वेदीयविशेषसूक्तगतर्चां सस्वरं स्वरनिर्देशपूर्वकं वा सशुद्धिलेखनम् ।

२. निर्दिष्टपद्य–गद्य–सूत्रगतविषयाणां व्याख्योदाहरणसहितं लेखनम् ।

३. निर्दिष्टचरित्राणामितिवृत्तं यथाशास्त्रं लेखनम् ।

४. पुरुषसूक्तगतर्चां प्रकृतिविकृतिपाठानुसारं सशुद्धिलेखनम् ।

५. पठितविषयाणां प्रश्ननिर्माणमुत्तरलेखनञ्च ।

**कक्षा १२**

**(क) श्रवणभाषणशिल्पम्**

१. ऋग्वेदस्य शाकलशाखायाः दशममण्डलगतनिर्दिष्टर्चां यथानियमं गुरोः सकाशात् श्रवणम्, तत्पश्चाद् शुद्धोच्चारणञ्च ।

२. प्रकरणनिर्दिष्टग्रन्थान्तर्गतानां ऋक्-सूत्र-शब्द-विषयाणां सम्यक् श्रवणम्, शुद्धोच्चारणञ्च ।

**(ख) पठनशिल्पम्**

१. ऋग्वेदशाकलसंहितायाः दशममण्डलगतनिर्दिष्टर्चां स्वरनिर्देशपूर्वकं पठनम् ।

२. पिङ्गलच्छन्दःसूत्रगतसूत्राणां व्याख्योदाहरणसहितं बोधपूर्वकं पठनम् ।

३. वैदिकच्छन्दसामक्षरसङ्ख्या-भेदोपभेदविज्ञानपुरःसरं पठनम् ।

४. वेद–वेदाङ्गशास्त्राणां स्वरूपावबोधाय सन्दर्भग्रन्थगतनिर्दिष्टभागस्य बोधपूर्वकं पठनम् ।

५. वैदिकपारिभाषिकशब्दानामर्थबोधपूर्वकं पठनम् ।

(ग) **लेखनशिल्पम्**

१. ऋग्वेदस्य शाकलशाखायाः दशममण्डलगतनिर्दिष्टर्चां स्वरनिर्देशपूर्वकं लेखनम् ।

२. पिङ्गलच्छन्दःसूत्रगतसूत्राणां व्याख्योदाहरणसहितं बोधपूर्वकं लेखनम् ।

३. वैदिकच्छन्दसामक्षरसङ्ख्या–भेदोपभेदविज्ञानपुरःसरं लेखनम् ।

४. वैदिकपारिभाषिकशब्दानामर्थबोधपूर्वकं लेखनम् ।

५. वेद–वेदाङ्गशास्त्राणां स्वरूपावबोधाय सन्दर्भग्रन्थगतनिर्दिष्टभागस्य बोधपूर्वकं लेखनम् ।

६. पठितविषयाणां प्रश्ननिर्माणपुरःसरं तदुत्तरलेखनञ्च ।

**४. विषयक्षेत्रं क्रमश्च**

**कक्षा ११**

| क.सं. | विषयाः | प्रकरणानि | बोधाः | अभिव्यक्तयः | घण्टाः |
|---|---|---|---|---|---|
| १ | मण्डपकुण्डसिद्धिः | कुण्डमण्डपनिर्माणम् | कुण्डमण्डपनिर्माणप्रक्रियाबोधः | कुण्डमण्डपनिर्माणप्रक्रियाप्रकाशनम् ।<br>कुण्डमण्डपनिर्माणप्रक्रियालेखनम् ।<br>ग्रन्थनिर्दिष्टकुण्डमण्डपनिर्माणप्रयोगः । | ३० |
| २ | ऋग्वेदसंहितायाः ४-६ मण्डलगतर्चः | विविधशस्त्रपाठर्चः | ऋग्वेदपरम्परानुगतर्चां यथानियमं शुद्धोच्चारणप्रक्रियाबोधः | ऋग्वेद-संहितागतनिर्दिष्टर्चां सस्वरवाचनम् ।<br>निर्दिष्टर्चां सस्वरलेखनम् | २२ |
| ३ | ऋग्वेदसंहितायाः ७-८ मण्डलगतर्चः | शान्तिदेवादिसम्बद्धर्चः | ऋग्वेदपरम्परानुगतर्चां यथानियमं शुद्धोच्चारणप्रक्रियाबोधः | ऋग्वेद-संहितागतनिर्दिष्टर्चां सस्वरवाचनम् ।<br>निर्दिष्टर्चां सस्वरलेखनम् | १९ |
| ४ | ऋग्वेदसंहितायाः ९ मण्डलगतर्चः | पवमानमण्डलगतर्चः | ऋग्वेदपरम्परानुगतर्चां यथानियमं शुद्धोच्चारणप्रक्रियाबोधः | ऋग्वेद-संहितागतनिर्दिष्टर्चां सस्वरवाचनम् ।<br>निर्दिष्टर्चां सस्वरलेखनम् | १९ |
| ५ | जटाद्यष्टविकृतिज्ञानम् | अष्टविकृतिपाठः | जटाद्यष्टविकृतीनां स्वरूपबोधः<br>जटाद्यष्टविकृतिपाठनियमबोधः | जटाद्यष्टविकृतीनां स्वरूपप्रकाशनम् ।<br>जटाद्यष्टविकृतीनां पाठनियम-प्रकटनम् । | १९ |
| ६ | वैदिकचरित्रपरिचयः | चरित्रपरिचयः | निर्दिष्टवैदिकचरित्राणामितिवृत्तबोधः | निर्दिष्टवैदिकचरित्राणामितिवृत्तविषये सङ्क्षिप्तविवरणप्रकटनं समुल्लेखनञ्च । | ११ |

| | |
|---|---|
| सैद्धान्तिकाभ्यासः | १२० |
| प्रयोगाभ्यासः | ४० |
| योगः | १६० |

कक्षा ११

**पाठ्यवस्तुविवरणम्**

**प्रकरणम् १**

कुण्डमण्डपनिर्माणम् (मण्डपकुण्डसिद्धिगतानां वक्ष्यमाणविषयाणमध्ययनम्)

ग्रन्थकर्तुः सामान्यपरिचयः, हस्तादिमानानि, दिक्साधनार्थमितिकर्तव्यता, मण्डपनिर्माणप्रकारः, द्वारादिमानानि, ध्वजारोपणप्रकारः, नवकुण्डपञ्चकुण्डैककुण्डपक्षाणां विशेषविधयः, हवनसङ्ख्यया कुण्डमानम्, कुण्डेषु योनिनिवेशनप्रकारः, चतुरस्रार्धचन्द्र–वर्तुलकुडसाधनम्, मेखलारचनाप्रकारः, स्थण्डिलविवेचनञ्चेति विषयाः ।

**प्रकरणम् २**

विविधशस्त्रपाठर्चः (ऋग्वेदसंहितायाः ४-६ मण्डलान्तर्गतानां अधोनिर्दिष्टर्चः)

**चतुर्थमण्डलस्य चतुर्थसूक्ते**

| | जटाद्यष्टविकृतीनां स्वरूपप्रकाशनम् ।<br>जटाद्यष्टविकृतीनां पाठनियमप्रकटनम् । जटाद्यष्टविकृतीनां समुच्चारणं लेखनं च । | अष्टविकृतिपाठः | ८ |
| ६ | निर्दिष्टवैदिकचरित्राणामितिवृत्तविषये संक्षिप्तविवरणप्रकटनं समुल्लेखनञ्च । | चरित्रपरिचयः | ८ |
| **योगः** | | | **७५** |

**कक्षा १२**

| **क्र.सं** | **विषयक्षेत्रगतस्वरूपम्** (पठनं लेखनञ्च) | **विषयक्षेत्रम्** | **अङ्कभारः** |
|---|---|---|---|
| १ | निर्धारितमन्त्राणां सस्वरपाठनियमावबोधः | मन्त्रपाठः | १+१ |
| | निर्दिष्टकण्डिकानां स्वरूपबोधः । | मन्त्रपाठः | ४ |
| | निर्दिष्टकण्डिकानां सस्वरं लेखनम् | मन्त्रपाठः | ८ |
| २ | निर्धारितमन्त्राणां सस्वरपाठनियमावबोधः | मन्त्रपाठः | १+१ |
| | निर्दिष्टकण्डिकानां स्वरूपबोधः । | मन्त्रपाठः | ४ |
| | निर्दिष्टकण्डिकानां सस्वरं लेखनम् | मन्त्रपाठः | ८ |
| ३ | निर्धारितच्छन्दसां सोदाहरणमर्थबोधः भेदोपभेदनिरूपणञ्च । | वैदिकच्छन्दः | १६ |
| ४ | पारिभाषिकशब्दार्थज्ञानम् । वैदिकपारिभाषिकशब्दार्थबोधः । | शब्दार्थज्ञानम् | २+३ |
| | वैदिकपारिभाषिकशब्दार्थनिर्वचनं लेखनं च | शब्दार्थज्ञानम् | १२ |
| ५ | वेदवेदाङ्गस्वरूपज्ञानम् । वेदवेदाङ्गशास्त्राणां स्वरूपबोधः । | वैदिकवाङ्मयम् | १+१ |
| | वेदवेदाङ्गशास्त्राणां स्वरूपनिरूपणम् | वैदिकवाङ्मयम् | ४ |
| | वेदवेदाङ्गशास्त्राणां स्वरूपलेखनम् | वैदिकवाङ्मयम् | ८ |
| **योगः** | | | **७५** |

# संस्कृतव्याकरणम्

**कक्षा** : ११ र १२ **विषय सङ्केत** : [SLG. 509] (**कक्षा** ११), [SLG. 510] (**कक्षा** १२)

**पाठ्यघण्टा** : ५ **वार्षिक कार्यघण्टा** : १६०

## १. परिचयः

संस्कृतव्याकरणविषयस्य पाठ्यक्रमः पाणिनीयव्याकरणाधारितविषयक्षेत्राणां सैद्धान्तिकानां व्यावहारिकाणां च पक्षाणां पठनपाठनयोरुद्देश्येन विकसितो वर्तते । एतदर्थं २०७६ विक्रमवर्षीयस्य राष्ट्रियपाठ्यक्रमप्रारूपस्य मार्गदर्शनानुसारेण विद्यालयशिक्षाया माध्यमिकरस्तरे (एकादश्यां द्वादश्याञ्च कक्षयोः) संस्कृतव्याकरणविषयस्य एतस्मिन् पाठ्यक्रमे पाणिनीयव्यारकणस्य प्रतिप्रकरणमधीतविषयाणां बोधो बुद्धविषयाणामभिव्यक्तिसामर्थ्यञ्च छात्रेषु स्यादिति हेतोर्बोधाभिव्यक्त्योरुल्लेखोऽपि विहितो विद्यते । एतस्माद् वर्तमानसन्दर्भे संस्कृतमितोऽपि व्यावहारिकं निर्माय विद्यार्थिनां रुच्यकाङ्क्षे प्रपूर्य शिक्षाया राष्ट्रियोद्देश्यं प्राप्स्यते, एतस्य सान्दर्भिकतां विस्तार्य विधाय उपयुक्तता सुनिश्चिता च विधास्यते इत्यपेक्षितमस्ति । अनेन पाठ्यक्रमेण सम्बद्धविषये उच्चशिक्षाया आधारोऽपि निर्मात्स्यते इति चापेक्षितं वर्तते ।

संस्कृतव्याकरणाध्ययनार्थं माध्यमिकस्तरे प्रवेष्टुकामानां छात्राणां संस्कृतव्याकरणस्य स्तरानुरूपेणाधारभूतक्षमताया अभिवृद्धये प्रस्तुतः पाठ्यक्रमो निर्मितोऽस्ति । पाठ्यक्रमेऽस्मिन् ११ कक्षायां सिद्धान्तकौमुद्याः प्रकरणानुसारी कारकादितश्चातुरर्थिकपर्यन्तो भागः पाठ्यांशत्वेन निर्धारितः । अत्र हि संस्कृतभाषाया वाक्यरचनायां प्रमुखभूमिकानिर्वाहकाणां कारकीयनियमानां सामासिकप्रक्रियाव्युत्पादकानां सूत्रवार्त्तिकपरिभाषादीनां तथैव तद्धितप्रकरणे विविधार्थप्रतिपादकानां प्रत्ययानां तद्विधायकसूत्रवार्तिकादीनाञ्च सङ्ग्रहः पाठ्यवस्तुत्वेन कृतोऽस्ति । विषयवस्तुनः प्रतिपादनसौकर्याय पाठ्यभाराङ्कभारादिसन्तुलनमेलनाय च कारकाध्ययनम्, अव्ययीभावादि-तत्पुरुषसमासान्तम्, बहुब्रीह्याद्येकशेषान्तम्, सर्वसमासशेषादिसमासाश्रयविध्यन्तम्, अपत्याधिकारादि-चातुरर्थिकान्तञ्चेति पञ्च प्रकरणानि परिकल्पितानि । तथैव १२ कक्षायां शैषिकादितो भावकर्मार्थान्तम्, मत्वर्थीयादितो द्विरुक्तान्तम्, तिङन्ते लकारार्थतिङां परिचयः, भ्वादिगणस्थानां भूधातोः कमुकान्तौधातुपर्यन्तम्, भ्वादिगणस्थानां शब्दार्थक-अण् धातोरारभ्य गतिवृद्ध्यर्थक-टुओश्विधातुपर्यन्तञ्चेति पञ्च प्रकरणानि परिकल्पितानि । पाठ्यक्रमेऽस्मिन् संस्कृतभाषाया वाक्यरचनायां प्रमुखभूमिका-निर्वाहकाणां कारकीयनियमानां, समस्तपदानां, तद्धितान्तपदानां तिङन्तपदानाञ्च रूपसिद्धि-प्रक्रियायामुपकारका सूत्रवार्तिकधातुकारिकादिविषयाः पाठ्यवस्तुत्वेनावचिताः सन्ति । स्तरानुसारेण छात्राणां योग्यताव्युत्पत्तिप्रवर्द्धनाय क्षमं रुचिकरं निर्दिष्टोद्देश्यपूरकञ्च विषयवस्तु, शिक्षणसहजीकरणोपायाः मूल्याङ्कनपद्धतिश्चेत्यादयो विषयाः सङ्कलय्य च स्थापिताः सन्ति ।

परिचयम्, स्तरगतसक्षमताम्, कक्षागतशिक्षणोपलब्धिम्, विषयवस्तुनः क्षेत्रक्रमौ, शिक्षणसहजीकरणप्रक्रियाम्, विद्यार्थिमूल्याङ्कनञ्च समाविश्य पाठ्यक्रमोऽसौ विकासं नीतः । एतस्मिन् क्रमे पाठ्यक्रमलेखनस्य विकासस्य च विषयगतौचित्यम्, पाठ्यक्रमे विद्यमाना मुख्यविशेषताः, पाठ्यक्रमस्य स्वरूपञ्च संयोज्य परिचयं, विषयगतरूपेणापेक्षितं ज्ञानम्, शिल्पम्, अभिवृत्तिम्, मूल्यञ्च, कार्यतत्परतां संयोज्य एतस्याः क्रियात्मकस्वरूपे सक्षमताम्, शिक्षणस्य स्तरम्, सक्षमताया विशिष्टीकृतविस्तृतीकरणेन शिक्षणोपलब्धिम्, सक्षमताम्, पूर्वकक्षाभिस्सह लम्बीयसन्तुलनस्याधारे विषयवस्तुनो क्षेत्रक्रमौ च, विषयगतविशिष्टतामौलिकते संयोज्य शिक्षणसहजीकरणस्य विधिम्, प्रक्रियाञ्च, निर्माणात्मकनिर्णयात्मकमूल्याङ्कनयोर्विधिं प्रक्रियाञ्चोल्लिख्य विद्यार्थिमूल्याङ्कनं व्यवस्थितं वर्तते ।

## २. स्तरगतयोग्यताः

**माध्यमिकस्तरे ११-१२ कक्षयोः संस्कृतव्याकरणविषयमधीत्य विद्यार्थिनो निर्दिष्टविषयेषु क्षमा भविष्यन्ति –**

१. संस्कृतभाषायाः कारकीयव्यवस्थाया अभिव्यक्तिः

२. समस्तपदानां सविग्रहरूपसिद्धिप्रक्रियाकथनलेखने

३. शब्दव्युत्पादनस्य समासतद्धितप्रक्रियागतविधीन् आश्रित्य सार्थकानेकशब्दनिर्मितिः

४. समस्तशब्दतद्धितान्तशब्दानामर्थानुरूपप्रयोगेण वाक्यनिबन्धादिरचना

५. संस्कृतभाषायास्तिङन्तक्रियापदानां रूपसिद्धिप्रक्रियाया अभिव्यक्तिः

६. तिङन्तपदानां शुद्धतया रूपावलिकथनलेखने

७. अनुवृत्तिपदाध्याहारविभक्तिविपरिणामादिविधिमनुसृत्य लक्ष्यसंस्कारोपयोगिपरिष्कृतसूत्रार्थनिष्पादनम्

८. नामपदैः सह क्रियापदस्यार्थसङ्गतिं मेलयित्वा संस्कृते वाक्यानुच्छेदनिबन्धादिरचना

९. संस्कृतभाषायां रचितायाः सामग्र्याः क्रियापदगतभाषिकाशुद्धीः संशोध्य शुद्धतासम्पादनञ्च

**३. कक्षागतशिक्षणोपलब्धिः**

**कक्षा ११**

**माध्यमिकस्तरीयायां ११ कक्षायां संस्कृतव्याकरणविषयमधीत्य छात्रा अधो निर्दिष्टविषयेषु क्षमा भविष्यन्ति -**

१. कर्तृकर्मादिकारकलक्षणनिरूपणपूर्वकं कारकोपपदविभक्त्योर्विवेकः

२. कारकीयनियमानुसारेण वाक्यरचना

३. समासस्वरूपावबोधपूर्वकं समासभेदनिर्धारणम्

४. सूत्रार्थसमन्वयपूर्वकं समस्तपदानां साधुत्वप्रकारनिर्वचनम्

५. एकशेषसमासान्तादिविधिद्वारा शब्दव्युत्पादनपूर्वकं वाक्यनिर्मितिः, तादृशशब्दोपयोगिताप्रदर्शनञ्च

६. अपत्याधिकारादिचातुरर्थिकान्ततद्धितप्रत्ययानां स्वरूपबोधपूर्वकं तेषामर्थनिर्वचनम्

७. अपत्याधिकारादिचातुरर्थिकतद्धितान्तपदानां स्थान्यादेशविवेकपूर्वकं प्रकृतिप्रत्ययविश्लेषणम्

८. अपत्याधिकारादिचातुरर्थिकान्तानां तद्धितान्तपदानां प्रत्ययेषु रूपसिद्धिप्रक्रियारूपणम्,

९. निर्दिष्टतद्धितान्तपदानामर्थानुरूपेण प्रयोगम्, पाठ्यविषयान्तर्गतानां सूत्रफक्किकाकारिकाणां व्याख्यानञ्च

**कक्षा १२**

**माध्यमिकस्तरीयायां १२ कक्षायां संस्कृतव्याकरणविषयमधीत्य छात्रा अधो निर्दिष्टविषयेषु क्षमा भविष्यन्ति-**

१. तद्धितप्रत्यायानां वैशिष्ट्यमवगत्य तेषां प्रयोगः

२. शैषिकादितो भावकर्मार्थान्ततद्धितप्रत्ययानां स्वरूपबोधपूर्वकं तेषामर्थनिर्वचनम्

३. मत्वर्थीयादितो द्विरुक्तान्तप्रकरणव्युत्पादितानां शब्दानां स्वरूपबोधपूर्वकं तेषामर्थकथनम्

४. निर्दिष्टप्रत्ययान्तपदानां प्रत्ययेषु स्थान्यादेशविवेकपूर्वकं प्रकृतिप्रत्ययविश्लेषणम्

५. निर्धारितप्रत्ययान्तपदानां रूपसिद्धिप्रक्रियानिर्वचनम्

६. व्युत्पन्नपदानामर्थानुसारेण वाक्यप्रयोगः

७. तिङन्ते लकाराणां तिङाञ्च परिचयलेखनम्, दशलकाराणां धातूनाञ्चार्थकथनम्, सकर्मकाकर्मकधातूनां वाच्यव्यवस्थाविवेकः, धातूनां परस्मैपदादिव्यवस्थाया नियमनिर्वचनञ्च

८. भ्वादिगणस्थानां भूधातोः कमुकान्तौ धातुपर्यन्तानां धातूनां ससूत्रं रूपसिद्धिप्रक्रियानिर्वचनम्

९. भ्वादिगणस्थानां शब्दार्थक-अण्धातोरारभ्य गतिवृद्ध्यर्थक-टुओश्विधातुपर्यन्तानां धातूनां प्रमुखसूत्रनिर्देशपूर्वकं रूपसिद्धिप्रक्रियाया निरूपणम्

१०. साधितक्रियापदानां प्रयोगेण वाक्यनिर्माणम्

११. सेडनिड्धातूनां परिगणनम्, पाठ्यविषयान्तर्गतानां सूत्रफक्किकाकारिकाणां व्याख्यानञ्च

## ४. विषयक्षेत्रं क्रमश्च

**कक्षा ११**

| क्र.सं. | प्रकरणानि | विषयक्षेत्रम् | बोधः | अभिव्यक्तिः | पाठ्य घण्टाः |
|---|---|---|---|---|---|
| १. | कारकाध्ययनम् | कारकलक्षणम् कारकसङ्ख्यापरिगणनम्, सम्बन्धे कारकत्वाभावः, ससम्बोधन-प्रथमा-द्वितीया-तृतीया-चतुर्थी-पञ्चमी-षष्ठी-सप्तमीविभक्तिविधायकानि सूत्रवार्तिकादीनि, कर्तृ-कर्म-करण-सम्प्रदान-अपादान-अधिकरणकारकसंज्ञाविधायकानि सूत्राणि, उपपदविभक्तिविधायकानि सूत्रवार्तिकादीनि,<br>प्रयोगसिद्धिप्रक्रिया, उभसर्वतसोः कार्या ..., दुह्याच्पच्दण्ड ..., चर्मणि द्वीपिनं हन्ति ... इत्याद्याः कारिकाः । तत्र क्रमे प्रसङ्गप्राप्तशङ्कासमाधानादिकञ्च । | कारकलक्षणपरिज्ञानम्, सम्बन्धे कारकत्वाभावावबोधः, प्रयोगेषु सूत्रार्थसमन्वयः, प्रयोगसिद्धिः प्रक्रियावबोधः, कारिकाणामर्थापनप्रकारज्ञानम्, फक्किकालापनम्,<br>कारकनियमानुसारेण विविधवाक्यनिर्माणप्रक्रियावबोधः । | कारकलक्षणनिर्वचनम्, सम्बन्धे कारकत्वाभावविवेचनम्, प्रयोगेषु सूत्रार्थसमन्वयप्रकारप्रदर्शनम्, प्रयोगसिद्धिप्रक्रियालेखनम्, सप्रसङ्गं फक्किकानिर्दिष्टविषयलेखनम्, कारकनियमानुसारेण विविधवाक्यानुच्छेदनिबन्धादि-रचनाविधानम् । | २४ |
| २ | अव्ययीभाव-तत्पुरुषसमासयो-रध्ययनम् | समाससामान्यलक्षणम्, समासवर्गीकरणाधाराः, समासभेदाः, सामर्थ्यस्वरूपम्, लौकिकालौकिकविग्रहप्रदर्शनसरणिः, उपसर्जनसंज्ञायाः कार्यवैशिष्टचम्,<br>अव्ययीभावसमासलक्षणम्, पदविधित्वम्, समासाधिकारः, अव्ययानां संज्ञाशब्दैः सह समासविधायकसूत्रवार्तिकादीनि, समासान्तटच्प्रत्यय-विधायकानि सूत्रवार्तिकादीनि,<br>तत्पुरुषसमासलक्षणम्, तत्पुरुषाधिकारः, द्विगुसंज्ञाविधायकसूत्रम्, द्वितीयान्त-तृतीयान्त-चतुर्थ्यन्त-पञ्चम्यन्त-षष्ठ्यन्त-सप्तम्यन्तानां सुबन्तैः सह समासविधायकसूत्रवार्तिकादीनि,<br>कर्मधारयसमासः, उपमानपूर्वोत्तरपदसमासः, नञ्तत्पुरुषसमासः, उपपदतत्पुरुषसमासः, मध्यमपदलोपितत्पुरुषसमासः, मयूरव्यंसकादिसमासः, प्रादिसमासः, गतिसमासश्च ।<br>समस्तशब्दसाधुत्वप्रक्रिया, तत्र | समाससामान्यलक्षणावबोधः, समासभेदपरिज्ञानम्, एकार्थीभावव्यपेक्षाभावरूप-सामर्थ्यभेदबोधः,<br>लौकिकालौकिकविग्रहनिदर्शन-प्रक्रियावबोधः, सामान्यसमासान्तर्गतानां समस्तशब्दानां साधुत्वप्रक्रियाज्ञानम्, सम्बद्धसूत्रवार्तिकार्थापन-प्रकारावबोधः ।<br>अव्ययीभावसमासलक्षणसङ्घटन-प्रकारावबोधः, सम्बद्धसूत्रवार्तिकार्थापनम्, अव्ययीभावसमासान्तर्गतायाः शब्दसाधुत्वप्रक्रियायाः परिज्ञानम्,<br>तत्पुरुषसमासलक्षणसमन्वयप्रकार-बोधः, कर्मधारयादिनिर्दिष्टसमास-प्रक्रियाया बोधः, सम्बद्धसूत्रवार्तिका-दीनामर्थापनावबोधः,<br>समस्तशब्दसाधुत्व-प्रक्रियान्वाख्यानप्रकारज्ञानम् । | सामान्यसमासलक्षण-निर्वचनम्, अव्ययीभावतत्पुरुषादि-समासानां लक्षणपर्यालोचनम्, समस्तशब्दसाधुत्वप्रकार-लेखनम्, समासभेदेन समस्तशब्देष्वर्थ-भेदनिर्धारणम्,<br>कर्मधारय-उपमानपूर्वोत्तरपद-नञ्तत्पुरुष- उपपदतत्पुरुष-मध्यमपदलोपितत्पुरुष-मयूरव्यंसकादि-प्रादि-गतिसमासप्रक्रियानिदर्शनम्,<br>समस्तशब्देषु विग्रहप्रदर्शनम्, विग्रहस्थले समुचितसमास-निर्धारणम्, समस्तशब्दप्रयोगपूर्वकं विविधवाक्यानुच्छेदनिबन्धादि-रचनाविधानम् । | २४ |

| | | | | | |
|---|---|---|---|---|---|
| | | क्रम आवश्यकानि सूत्रवार्तिकादीनि । | | | |
| ३. | बहुव्रीहिसमासाद्येकशेषान्ता-ध्ययनम् | बहुव्रीहिसमासलक्षणम्, समानाधिकरणव्यधिकरण-बहुव्रीहिसमासविधायकसूत्रवार्तिकादीनि, पुंवद्भावविधायकसूत्रम्, उपसर्जनह्रस्वत्वम्, समासान्तप्रत्ययाः, द्वन्द्वसमासलक्षणम्, चार्थनिर्वचनपूर्वकम् इतरेतरयोगस्य, समाहारस्य च लक्षणम्, पूर्वनिपातनियमाश्च, एकशेषक्षेत्रम्, सरूपाणामेकशेषः, विरूपाणामप्येकशेषः, निर्दिष्टसमासेष्वेकशेषे च लौकिकालौकिकविग्रहप्रदर्शनपुरस्सरं सम्बद्धसूत्रवार्तिकार्थनिर्वचनपूर्विका प्रयोगसिद्धिप्रक्रिया । | बहुव्रीहिसमासलक्षणबोधः, समानाधिकरणव्यधिकरण-बहुव्रीहिसमासविवेकः, पुंवद्भावस्थलविषयकज्ञानम्, लौकिकालौकिकविग्रहप्रदर्शन-पूर्वकं समस्तशब्द-साधुत्वप्रक्रियावबोधः सम्बद्धसूत्रवार्तिकार्थापनप्रकार-परिज्ञानम्, द्वन्द्वसमासलक्षणस्य लक्ष्ये समन्वयप्रकारावबोधः, समुच्चयान्वाचय-इतरेतरयोग-समाहाररूपचार्थपरिज्ञानम् , द्वन्द्वसमासेन निष्पन्नेषु शब्देषु पूर्वनिपातादिनियमावबोधः, एकशेषस्य द्वन्द्वापवादत्वज्ञानम्, तस्य प्रक्रिया-वैशिष्ट्यावगतिश्च, लौकिकालौकिकविग्रहप्रदर्शन-पूर्वकं सम्बद्धसूत्रवार्तिकार्थनिर्वचन-पूर्वकञ्च प्रयोगसिद्धिप्रक्रिया परिज्ञानम् । | बहुव्रीहिद्वन्द्वसमासयोर्लक्षण-निर्वचनम्, बहुव्रीहिसमासभेदलेखनपूर्वकं लौकिकालौकिकविग्रहप्रदर्शन-पूर्वकञ्च समस्तशब्दसाधुत्वप्रक्रिया-निरूपणम्, सूत्रवार्तिकादीनां प्रक्रियाक्रमे लक्ष्ये समन्वयप्रकारप्रदर्शनम् । चार्थनिर्वचनपूर्वकमितरेतरयोग-समाहारद्वन्द्वसमासप्रक्रियया शब्दसाधुत्वान्वाख्यानम्, एकशेषस्य परिचयनिर्वचनपूर्वकं शब्दसाधुत्वप्रक्रियाप्रदर्शनम्, निर्दिष्टसमस्तशब्दप्रयोगपूर्वकं विविधवाक्यानुच्छेदनिबन्धादि-रचनाविधानम् । | २४ |
| ४. | सर्वसमासशेषा-दिसमासा-श्रयविध्यन्ता-ध्ययनम् | वृत्तिविग्रहसमासादिलक्षणानि, सुपां सुपा तिङानाम्नेति कारिका, समासान्तप्रत्यायाः, समासान्तप्रत्ययविधायकानि सूत्रवार्तिकादीनि, सोदाहरणानि अलुगधिकारस्थसूत्रवार्तिकादीनि, समासाश्रयविध्यन्तर्गतानि सूत्रवार्तिकादीनि, भवेद्वर्णागमाद्धंसेति कारिका च । तत्र क्रमे विग्रहप्रदर्शन-पूर्वकं सम्बद्धसूत्रवार्तिकार्थनिर्वचनपूर्वकञ्च प्रयोगसिद्धिप्रक्रिया । | वृत्तेः पञ्चविधत्वपरिज्ञानम्, वृत्तिविग्रहसमासादिलक्षणबोधः, सुपां सुपेतिकारिका-तात्पर्यबोधः, समासान्तप्रत्ययनिष्पन्नशब्द-साधुत्वज्ञानम्, समासान्तप्रत्ययविधायकानां सूत्रवार्तिकादीनामर्थापनम्, अलुगधिकारस्थसूत्रवार्तिकादीनां समासाश्रयविध्यन्तर्गतानां सूत्रवार्तिककारिकादीनाञ्च प्रक्रियायामुपयोगप्रकार-परिज्ञानम्, सम्बद्धशब्दसाधुत्वप्रकारावगमः । | वृत्तिविग्रहसमासादिलक्षण-निरूपणम्, समासान्तप्रत्ययेन शब्दनिष्पादनप्रक्रियालेखनम्, समासान्तप्रत्ययविधायक-सूत्रवार्तिकादीनामर्थनिदर्शनम्, अलुगधिकार-समासाश्रयविध्यन्तर्गतानां सूत्रवार्तिकादीनामर्थसङ्घटन-पूर्वकं शब्दसाधुत्वान्वाख्यानम्, सुपां सुपा, भवेद्वर्णागमेति कारिकातात्पर्यप्रकाशनम्, वाग्व्यवहारे रचनाविधौ च निर्दिष्टसूत्रवार्तिकादिनिष्पन्न शब्दप्रयोगव्यापारः । | २४ |
| ५. | अपत्याधिकारा-दिचातुरर्थिका-न्ताध्ययनम् | तद्धितपरिचयः, तत्र क्रमे समार्थानां प्रथमाद्वा, तस्यापत्यम्, तद्धितेष्वचामादेः, किति च, आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्, युवोरनाकौ, ठस्येकः, यचि भम्, नस्तद्धिते, यस्येति च प्रभृतीनि साधारणतद्धितप्रक्रिया सम्बद्धानि | सुबन्तात्तद्धितोत्पत्तिरिति सिद्धान्तबोधः, तद्धितत्वपरिज्ञानम्, साधारणतद्धितप्रक्रियासम्बद्धानां सूत्राणामर्थावबोधः, निर्दिष्टप्रत्ययेन शब्दसाधुत्वप्रकारज्ञानम्, तद्धितान्तशब्देषु समुचितप्रकृतिप्रत्ययविवेकः, | साधारणतद्धितप्रक्रियानिदर्शनम्, शब्दसाधुत्वोपयोगिसमुचितसूत्र-प्रयोगः, तद्धितान्तशब्देषु समुचितप्रकृतिप्रत्ययविभाग-प्रदर्शनम्, तद्धितप्रक्रियासम्बद्धरूपसाधुत | २४ |

| | | | | | |
|---|---|---|---|---|---|
| | | सूत्राणि ।<br>साधारणतद्धितप्रत्ययेषु अण्-ण्य-ञ-अञ्-ईकक्-ढक्-प्रत्ययनिष्पन्नानां शब्दानां सम्बद्धसूत्रार्थावबोधपूर्विका रूपसिद्धिप्रक्रिया<br>अपत्याधिकारे नञ्-स्नञ्-अण्-इञ्-फिञ्-फक्-यञ्-च्फञ्-ढक्-ऐरक्-आरक्-छण्-ढञ्-यत्-घ-ख-अञ्-व्यत्-छ-व्यन्-ठक्-ण-फिञ्-डचण्- प्रत्ययनिष्पन्नानां शब्दानां सम्बद्धसूत्रार्थावबोधपूर्विका रूपसिद्धिप्रक्रिया<br>रक्ताद्यर्थे ठक्-अन्-कन्-अण्-छ-ढक्-डचत्-इनि-अञ्-यत्-घन्-टचण्-घ-ठञ्-व्यत्-डुलच्-डामहच्-त-वुञ्-यञ्-यत्-ठक्-य-इनिप्रत्ययनिष्पन्नानां शब्दानां सम्बद्धसूत्रार्थावबोधपूर्विका रूपसिद्धिप्रक्रिया<br>चातुरर्थिके अण्-अञ्-वुञ्-छ-क-ठच्-स-इनि-र-ढञ्-ण्य-य-फक्-फिञ्-ठक्-मतुप्-ड्मतुप्-ष्वलच्-वलच्- प्रत्ययनिष्पन्नानां शब्दानां सम्बद्धसूत्रार्थावबोधपूर्विका रूपसिद्धिप्रक्रिया<br>तस्येदमित्यपत्येऽपि ..., गोत्रे स्वैकोनसङ्ख्यानां ..., सिद्धे यस्येति लोपेन ... इति कारिकाणां सावतरणं व्याख्यानम् । | अपत्याधिकारस्थनिर्धारितप्रत्यय-समायोजनेन शब्दनिर्मितिप्रकारावबोधः,<br>रक्ताद्यर्थे चातुरर्थिके च निर्धारितप्रत्ययमाध्यमेन शब्दव्युत्पादनप्रकारबोधः,<br>तस्येदमित्यपत्येऽपि ..., गोत्रे स्वैकोनसङ्ख्यानां ..., सिद्धे यस्येति लोपेन ... इत्यादिकारिकाणा-मर्थापनप्रकारावबोधः ।<br>अपत्यार्थक-रक्ताद्यर्थक-चातुरर्थिक -निर्धारितप्रत्ययनिष्पन्नानां शब्दानां प्रत्ययार्थबोधनपूर्वकं प्रकृतिप्रत्ययविभागः । | वप्रकारलेखनम्,<br>अपत्यार्थक-रक्ताद्यर्थक-चातुरर्थिक निर्धारितप्रत्ययनिष्पन्नानां शब्दानां प्रत्ययार्थबोधनपूर्वकं प्रकृतिप्रत्ययविभागप्रदर्शनम्,<br>तस्येदमित्यपत्येऽपि ..., गोत्रे स्वैकोनसङ्ख्यानां ..., सिद्धे यस्येति लोपेन ... इत्यादिकारिकाणां ससन्दर्भमर्थप्रकाशनम्,<br>निष्पन्नतद्धितशब्देषु समुचितप्रत्ययविवेकः,<br>तद्धितप्रत्ययसमायोजनेन शब्दनिर्मितिप्रक्रियाप्रदर्शनं वाक्यप्रयोगव्यापारश्च । | |
| सैद्धान्तिकाभ्यासः | | | | | १२० |
| प्रयोगाभ्यासः | | | | | ४० |
| योगः | | | | | १६० |

**कक्षा १२**

| क्र.सं | प्रकरणानि | विषयक्षेत्रम् | बोधः | अभिव्यक्तिः | पाठ्य घण्टाः |
|---|---|---|---|---|---|
| १. | शैषिकादिभाव-कर्माद्यन्ता-ध्ययनम् | 'शेषे' इति सूत्रस्याधिकारत्वं विधित्वञ्च, शैषिके अण्-घ-ख-य-खञ्-ढकञ्-ढक्-त्यक्-ष्फक्-यत्-ठक्-वुक्-त्यप्-ण-एत्य-टचु-टचुल्-अञ्-ञ-छस्-छ-ठञ्-खञ्-वुन्-वुञ्-म-छण्-णिनि-प्रत्ययनिष्पन्नानां शब्दानां सम्बद्धसूत्रवार्तिकार्थावबोधपूर्विका रूपसिद्धिप्रक्रिया | शैषिके निर्दिष्टप्रत्ययनिष्पन्नशब्दानां साधुत्वप्रकारावबोधः,<br>समुचितप्रत्ययसंयोजनेनापेक्षित-रूपसाधुत्वज्ञानम्,<br>शैषिके प्राग्दीव्यतीये प्राग्वहतीये प्राग्घितीये छयद्विधौ आर्हीयप्रकरणे | शेषे इति सूत्रस्याधिकारत्वस्य विधित्वस्य च निरूपणम्,<br>शैषिके प्राग्दीव्यतीये प्राग्वहतीये प्राग्घितीये छयद्विधौ आर्हीयप्रकरणे भावकर्मार्थे च निर्धारितप्रत्ययनिष्पन्नानां शब्दानां | २४ |

| | | | | | |
|---|---|---|---|---|---|
| | | प्राग्दीव्यतीये अण्-अञ्-मयट्-कन्-ठञ्-वुञ्-ढञ्-यत्प्रत्ययनिष्पन्नानां शब्दानां सम्बद्धसूत्रवार्तिकार्थावबोधपूर्विका रूपसिद्धिप्रक्रिया<br><br>प्राग्वहतीये ठक्-अण्-ठन्-ष्ठल्-ष्ठन्-छ-मप्-इनि-ण्य-अञ्-ण्यप्रत्ययनिष्पन्नानां शब्दानां सम्बद्धसूत्रवार्तिकार्थावबोधपूर्विका रूपसिद्धिप्रक्रिया<br><br>आकर्षात्पर्पादेर्भस्त्रादिभ्य इत्यादि श्लोकवार्तिकव्याख्यानम्,<br><br>प्राग्घितीये यत्-ढक्-ख-ठक्-अण्-ण-ञ्य-खञ्-ण्य-ठञ्-ढञ्-यप्रत्ययनिष्पन्नानां शब्दानां सम्बद्धसूत्रवार्तिकार्थावबोधपूर्विका रूपसिद्धिप्रक्रिया<br><br>छयद्विधौ यत्-छ-थ्यन्-ख-ठञ्-ण-ढञ्-खञ्-अञ्-प्रत्ययनिष्पन्नानां शब्दानां सम्बद्धसूत्रवार्तिकार्थावबोधपूर्विका रूपसिद्धिप्रक्रिया<br><br>आर्हीयप्रकरणे ठञ्-ठक्-ठन्-कन्-टिठन्-अण्-ख-ईकन्-यत्-ठञ्-छ-य-णिनिप्रत्ययनिष्पन्नानां शब्दानां सम्बद्धसूत्रवार्तिकार्थावबोधपूर्विका रूपसिद्धिप्रक्रिया ।<br><br>भावकर्मार्थे वति-त्व-तल्-नञ्-स्नञ्-इमनिच्-ष्यञ्-य-ढक्-यक्-अञ्-अण्-वुञ्-प्रत्ययनिष्पन्नानां शब्दानां सम्बद्धसूत्रवार्तिकार्थावबोधपूर्विका रूपसिद्धिप्रक्रिया । | भावकर्मार्थे च निर्धारितप्रत्ययनिष्पन्नानां शब्दानामर्थज्ञानपूर्वकं प्रकृतिप्रत्ययविभागः,<br><br>सम्बद्धसूत्रवार्तिकार्थावबोध-पूर्विकाया रूपसिद्धिप्रक्रियाया ज्ञानम्,<br><br>तद्धितान्तशब्दान्तर्गतानां तद्धितप्रत्ययानामर्थज्ञानपूर्वकं प्रकृतिप्रत्ययविभागावबोधश्च । | रूपसिद्धिप्रक्रियालेखनम्<br><br>निष्पन्नतद्धितान्तशब्देषु प्रकृतिप्रत्ययविभागकरणम्,<br><br>विभक्तिषु प्रत्ययसंयोजनेन शब्दसाधुत्वप्रदर्शनञ्च,<br><br>तद्धितप्रत्ययनिष्पन्नशब्दानां प्रयोगेण सार्थकवाक्यनिर्मितिप्रक्रियाया निदर्शनम् । | |
| २ | मत्वर्थीयादिद्विरुक्तान्ताध्ययनम् | मत्वर्थीये खञ्-ढक्-यत्-ख-छ-कुणप्-जाहच्-ति-चुञ्चुप्-चणप्-ना-नाञ्-शालच्-शङ्कटच्-कटच्-पटच्-गोयुगच्-तैलच्-शाकट्-शाकिन्-कुटारच्-टीटञ्-नाटच्-विडच्-भ्रटच्-इनच्-इतच्-द्वयसच्-दघ्नच्-मात्रच्-अण्-वतुप्-डति-तयप्-अयच्-ढ-मयट्-डट्-थुक्-तिथुक्-तीय-तमट्-वुन्-कन्-णिनि-ठक्-ठञ्-इनि-अञ्-ठन्-मतुप्-लच्-श-न-इलच्-विनि-उरच्-र-म-व-ईरन्-ईरच्-वलच्-यप्-आरकन्-इनच्-आलु-एलु-ऊल-तप्-युस्-ग्मिनि-आलच्-आट्च्-अच्-आमिनच्-ब-भ-ति-त-युस् प्रत्ययनिष्पन्नानां शब्दानां सम्बद्धसूत्रवार्तिकार्थावबोधपूर्विका रूपसिद्धिप्रक्रिया<br><br>भूमनिन्दाप्रशंसासु...इति कारिकायाः सावतरणं व्याख्यानम् ।<br><br>प्राग्दिशीये तसिल्-त्रल्-ह-अत्-दा-र्हिल्-अधुना-दानीम्-द्य-द्युस्-थाल्-थमु प्रत्ययनिष्पन्नानां शब्दानां | मत्वर्थीये प्राग्दिशीये प्रागिवीये स्वार्थिके द्विरुक्ते च निर्धारित प्रत्ययनिष्पन्नानां शब्दानां सम्बद्धसूत्रवार्तिकार्थावबोध-पूर्विकाया रूपसिद्धिप्रक्रियाया बोधः,<br><br>निर्दिष्टकारिकाणां सावतरणमर्थज्ञानम्,<br><br>निर्दिष्टप्रत्ययनिष्पन्नशब्दानां साधुत्वप्रकारावबोधः, प्रकृतिप्रत्ययविभागज्ञानं,<br><br>समुचितप्रत्ययसंयोजनेनापेक्षितरूपसाधुत्वज्ञानञ्च । | मत्वर्थीये प्राग्दिशीये प्रागिवीये स्वार्थिके द्विरुक्ते च निर्धारितप्रत्ययनिष्पन्नानां शब्दानां रूपसिद्धिप्रक्रिया लेखनम्, निर्दिष्टकारिकाणां सावतरणमर्थनिरूपणम्,<br><br>निष्पन्नतद्धितान्तशब्देषु प्रकृतिप्रत्ययविभागप्रदर्शनम्,<br><br>विभक्तेषु प्रत्ययसंयोजनेन शब्दसाधुत्वप्रदर्शनञ्च,<br><br>तद्धितप्रत्ययनिष्पन्नशब्दानां प्रयोगेण सार्थकवाक्यनिर्मितिप्रक्रियाया निदर्शनम्,<br><br>समुचिततद्धितान्तशब्दसंयोजने-नानुच्छेदादिरचनाभ्यासः । | २४ |

| | | | | | |
|---|---|---|---|---|---|
| | | सम्बद्धसूत्रवार्तिकार्थावबोधपूर्विका रूपसिद्धिप्रक्रिया ।<br>प्रागिवीये अस्ताति-असि-अतसुच्-अति-एनप्-आच्-आहि-धा-धमुञ्-पाशप्-चरट्-रूप्य-तमप्-इष्ठन्-तरप्-ईयसुन्-रूपप्-कल्पप्-देश्य-देशीयर्-बहच्-जातीयर्-अकच्-क-ठच्-घन्-इलच्-अडच्-वुच्-कन्-र-डुपच्-ष्टरच्-डतरच्-डतमच् प्रत्ययनिष्पन्नानां शब्दानां सम्बद्धसूत्रवार्तिकार्थावबोधपूर्विका रूपसिद्धिप्रक्रिया ।<br>स्वार्थिके कन्-ढञ्-ढ-य-छ-अण्-ठक्-ठच्-ईकक्-ञ्य-ञ्यट्-टेड्यण्-छ-अञ्-यञ्-वुन्-कन्-ख-कृत्वसुच्-सुच्-धा-मयट्-यत्-तनप्-धेय-ञ्य-तल्-क-कन्-ठक्-तिकन्-सा-स्ना-श-तसि-च्वि-इनच्-ताति-डाच् प्रत्ययनिष्पन्नानां शब्दानां सम्बद्धसूत्रवार्तिकार्थावबोधपूर्विकारूपसिद्धप्रक्रिया<br>सन्दर्भपूर्विकाया आहुस्त्रिगर्तषष्ठांस्तु ... इति कारिकाया व्याख्या,<br>द्विरुक्ते द्विरुक्तप्रक्रियया शब्दव्युत्पादनविधिः, सन्दर्भपूर्विकाया दलद्वये टाबभावः ... इति कारिकाया व्याख्या,<br>सम्बद्धसूत्रावार्तिकार्थावबोधपूर्विका रूपसिद्धिप्रक्रिया । | | | |
| ३. | लकारार्थानां तिङाञ्चाध्ययनम् | भ्वादिप्रकरणे- श्रीत्राहन्तीचणैर्गुण्यैरित्यादि- मङ्गलाचरणपद्यव्याख्या, दशलकाराणां परिचयः, लकाराणामर्थनिर्धारणम्, लकारार्थतिङाञ्च व्यवस्थापकानि सूत्राणि- वर्तमाने लट्, लः कर्मणि च ..., लस्य, तिप्तस्झि ..., लः परस्मैपदम्, तङानावात्मनेपदम्, अनुदात्तङितः ..., स्वरितञितः ..., शेषात्कर्तरि, तिङस्त्रीणि ..., तान्येकवचन..., युष्मद्युपपदे ..., प्रहासे च, अस्मद्युत्तमः, शेषे प्रथमः, परोक्षे लिट्, अनद्यतने लुट्, लृट् शेषे च, लोट् च, आशिषि लिङ्लोटौ, अनद्यतने लङ्, विधिनिमन्त्रणामन्त्रणाधीष्ट ..., लुङ्, लिङ्निमित्ते लृङ् ..., कर्तृकर्मभाववाच्यानामभिप्रायः सकर्मकाकर्मकधातूनां परिचयः, सकर्मकाकर्मकेभ्यो धातुभ्यो लकारव्यवस्था ..., भूतभविष्यद्वर्तमानकालवर्गीकरणानि, अनुबन्धप्रयुक्तधातोः परस्मैपदात्मनेपदविभक्तिव्यवस्था, लादेशानां तिङां परिचयः, | मङ्गलाचरणपद्यस्यार्थावबोधः, दशलकाराणामर्थपरिज्ञानम्, कर्तृकर्मभाववाच्यानाम् अभिप्रायमननम्, सकर्मकाकर्मकधातूनां विभागकारणावबोधः, सकर्मकाकर्मकेभ्यो धातुभ्यो लकाराः कस्मिन्नर्थे भवन्तीति निर्धारणम्, भूतभविष्यद्वर्तमान-कालवर्गीकरणहेत्ववबोधः, अनुबन्धप्रयुक्तधातोः परस्मैपदात्मनेपदविभक्तिव्यवस्था ज्ञानम्,<br>लादेशानां तिङां परिचयः, परस्मैपदात्मनेपदानां लादेशानां विभागः, लादेशेषु वचनपुरुषनिर्धारणम्, सार्वधातुकार्धातुकत्वपरिज्ञानम्, | तृतीयाध्यायस्थसूत्राणां विधिनिदर्शनम् लकारार्थतिङर्थनिर्वचनम्, दशलकाराणां परिचयप्रदर्शनम्, लकाराणामर्थनिर्धारणम्, कर्तृकर्मभाववाच्यानाम् अभिप्रायप्रकटनम्, सकर्मकाकर्मकधातूनां परिचयप्रदानम्, सकर्मकाकर्मकेभ्यो धातुभ्यो लकाराः कस्मिन्नर्थे भवन्तीति निर्वचनम्, भूतभविष्यद्वर्तमान-कालनिर्धारककारणनिरूपणम्, अनुबन्धप्रयुक्तधातोः परस्मैपदात्मनेपदविभक्ति-व्यवस्थाप्रदर्शनपुरस्सरं लेखनम्, लादेशानां तिङां परिचयकथनम्,<br>लादेशाः कस्मिन्नर्थे भवन्तीति निर्वचनम्,<br>निर्दिष्टसूत्रवार्तिकार्थावबोधन | २४ |

| | | | | | |
|---|---|---|---|---|---|
| | | परस्मैपदात्मनेपदानां लादेशानां विभागः, लादेशेषु वचनपुरुषनिर्धारणम्, सार्वधातुकार्धातुकत्वादिव्यवस्था । | तत्र क्रमे सूत्रार्थावबोधनपूर्वकं लकारार्थानां तिङाञ्च नियमनप्रकारनिदर्शनम् । | -पूर्वकं लकारार्थानां तिङाञ्च नियमनप्रकारनिदर्शनम् । | |
| ४. | भ्वादिगणस्थानां भूधातोः कमुकान्तौधातु-पर्यन्ताना-मध्ययनम् | भ्वादिगणस्थानां भूधातोः कमुकान्तौ धातुपर्यन्तानां धातूनां सूत्रवार्तिकार्थसङ्घटन-पूर्विकारूपसाधनप्रक्रिया, रूपावलिश्च ।<br>संहितैकपदे नित्या ..., उपसर्गेण धात्वर्थः ..., श्तिपा शपानुबन्धेन ..., ऊदृदन्तैर्यौति ..., सेक्सृप्सृ ..., अजन्तोऽकारवान् वा ..., संज्ञायाः कार्यकालत्वात् ... इत्यादिपद्यानां सावतरणं सोदाहरणञ्च व्याख्यानम् ।<br>निर्धारितानां धातुसाधितानां रूपाणां वाक्येषु प्रयोगव्यापारश्च । | भ्वादिगणस्थानां भूधातोः कमुकान्तौ धातुपर्यन्तानामर्थाव-बोधः, धातूनां सूत्रवार्तिकार्थसङ्घटनपूर्विकाया<br>रूपसाधनप्रक्रियाया ज्ञानम्,<br>निर्धारितकारिकार्थानुशीलनम् । | भ्वादिगणस्थानां भूधातोः कमुकान्तौ धातुपर्यन्तानां रूपसिद्धिप्रक्रियालेखनम्,<br>भ्वादिगणस्थानां भूधातोः कमुकान्तौ धातुपर्यन्तानां सूत्रवार्तिकादीनामर्थकथनम्,<br>भ्वादिगणस्थानां भूधातोः कमुकान्तौ धातुपर्यन्तानां क्रियापदानां वाक्येषु प्रयोगः, धातुरूपावलिकथनञ्च । | २४ |
| ५ | भ्वादिगणस्थानां शब्दार्थक-अण् धातोरारभ्य गतिवृद्ध्यर्थक-टुओश्विधातु-पर्यन्तानामध्ययनम् | भ्वादिगणस्थानां शब्दार्थक-अण् धातोरारभ्य गतिवृद्ध्यर्थक-टुओश्विधातुपर्यन्तानामध्ययनम् । तत्र क्रमे धातूनां सूत्रवार्तिकार्थसङ्घटनपूर्विका<br>रूपसाधनप्रक्रिया, रूपावलिश्च ।<br>निर्धारितानां धातुसाधितानां रूपाणां वाक्येषु प्रयोगव्यापारश्च । | भ्वादिगणस्थानां शब्दार्थक-अण् धातोरारभ्य गतिवृद्ध्यर्थक-टुओश्विधातुपर्यन्तानामर्थावबोधः,<br>निर्दिष्टधातूनां सूत्रवार्तिकार्थसङ्घटनपूर्विकाया<br>रूपसाधनप्रक्रियाया ज्ञानम्, धातुरूपावल्याः परिज्ञानम् ।<br>निर्धारितानां धातुसाधितानां रूपाणां वाक्येषु प्रयोगव्यापारप्रयोगज्ञानम् । | भ्वादिगणस्थानां शब्दार्थक-अण् धातोरारभ्य गतिवृद्ध्यर्थक-टु-ओ -श्वि-धातुपर्यन्तानां रूपसिद्धिप्रक्रियालेखनम्,<br>निर्दिष्टानां सूत्रवार्तिकादीनामर्थकथनम्,<br>भ्वादिगणस्थानां शब्दार्थक-अण् धातोरारभ्य गतिवृद्ध्यर्थक-टुओश्विधातुपर्यन्तानां क्रियापदानां वाक्येषु प्रयोगः, धातुरूपावलिकथनञ्च । | २४ |
| **सैद्धान्तिकाभ्यासः** | | | | | १२० |
| **प्रयोगाभ्यासः** | | | | | ४० |
| **योगः** | | | | | १६० |

## ५. प्रयोगात्मककार्यं परियोजनाकार्यञ्च

| क्र.सं. | क्षेत्रम् | परीक्षणीयाः पक्षाः | अङ्कभारः | मूल्याङ्कनाधाराः |
|---|---|---|---|---|
| १. | शिक्षण-सहभागिता | (क) उपस्थितिः<br>(ख) सहभागिता | ३ | ➢ विद्यार्थिनां दैनिकोपस्थितेरभिलेखः<br>➢ सामूहिकविमर्श-मौखिकपरीक्षा-प्रश्नोत्तरण-कक्षाकार्यपरीक्षण-भाषिकव्यवहारे सिद्धरूपाणां प्रयोगचातुर्यादिकार्येषु सहभागिता |
| २. | कक्षाकार्यं परियोजनाकार्यं वा | कक्षाकार्यं परियोजनाकार्यं वा | ६ | ➢ विद्यार्थिषु पाठ्यवस्तुबोधः, सूत्राणां शुद्धोच्चारणम्, शुद्धलेखनम्, सूत्रवार्तिकार्थापनं, आवश्यकतानुसारेण गणसूत्र-वार्तिक-परिभाषा-न्याय-कारिकादीनामुपयोगः, रूपावलिप्रदर्शनं, सिद्धरूपाणां वाक्येषु |

| | | | | |
|---|---|---|---|---|
| | | | | समुचितप्रयोगः । <br> ➢ गृहकार्यं कक्षाकार्यं वा <br> ➢ निर्धारितविषयवस्तुसम्बद्ध-परियोजनाकार्यस्य प्रतिवेदनमन्तर्वार्ता च |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | (क) सूत्रप्रयोगः | ५ | १. विषयस्य सारल्येनार्थापनम् <br> २. विस्तरेण व्याख्यानम् <br> ३. सूत्राणां शुद्धोच्चारणम् <br> ४. सूत्राणां पदच्छेदः, सूत्रस्थपदेषु विभक्तिवचननिर्देशः, सूत्रार्थबोधश्च, <br> ५. उदाहरणानां रूपाणां वा प्राथमिकावस्थाया निर्देशनम् <br> ६. एकस्मिन् स्थले बहुषु विधिसूत्रेषु प्राप्तेषु बाध्यबाधकभावबोधनेनैकस्य प्रवृत्तिनिर्धारणम् |
| | | (ख) विषयवस्तुबोधः | ५ | १. वाक्ये प्रयुक्तानां पदानां कारकत्वपरिचायनम् <br> २. रूपावलिप्रदर्शनम् <br> ३. तद्धिते प्रत्ययार्थनिर्देशनम्, सिद्धरूपाणां चार्थबोधनम् <br> ४. तिङन्ते धातुस्वरूपावबोधनपूर्वकं कालपुरुषवचनविभागः, <br> ५. सूत्रार्थसमन्वयपूर्वकं रूपसिद्धिप्रक्रियाबोधनम्, <br> ६. सिद्धरूपाणां वाक्येषु प्रयोगप्रदर्शनम् <br> ७. प्रतिप्रकरणगतताया रूपसिद्धिप्रक्रियायाः पार्थक्यबोधनम् <br> ८. समासेऽर्थबोधाय लौकिकविग्रहस्य समासप्रक्रियाप्रारम्भाय अलौकिकविग्रहस्य च निदर्शनम्, <br> ९. समस्तपदानां वाक्ये प्रयोगनिदर्शनेन समासस्य वैशिष्ट्यबोधनम् । |
| ४. | त्रैमासिकपरीक्षा | मौखिकं लिखितं वा | ६ | त्रैमासिकपरीक्षायाः प्राप्ताङ्कस्यानुपातिकप्रतिशताधारेणाङ्कनिर्धारणं कर्तव्यम् |
| योगः | | | २५ | |

## ६. शिक्षणसहजीकरणप्रक्रिया

संस्कृतव्याकरणस्य मूल्यमान्यताऽऽदर्शानामध्ययनस्य माध्यमेन विद्यार्थिनां भाषाव्याकरणयोर्विविधपक्षाणां संस्कृतसम्बद्धविषयाणां वा ज्ञानेन सह सच्चरित्रवतां नैतिकतायुतानां च नागरिकाणां निर्माणमस्य विषयस्योद्देश्यं विद्यते । एतस्मिन् समाविष्टानां विषयवस्तुनामध्यापनक्रमे सर्वेभ्यः क्षेत्रभ्यः समानं महत्त्वं प्रदातव्यं भवति । सम्बद्धविषयवस्तुनः सहजीकरणपूर्वकं ज्ञानशिल्पधारणानां विकासनमावश्यकम् । विद्यार्थिषु सैद्धान्तिकपक्षेण सह व्यावहारिकपक्षञ्च विकासस्यानुकूलचिन्तनव्यवहारयोः समुन्नयनमेतस्य विषयस्य मुख्योद्देश्यं निर्धारितं वर्तते ।

व्याकरणशिक्षणविधौ प्रकरणगतशिल्पविकासाय अध्ययनसहजीकरणप्रक्रिया अपरिहार्या मन्यते । अस्मिन् क्रमे छात्रकेन्द्रित- क्रियाकलापेषु महत्त्वं प्रदातव्यं भवति । प्रक्रियेयं पाठ्यक्रमस्य उद्देश्ये विषयवस्तुषु छात्राणां पृष्ठभूमौ चाधृता भवति । अध्ययनस्य सहजीकरणं सामूहिके वैयक्तिके चाभ्यासे आश्रितो भवति । अस्य पाठ्यक्रमस्य उद्देश्यस्य परिपूर्तये अधो निर्दिष्टेषु अध्ययनसहजीकरणक्रियाकलापेषु महत्त्वं दत्तमस्ति ।

माध्यमिकस्तरीयाणां छात्राणां मनोभावानुरूपमध्ययने अधोऽङ्किताः शिक्षणसहजीकरणप्रक्रिया अवलम्बनीया भवन्ति-

१. शुश्रूषा - प्रथमं तावद् छात्राणां जिज्ञासोत्पादनाय विषयवस्तुषु यत्नः करणीयः । तत्र क्रमे भाषिकशुद्धये व्याकरणस्य महत्त्वबोधकः प्रसङ्ग उत्थापनीयः ।

२. श्रवणम् - जिज्ञासितेषु छात्रेषु विषयस्य प्रस्तुतीकरणं विधातव्यं भवति । अनेन प्रकारेण छात्राः पाठ्यविषयं

सम्यग्रूपेण श्रोतुं प्रभवन्ति ।

३. ग्रहणम् - मनोयोगपूर्वकं श्रुतविषयवस्तुषु छात्रेषु तस्य ग्रहणं समीचीनतया भवितुमर्हति ।

४. धारणम् - अनेन प्रकारेण गृहीतस्य पाठ्यवस्तुनः तदनन्तरमाञ्जस्येन धारणं सम्भवति ।

५. ऊहापोहः - एवं प्रकारेण बुद्ध्यारूढस्य विषयवस्तुनः तर्कवितर्करूपेण वार्ताया माध्यमेन यथातथ्यस्य परीक्षणं भवति ।

६. अर्थविज्ञानम् - खण्डनमण्डनादिभिः तर्कवितर्केण च सह विषयवस्तुनः परीक्षणे जाते सति वस्तुतथ्यस्य यथार्थरूपेण स्थापनं भवति ।

७. तत्त्वज्ञानम् - अनेन क्रमेण प्रतिपाद्यतत्त्वस्य यथार्थबोधेन पाठ्यक्रमेण निर्धारितस्योद्देश्यस्योपलब्धिर्जायते ।

उपर्युक्तप्रकारेण व्याकरणस्यास्य पाठ्यक्रमस्योद्देश्यप्राप्तये प्रतिप्रकरणं प्रस्तुतानां पाठ्यवस्तूनामवबोधाय छात्रेषु सक्रियतो-त्पादिका शिक्षणसहजीकरणप्रक्रिया अवलम्बनीया । तत्र क्रमे निगमन-आगमन-व्याख्यान-प्रश्नोत्तरविधयोऽवलम्बनीयाः ।

## ७. विद्यार्थिमूल्याङ्कनप्रक्रिया

विद्यार्थिनां शिक्षणोपलब्धिं सुनिश्चेतुं निर्माणात्मकं निर्णयात्मकञ्चोभ्यप्रकारकमेव मूल्याङ्कनं विधातव्यं भवति । विद्यार्थिनां शिक्षणोपलब्धे, सुधाराय कक्षाशिक्षणस्यैव क्रमे कक्षाकार्य-परियोजनाकार्य-प्रस्तुतीकरणोपलब्धिपरीक्षासदृशान् क्रियाकलापान् कारयित्वा सैद्धान्तिकज्ञानशिल्पयो-रवाप्तिरावश्यकी । एतत्कार्यस्य प्रभावकारिरूपेण क्रियान्वयनाय, विद्यार्थिनां शिक्षणस्तरस्य सुधाराय च सहजीकरणक्रियाकलापस्य अभिन्नाङ्गस्य रूपेण निर्माणात्मकमूल्याङ्कनमुपयोक्तव्यम् । निर्माणात्मकमूल्याङ्कनस्य शिक्षणोपलब्धेर्निश्चितभारो निर्णयात्मकमूल्याङ्कनेऽपि संयोज्यते ।

पाठ्यक्रमेण निर्धारितस्योद्देश्यस्यानुरूपं विद्यार्थिनो ज्ञान-शिल्पाभिवृत्तीः प्राप्नुवन्नवेति विषयस्यान्वेषकं महत्त्वपूर्णं संयन्त्रं मूल्याङ्कनं भवति । विद्यार्थिनां मूल्याङ्कनं शिक्षणोपलब्धीर्ध्यात्वा सक्षमतां शिक्षणोपलब्धीनाञ्चानुरूपं शिक्षणस्य सर्वान् स्तरान् समाविश्य विधातव्यम् । आन्तरिकबाह्यमूल्याङ्कनयोर्माध्यमेन एतस्य विषयस्य मूल्याङ्कनं विधीयते । मूल्याङ्कनस्य समग्रभारतः पञ्चविंशतिप्रतिशतमान्तरिकं पञ्चसप्ततिप्रतिशतं बाह्यञ्च मूल्याङ्कनं विधीयेते । एवमेव बाह्यमूल्याङ्कनस्यान्तर्गतं लिखितपरीक्षा सञ्चाल्यते । विद्यार्थीमूल्याङ्कनस्यान्तर्गतं निर्माणात्मकं निर्णयात्मकञ्च मूल्याङ्कनं पद्धतिद्वयेनैव क्रियते । अस्य विषयस्य पाठ्यक्रमे समाविष्टानां स्तरगतसक्षमतानाम्, कक्षागतशिक्षणेपलब्धीनाम्, तासां विषयवस्तूनाम्, तैस्सह सम्बद्धस्य शिल्पस्य, शिक्षण सहभागितायाः शिक्षणसक्रियतायाश्चाधारेषु विद्यार्थिनां शिक्षणस्य मूल्याङ्कनं विधातव्यम् ।

अस्य स्तरस्य विद्यार्थिमूल्याङ्कनप्रक्रियाक्षराङ्कनपद्धत्या विधीयते । मूल्याङ्कने निर्माणात्मकं निर्णयात्मकञ्चेति प्रक्रियाद्वयमवलम्ब्यते । अस्मिन् स्तरे व्याकरणाध्ययनं द्रढयितुं सामूहिकविमर्शन-लिखितपरीक्षा-प्रश्नोत्तरण-कक्षाकार्यपरीक्षण-भाषिकव्यवहारे सिद्धरूपाणां प्रयोगचातुर्यादिकार्यैर्निर्माणात्मकं मूल्याङ्कनं विधातुं शक्यते । तद्धि निरन्तरमूल्याङ्कनं भवति । स्तरोन्नतये कक्षोन्नतये च शैक्षिकसत्रस्यान्ते निर्णयात्मकमूल्याङ्कनमन्तिमपरीक्षाया माध्यमेन विधीयते । विद्यार्थिषु पाठ्यवस्तुबोधः, सूत्राणां शुद्धोच्चारणम्, शुद्धलेखनम्, सूत्रवार्तिकार्थापनं, आवश्यकतानुसारेण गणसूत्र-वार्तिक-परिभाषा-न्याय-कारिकादीनामुपयोगश्चेतिविषयाणां निदर्शनम्, रूपावलिप्रदर्शनं, सिद्धरूपाणां वाक्येषु समुचितप्रयोगश्चेति विषया मूल्याङ्कनस्याधारा मन्यन्ते । मूल्याङ्कनप्रणालिं विश्वसनीयां विधिसम्मताञ्च विधातुं संस्कृतव्याकरणविषयेऽपि आन्तराया बाह्यायाश्च मूल्याङ्कनपद्धतेरवलम्बनं विधीयते । वार्षिक्यां परीक्षायां प्रतिशतं पञ्चविंशतेरङ्कभारस्यान्तरं पञ्चसप्ततेरङ्कभारस्य बाह्यमूल्याङ्कनञ्च विधीयते । आन्तरं मूल्याङ्कनं सम्बद्धविद्यालयस्य शिक्षकेण विधातव्यम् । शिक्षणप्रक्रियया सहैव विषयवस्तुनो मूल्याङ्कनं निरन्तरं विधेयम् । औपचारिकेण अनौपचारिकेण च रूपेण शिक्षणोपलब्धिः क्रमशः परिमापनीया । शिक्षणसहजीकरणस्य क्रमे विद्यार्थिभिरधिगतानां ज्ञानशिल्पप्रयोगोच्चदक्षतासम्बद्धपक्षाणां मूल्याङ्कनं कर्तव्यं भवति ।

### (क) आन्तरं मूल्याङ्कनम्

शिक्षणसहजीकरणप्रक्रियया कक्षागतशिक्षणेन सहैव छात्राणामान्तरं निर्माणात्मकं वा मूल्याङ्कनमपि कर्तव्यम् । व्याकरणस्य शिक्षणक्रमे छात्राणां निर्माणात्मकमूल्याङ्कनाय अधोऽङ्किता विधयोऽवलम्बयितुं शक्यन्ते-

- लिखितप्रश्नोत्तरमाध्यमेन
- मौखिकप्रश्नोत्तरमाध्यमेन
- छात्राणां परस्परविचारविमर्शमाध्यमेन

अत्र क्रमे कक्षाध्यापकेन सूत्रोच्चारणाय सूत्रार्थापनाय च प्रेरणम्, सूत्रार्थावबोधनम्, उदाहरणेषु सूत्रप्रवर्तननिदर्शनम्, उदाहरणेषु प्रत्युदाहरणेषु च पार्थक्यबोधनाय प्रश्नोत्तराणि, सामूहिकी चर्चा, समूहविभाजनं कृत्वा समस्यायाः समाधानम्, नवीनोदाहरणचयनाभ्यासः, रूपावलिसञ्चालनाय कथनम्, रूपसिद्धिप्रक्रियालेखनाय प्रेरणम्, समासे लौकिकालौकिकविग्रहप्रदर्शनाय कथनम्, तिङन्ते समानप्रकृतिकानां धातूनां रूपावलिसञ्चालनाय प्रेरणादिकं कार्यम् ।

अधोलिखिताधारेणान्तरमूल्याङ्कनं कर्तव्यम् :

| **क्र.सं.** | **क्षेत्रम्** | **अङ्कभारः** |
|---|---|---|
| १. | शिक्षणसहभागिता | ३ |
| २. | कक्षाकार्यं परियोजनाकार्यं वा | ६ |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | १० |
| ४. | त्रैमासिकपरीक्षा | ६ |
| योगः | | २५ |

(ख) **बाह्यमूल्याङ्कनम्**

निर्णयात्मके बाह्ये वा मूल्याङ्कने पाठ्यक्रमे निर्धारितोद्देश्यानुरूपं छात्रैः ज्ञानम्, शिल्पमधिगतं नवेति सम्परीक्ष्य तदनुसारेण छात्राणामुत्तीर्णत्वमनुत्तीर्णत्वं वा निर्णीयते । एतादृशं मूल्याङ्कनमावधिकं भवति । शैक्षिकसत्रस्यान्त एतद् मूल्याङ्कनं विधीयते ।

**अधोलिखिताधारेण बाह्यमूल्याङ्कनं कर्तव्यम् :**

**कक्षा ११**

| **क्र.सं** | **विषयक्षेत्रम्** | **प्रकरणानि** | **अङ्क भारः** |
|---|---|---|---|
| १. | लक्षणम्, सङ्ख्यापरिगणनम्, कर्तृ-कर्म-करण-सम्प्रदान-अपादान-अधिकरण-कारक-संज्ञाविधायकानां सूत्राणां ज्ञानम्,<br>ससम्बोधन-प्रथमा-द्वितीया-तृतीया-चतुर्थी-पञ्चमी-षष्ठी-सप्तमीविभक्ति-विधायकसूत्रवार्तिकज्ञानम्, उपपदविभक्तिविधायकानां सूत्रवार्तिकादीनां ज्ञानं बोधश्च | कारकाध्ययनम् | १+२ |
| | सम्बन्धे कारकत्वाभावः, ससम्बोधन-प्रथमा-द्वितीया-तृतीया-चतुर्थी-पञ्चमी-षष्ठी-सप्तमीविभक्तिविधायकानां सूत्रवार्तिकार्थविवेचनम्, कर्तृ-कर्म-करण-सम्प्रदान-अपादान-अधिकरणकारकसंज्ञाविधायकानां सूत्रवार्तिका-दीनामर्थापनम्, उपपदविभक्तिविधायकानां सूत्रवार्तिकादीनामर्थविवेचनम् | कारकाध्ययनम् | ४ |
| | प्रयोगसिद्धिप्रक्रिया, उभसर्वतसोः कार्या, दुह्याच्पच्दण्ड..., चर्मणि द्वीपिनं हन्ति... इत्यादिकारिकाः । तत्र क्रमे प्रसङ्गप्राप्तशङ्का-समाधानादिकञ्च । | कारकाध्ययनम् | ८ |
| २. | समाससामान्यलक्षणम्, समासभेदाः, सामर्थ्यस्वरूपम्, लौकिकालौकिकविग्रहप्रदर्शनसरणिः, उपसर्जनसंज्ञायाः कार्यवैशिष्टचम्, अव्ययीभाव-तत्पुरुषसमासलक्षणम्, समासलक्षणम्, समासविधायकसूत्र-वार्तिकादीनां ज्ञानम्, समासान्तटच्प्रत्यय- | अव्ययीभावतत्पुरुष-समासयोरध्ययनम् | २+१ |

| | | | |
|---|---|---|---|
| | विधायकसूत्रवार्तिकादीनामुपस्थापनम्, कर्मधारय-द्विगु-उपमानपूर्वोत्तरपद- नञ्तत्पुरुष-उपपदतत्पुरुष-मध्यमपदलोपितत्पुरुष-मयूरव्यंसकादि-प्रादि-गतिसमासविधायकसूत्र-वार्तिकादीनां ज्ञानम्, द्वितीयान्त-तृतीयान्त-चतुर्थ्यन्त-पञ्चम्यन्त-षष्ठचन्त-सप्तम्यन्तानां सुबन्तैः सह समासविधायकसूत्रवार्तिकादीनां ज्ञानञ्च | | |
| | समासवर्गीकरणाधाराः, अव्ययीभाव-तत्पुरुषसमासलक्षणम्, समासलक्षणम्, समासविधायकसूत्रवार्तिकादीनामर्थापनम्, समासान्तटच्प्रत्ययविधायक-सूत्रवार्तिकादीनां उपस्थापनम्, कर्मधारय-द्विगु-उपमानपूर्वोत्तरपदनञ्तत्पुरुष-उपपदतत्पुरुष-मध्यमपदलोपितत्पुरुष-मयूरव्यंसकादि-प्रादि-गतिसमास-विधायकसूत्रवार्तिकादीनां ज्ञानम्, द्वितीयान्त-तृतीयान्त-चतुर्थ्यन्त-पञ्चम्यन्त-षष्ठचन्त-सप्तम्यन्तानां सुबन्तैः सह समासविधायकसूत्रवार्तिकादीनामर्थ-विवेचनम्<br>पदविधित्वम्, समासाधिकारः, अव्ययानां संज्ञाशब्दैः सह समासविधायक-सूत्रवार्तिकादीनि, समासान्तटच्प्रत्यय-विधायकानि सूत्रवार्तिकादीनि | अव्ययीभावतत्पुरुष-समासयोरध्ययनम् | ४ |
| | सूत्रार्थसङ्घटनपूर्विका-लौकिकालौकिकविग्रहप्रदर्शनपूर्विका-स्थितिनिदर्शनपूर्विका च शब्दसाधुत्वप्रक्रिया | अव्ययीभावतत्पुरुष-समासयोरध्ययनम् | ८ |
| ३. | बहुव्रीहिसमासलक्षणम्, समानाधिकरणव्यधिकरण- बहुव्रीहिसमासविधायकसूत्रवार्तिकादीनां ज्ञानम्, पुंवद्भाव-उपसर्जनह्रस्वत्व-समासान्तप्रत्यय-विधायकसूत्रज्ञानम्, द्वन्द्वसमासलक्षणम्, चार्थनिर्वचनपूर्वकम् इतरेतरयोगस्य, समाहारस्य च लक्षणम्, पूर्वनिपातनियमज्ञानञ्च, एकशेषविधायकसूत्रवार्तिकज्ञानम् | बहुव्रीहिसमासाद्येक-शेषान्ताध्ययनम् | १+२ |
| | समानाधिकरणव्यधिकरण-बहुव्रीहिसमासविधायक-सूत्रवार्तिकादीनामर्थापनम्, पुंवद्भाव-उपसर्जनह्रस्वत्व-समासान्तप्रत्यय-पूर्वनिपातनियम-विधायकसूत्रार्थविवेचनम्, एकशेषविधायकसूत्रवार्तिकानामर्थापनम् | बहुव्रीहिसमासाद्येक-शेषान्ताध्ययनम् | ४ |
| | लौकिकालौकिकविग्रहप्रदर्शनपुरस्सरं सम्बद्धसूत्रवार्तिकार्थनिर्वचनपूर्विका प्रयोगसिद्धिप्रक्रिया | बहुव्रीहिसमासाद्येक-शेषान्ताध्ययनम् | ८ |
| ४. | वृत्तिविग्रहसमासादिलक्षणानि, समासान्तप्रत्ययाः, समासान्तप्रत्ययविधायकानां सूत्रवार्तिकादीनां ज्ञानम्, सोदाहरणानामलुगधिकारस्थसूत्रवार्तिकादीनां समासाश्रयविध्यन्तर्गतानां सूत्रवार्तिकादीनाञ्च ज्ञानम् | सर्वसमासशेषादिसमासाश्रय-विध्यन्ताध्ययनम् | १+१ |
| | सुपां सुपा तिङानाम्नेतिकारिकायाः, भवेद्वर्णागमाद्धंसेति कारिकायाश्चार्थापनम्, विग्रहप्रदर्शन-पूर्विका सम्बद्धसूत्रवार्तिकार्थनिर्वचनपूर्विका च प्रयोगसिद्धिप्रक्रिया । | सर्वसमासशेषादिसमा-साश्रयविध्यन्ताध्ययनम् | १२ |
| ५ | साधारणतद्धितप्रत्ययेषु अण्-ण्य-ञ-अञ्-ईकक्-ढक्-प्रत्ययनिष्पन्नानां शब्दानां सम्बद्धसूत्रार्थावबोधपूर्विका रूपसिद्धिप्रक्रिया<br>अपत्याधिकारे- नञ्-स्नञ्-अण्-इञ्-फिञ्-फक्-यञ्-च्फञ्-ढक्-ऐरक्-आरक्-छण्-ढञ्-यत्-घ-ख-अञ्-व्यत्-छ-व्यन्-ठक्-ण-फिञ्-ड्यण्- प्रत्ययनिष्पन्नानां शब्दानां सम्बद्धसूत्रार्थावबोधपूर्विका रूपसिद्धिप्रक्रिया<br>रक्ताद्यर्थे-ठक्-अन्-कन्-अण्-छ-ढक्-ड्यत्-इनि-अञ्-यत्-घन्-ट्यण्-घ-ठञ्-व्यत्-डुलच्-डामहच्-त-वुञ्-यञ्-यत्-ठक्-य-इनिप्रत्ययनिष्पन्नानां शब्दानां सम्बद्धसूत्रार्थावबोधपूर्विका रूपसिद्धिप्रक्रिया<br>चातुरर्थिके- अण्-अञ्-वुञ्-छ-क-ठच्-स-इनि-र-ढञ्-ण्य-य-फक्-फिञ्-ठक्-मतुप्-ड्मतुप्-ष्वलच्-वलच्-प्रत्ययनिष्पन्नानां शब्दानां सम्बद्धसूत्रार्थावबोधपूर्विका रूपसिद्धिप्रक्रिया<br>तस्येदमित्यपत्येऽपि....। गोत्रे स्वैकोनसङ्ख्यानां...। सिद्धे यस्येति लोपेन... । इति कारिकाणां सावतरणं व्याख्यानम् | अपत्याधिकारादिचातुर-र्थिकान्ताध्ययनम् | १६ |
| योगः | | | ७५ |

**कक्षा १२**

| क्र.सं | विषयक्षेत्रम् | प्रकरणानि | अङ्क भारः |
|---|---|---|---|
| १. | ‘शेषे’ इति सूत्रस्याधिकारत्वस्य विधित्वस्य च ज्ञानम्, शैषिके-अण्-घ-ख-य-खञ्-ढकञ्-ढक्-त्यक्-ष्फक्-यत्-ठक्-वुक्-त्यप्-ण-एत्य-टचु-टचुल्-अञ्-ञ-छस्-छ-ठञ्-खञ्-वुन्-वुञ्-म-छण्-णिनि-प्रत्ययविधायकानाम्, प्रग्दीव्यतीये-अण्-अञ्-मयट्-कन्-ठञ्-वुञ्-ढञ्-यत्प्रत्यय-विधायकानाम्, प्राग्वहतीये-ठक्-अण्-ठन्-ष्ठल्-ष्ठन्-छ-मप्-इनि-ण्य-अञ्-ण्यप्रत्ययविधायकानाम्, प्राग्घितीये-यत्-ढक्-ख-ठक्-अण्-ण-ञ्य-खञ्-ण्य-ठञ्-ढञ्-यप्रत्ययविधायकानाम्, छयद्विधौ-यत्-छ-थ्यन्-ख-ठञ्-ण-ढञ्-खञ्-अञ्-प्रत्ययविधायकानाम्, आर्हीयप्रकरणे-ठञ्-ठक्-ठन्-कन्-टिठन्-अण्-ख-ईकन्-यत्-ठञ्-छ-य-णिनिप्रत्ययविधायकानाम्, भावकर्मार्थे-वति-त्व-तल्-नञ्-स्नञ्-इमनिच्-ष्यञ्-य-ढक्-यक्-अञ्-अण्-वुञ्-प्रत्ययविधायकानाञ्च सूत्रवार्तिकादीनां ज्ञानम् । | शैषिकादिभावकर्मा-द्यन्ताध्ययनम् | १+२ |
| | शैषिके-अण्-घ-ख-य-खञ्-ढकञ्-ढक्-त्यक्-ष्फक्-यत्-ठक्-वुक्-त्यप्-ण-एत्य-टचु-टचुल्-अञ्-ञ-छस्-छ-ठञ्-खञ्-वुन्-वुञ्-म-छण्-णिनि-प्रत्ययविधायकानाम्, प्रग्दीव्यतीये-अण्-अञ्-मयट्-कन्-ठञ्-वुञ्-ढञ्-यत्प्रत्ययविधायकानाम्, प्राग्वहतीये-ठक्-अण्-ठन्-ष्ठल्-ष्ठन्-छ-मप्-इनि-ण्य-अञ्-ण्यप्रत्ययविधायकानाम्, प्राग्घितीये-यत्-ढक्-ख-ठक्-अण्-ण-ञ्य-खञ्-ण्य-ठञ्-ढञ्-यप्रत्ययविधायकानाम्, छयद्विधौ-यत्-छ-थ्यन्-ख-ठञ्-ण-ढञ्-खञ्-अञ् प्रत्ययविधायकानाम्, आर्हीयप्रकरणे-ठञ्-ठक्-ठन्-कन्-टिठन्-अण्-ख-ईकन्-यत्-ठञ्-छ-य-णिनिप्रत्ययविधायकानाम्, भावकर्मार्थे-वति-त्व-तल्-नञ्-स्नञ्-इमनिच्-ष्यञ्-य-ढक्-यक्-अञ्-अण्-वुञ्-प्रत्ययविधायकानाञ्च सूत्रवार्तिकादीनां ज्ञानम् । | शैषिकादिभावकर्मा-द्यन्ताध्ययनम् | ४ |
| | शैषिके-अण्-घ-ख-य-खञ्-ढकञ्-ढक्-त्यक्-ष्फक्-यत्-ठक्-वुक्-त्यप्-ण-एत्य-टचु-टचुल्-अञ्-ञ-छस्-छ-ठञ्-खञ्-वुन्-वुञ्-म-छण्-णिनि-प्रत्ययविधायकानाम्, प्रग्दीव्यतीये-अण्-अञ्-मयट्-कन्-ठञ्-वुञ्-ढञ्-यत्प्रत्ययविधायकानाम्, प्राग्वहतीये-ठक्-अण्-ठन्-ष्ठल्-ष्ठन्-छ-मप्-इनि-ण्य-अञ्-ण्यप्रत्ययविधायकानाम्, प्राग्घितीये-यत्-ढक्-ख-ठक्-अण्-ण-ञ्य-खञ्-ण्य-ठञ्-ढञ्-यप्रत्ययविधायकानाम्, छयद्विधौ-यत्-छ-थ्यन्-ख-ठञ्-ण-ढञ्-खञ्-अञ्प्रत्ययविधायकानाम्, आर्हीयप्रकरणे-ठञ्-ठक्-ठन्-कन्-टिठन्-अण्-ख-ईकन्-यत्-ठञ्-छ-य-णिनिप्रत्ययविधायकानाम्, भावकर्मार्थे-वति-त्व-तल्-नञ्-स्नञ्-इमनिच्-ष्यञ्-य-ढक्-यक्-अञ्-अण्-वुञ्-प्रत्ययनिष्पन्नानां शब्दानां सम्बद्धसूत्रवार्तिकार्थावबोधपूर्विका रूपसिद्धिप्रक्रिया । आकर्षात्पर्पादेर्भस्त्रादिभ्य इत्यादिश्लोकवार्तिकव्याख्यानम् | शैषिकादिभावकर्मा-द्यन्ताध्ययनम् | ८ |
| २. | मत्वर्थीये-खञ्-ढक्-यत्-ख-छ-कुणप्-जाहच्-ति-चुञ्चुप्-चणप्-ना-नाञ्-शालच्-शङ्कटच्-कटच्-पटच्-गोयुगच्-तैलच्-शाकट्-शाकिन्-कुटारच्-टीटञ्-नाटच्-विडच्-भ्रटच्-इनच्-इतच्-द्वयसच्-दघ्नच्-मात्रच्-अण्-वतुप्-डति-तयप्-अयच्-ढ-मयट्-डट्-थुक्-तिथुक्-तीय-तमट्-वुन्-कन्-णिनि-ठक्-ठञ्-इनि-अञ्-ठन्-मतुप्-लच्-श-न-इलच्-विनि-उरच्-र-म-व-ईरन्-ईरच्-वलच्-यप्-आरकन्-इनच्-आलु-एलु-ऊल-तप्-युस्-ग्मिनि-आलच्-आट्च्-अच्-आमिनिच्-ब-भ-ति-त-युस् प्रत्ययविधायकानाम्, प्राग्दिशीये-तसिल्-त्रल्-ह-अत्-दा-र्हिल्-अधुना-दानीम्-द्य-द्युस्-थाल्-थमु प्रत्ययविधायकानाम्, प्रागिवीये-अस्ताति-असि-अतसुच्-अति-एनप्-आच्-आहि-धा-धमुञ्-पाशप्-चरट्-रूपय-तमप्-इष्ठन्-तरप्-ईयसुन्-रूपप्-कल्पप्-देश्य-देशीयर्-बहच्-जातीयर्-अकच्-क-ठच्-घन्-इलच्-अडच्-वुच्-कन्-र-डुपच्-ष्टरच्-डतरच्-डतमच् प्रत्ययविधायकानाम्, स्वार्थिके-कन्-ढञ्-ढ्-य-छ-अण्-ठक्-ठच्-ईकक्-ञ्य-ञ्यट्-टेण्यण्-छ-अञ्-यञ्-वुन्-कन्-ख-कृत्वसुच्-सुच्-धा-मयट्-यत्-तनप्-धेय-ञ्य-तल्-क-कन्-ठक्-तिकन्-सा-स्ना-श-तसि-च्वि-इनच्-ताति-डाच् प्रत्ययविधायकानां सूत्राणां वार्तिकानाञ्च ज्ञानम् | मत्वर्थीयादिद्विरुक्ता-न्ताध्ययनम् | २+१ |
| | मत्वर्थीये-खञ्-ढक्-यत्-ख-छ-कुणप्-जाहच्-ति-चुञ्चुप्-चणप्-ना-नाञ्-शालच्-शङ्कटच्-कटच्-पटच्-गोयुगच्-तैलच्-शाकट्-शाकिन्-कुटारच्-टीटञ्-नाटच्-विडच्-भ्रटच्-इनच्-इतच्-द्वयसच्-दघ्नच्-मात्रच्-अण्-वतुप्-डति-तयप्-अयच्-ढ-मयट्-डट्-थुक्-तिथुक्-तीय-तमट्-वुन्-कन्-णिनि-ठक्-ठञ्-इनि-अञ्-ठन्-मतुप्-लच्-श-न-इलच्-विनि-उरच्-र-म-व-ईरन्-ईरच्-वलच्-यप्-आरकन्-इनच्-आलु-एलु-ऊल-तप्-युस्-ग्मिनि-आलच्-आट्च्-अच्-आमिनिच्-ब-भ-ति-त-युस् प्रत्ययविधायकानाम्, प्राग्दिशीये-तसिल्-त्रल्-ह- | मत्वर्थीयादिद्विरुक्ता-न्ताध्ययनम् | ४ |

| | | | |
|---|---|---|---|
| | अत्-दा-र्हिल्-अधुना-दानीम्-द्य-द्युस्-थाल्-थमु प्रत्ययविधायकानाम्, प्रागिवीये-अस्ताति-असि-अतसुच्-अति-एनप्-आच्-आहि-धा-धमुञ्-पाशप्-चरट्-रूपय-तमप्-इष्ठन्-तरप्-ईयसुन्-रूपप्-कल्पप्-देश्य-देशीयर्-बहच्-जातीयर्-अकच्-क-ठच्-घन्-इलच्-अडच्-वुच्-कन्-र-डुपच्-ष्टरच्-डतरच्-डतमच् प्रत्ययविधायकानाम्, स्वार्थिके-कन्-ढञ्-ढ्-य-छ-अण्-ठक्-ठच्-ईकक्-ञ्य-ञ्यट्-टेण्यण्-छ-अञ्-यञ्-वुन्-कन्-ख-कृत्वसुच्-सुच्-धा-मयट्-यत्-तनप्-धेय-ञ्य-तल्-क-कन्-ठक्-तिकन्-सा-स्ना-श-तसि-च्वि-इनच्-ताति-डाच् प्रत्ययविधायकानां सूत्रवार्तिकादीनामर्थापनम् | | |
| | मत्वर्थीये-खञ्-ढक्-यत्-ख-छ-कुणप्-जाहच्-ति-चुञ्चुप्-चणप्-ना-नाञ्-शालच्-शङ्कटच्-कटच्-पटच्-गोयुगच्-तैलच्-शाकट्-शाकिन्-कुटारच्-टीटञ्-नाटच्-विडच्-भ्रटच्-इनच्-इतच्-द्वयसच्-दघ्नच्-मात्रच्-अण्-वतुप्-डति-तयप्-अयच्-ढ-मयट्-डट्-थुक्-तिथुक्-तीय-तमट्-वुन्-कन्-णिनि-ठक्-ठञ्-इनि-अञ्-ठन्-मतुप्-लच्-श-न-इलच्-विनि-उरच्-र-म-व-ईरन्-ईरच्-वलच्-यप्-आरकन्-इनच्-आलु-एलु-ऊल-तप्-युस्-ग्मिनि-आलच्-आट्च्-अच्-आमिनिच्-ब-भ-ति-त-युस्प्रत्ययविधायकानाम्, प्राग्दिशीये-तसिल्-त्रल्-ह-अत्-दा-र्हिल्-अधुना-दानीम्-द्य-द्युस्-थाल्-थमुप्रत्ययविधायकानाम्, प्रागिवीये-अस्ताति-असि-अतसुच्-अति-एनप्-आच्-आहि-धा-धमुञ्-पाशप्-चरट्-रूपय-तमप्-इष्ठन्-तरप्-ईयसुन्-रूपप्-कल्पप्-देश्य-देशीयर्-बहच्-जातीयर्-अकच्-क-ठच्-घन्-इलच्-अडच्-वुच्-कन्-र-डुपच्-ष्टरच्-डतरच्-डतमच्प्रत्ययविधायकानाम्, स्वार्थिके-कन्-ढञ्-ढ्-य-छ-अण्-ठक्-ठच्-ईकक्-ञ्य-ञ्यट्-टेण्यण्-छ-अञ्-यञ्-वुन्-कन्-ख-कृत्वसुच्-सुच्-धा-मयट्-यत्-तनप्-धेय-ञ्य-तल्-क-कन्-ठक्-तिकन्-सा-स्ना-श-तसि-च्वि-इनच्-ताति-डाच्प्रत्ययनिष्पन्नानां शब्दानां सम्बद्धसूत्रवार्तिकार्थावबोधपूर्विका रूपसिद्धिप्रक्रिया<br>भूमनिन्दाप्रशंसासु...इति कारिकायाः सावतरणं व्याख्यानम् ।<br>सन्दर्भपूर्विकाया आहुस्त्रिगर्तषष्ठांस्तु...इति कारिकाया व्याख्या, द्विरुक्ते-द्विरुक्तप्रक्रियया शब्दव्युत्पादनविधिः, सन्दर्भपूर्विकाया दलद्वये टाबभावः... इति कारिकाया व्याख्या, सम्बद्धसूत्रवार्तिकार्थावबोधपूर्विका रूपसिद्धिप्रक्रिया च । | मत्वर्थीयादिद्विरुक्ता-न्ताध्ययनम् | ८ |
| ३. | भ्वादिप्रकरणे- श्रीत्रार्हन्तीचणैर्गुण्यैरित्यादि- मङ्गलाचरणपद्यव्याख्या, दशलकाराणां परिचयः, लकाराणामर्थनिर्धारणम्, लकारार्थतिङाञ्च व्यवस्थापकानि सूत्राणि- वर्तमाने लट्, लः कर्मणि च ..., लस्य, तिप्तस्झि ..., लः परस्मैपदम्, तङानावात्मनेपदम्, अनुदात्तङितः ..., स्वरितञितः ..., शेषात्कर्तरि, तिङस्त्रीणि ..., तान्येकवचन..., युष्मद्युपपदे ..., प्रहासे च, अस्मद्युत्तमः, शेषे प्रथमः, परोक्षे लिट्, अनद्यतने लुट्, लृट् शेषे च, लोट् च, आशिषि लिङ्लोटौ, अनद्यतने लङ्, विधिनिमन्त्रणामन्त्रणाधीष्ट ..., लुङ्, लिङ्निमित्ते लृङ् ... प्रभृतिसूत्राणां ज्ञानम् । कर्तृकर्मभाववाच्यानामभिप्रायः सकर्मकाकर्मकधातूनां परिचयः, सकर्मकाकर्मकेभ्यो धातुभ्यो लकारव्यवस्था ..., भूतभविष्यद्वर्तमानकालवर्गीकरणानि, अनुबन्धप्रयुक्तधातोः परस्मैपदात्मनेपदविभक्तिव्यवस्था, लादेशानां तिङां परिचयः, परस्मैपदात्मनेपदानां लादेशानां विभागः, लादेशेषु वचनपुरुषनिर्धारणम्, सार्वधातुकार्धातुकत्वादिव्यवस्था । | लकारार्थानां तिङाञ्चा-ध्ययनम् | १+१ |
| | भ्वादिप्रकरणे- दशलकाराणां परिचयः, लकाराणामर्थनिर्धारणम्, लकारार्थतिङाञ्च व्यवस्थापकानि सूत्राणि- वर्तमाने लट्, लः कर्मणि च ..., लस्य, तिप्तस्झि ..., लः परस्मैपदम्, तङानावात्मनेपदम्, अनुदात्तङितः ..., स्वरितञितः ..., शेषात्कर्तरि, तिङस्त्रीणि ..., तान्येकवचन..., युष्मद्युपपदे ..., प्रहासे च, अस्मद्युत्तमः, शेषे प्रथमः, परोक्षे लिट्, अनद्यतने लुट्, लृट् शेषे च, लोट् च, आशिषि लिङ्लोटौ, अनद्यतने लङ्, विधिनिमन्त्रणामन्त्रणाधीष्ट ..., लुङ्, लिङ्निमित्ते लृङ् ...प्रभृतिसूत्राणामर्थापनम् । | लकारार्थानां तिङाञ्चा-ध्ययनम् | १२ |
| | भ्वादिप्रकरणे- श्रीत्रार्हन्तीचणैर्गुण्यैरित्यादि- मङ्गलाचरणपद्यव्याख्या<br>कर्तृकर्मभाववाच्यानाम् अभिप्रायः सकर्मकाकर्मकधातूनां परिचयः, सकर्मकाकर्मकेभ्यो धातुभ्यो लकारव्यवस्थाः, भूतभविष्यद्वर्तमान-कालवर्गीकरणानि, अनुबन्धप्रयुक्तधातोः परस्मैपदात्मनेपदविभक्तिव्यवस्थाः, लादेशानां तिङाञ्च परिचयः, परस्मैपदात्मनेपदानां लादेशानां विभागः, लादेशेषु वचनपुरुषनिर्धारणम्, सार्वधातुकार्धातुकत्वादिव्यवस्थाया बोधः | | |
| ४. | भ्वादिगणस्थानां भूधातोः कमुकान्तौधातुपर्यन्तानाम् धातूनां सूत्रवार्तिकानां रूपावलिनां च | भ्वादिगणस्थानां भूधातोः कमुकान्तौधातुपर्यन्ताना- | १+२ |

| | | | |
|---|---|---|---|
| | ज्ञानम् | मध्ययनम् | |
| | संहितैकपदे नित्या ..., उपसर्गेण धात्वर्थः ..., शितपा शपानुबन्धेन ..., ऊदृदन्तैर्यौति ..., सेक्सृप्सृ ..., अजन्तो-ऽकारवान् वा ..., संज्ञायाः कार्यकालत्वात् ... इत्यादिपद्यानां सावतरणं सोदाहरणञ्च व्याख्यानम् । निर्धारितानां धातुसाधितानां रूपाणां वाक्येषु प्रयोगव्यापारश्च । | भ्वादिगणस्थानां भूधातोः कमुकान्तौधातुपर्यन्ताना-मध्ययनम् | ४ |
| | भ्वादिगणस्थानां भूधातोः कमुकान्तौधातुपर्यन्तानाम् धातूनां सूत्रवार्तिकार्थसङ्घटनपूर्विका रूपसाधनप्रक्रिया, रूपावलिश्च । | भ्वादिगणस्थानां भूधातोः कमुकान्तौधातुपर्यन्ताना-मध्ययनम् | ८ |
| ५ | भ्वादिगणस्थानां शब्दार्थक-अण् धातोरारभ्य गतिवृद्ध्यर्थक-टुओश्विधातुपर्यन्तानां सूत्रवार्तिकानां रूपावलिनां ज्ञानम्<br>भ्वादिगणस्थानां शब्दार्थक-अण् धातोरारभ्य गतिवृद्ध्यर्थक-टुओश्विधातुपर्यन्तानां धातूनां सूत्रवार्तिकार्थसङ्घटनपूर्विका रूपसाधनप्रक्रिया, रूपावलिश्च । निर्धारितानां धातुसाधितानां रूपाणां वाक्येषु प्रयोगव्यापारश्च । | भ्वादिगणस्थानां शब्दार्थक-अण् धातोरारभ्य गति-वृद्ध्यर्थक-टुओश्विधातुपर्यन्तानामध्ययनम् | १६ |
| योगः | | | ७५ |

# सिद्धान्तज्योतिषम्

**कक्षा :** ११ र १२ **विषय सङ्केत :** [SIJ. 511] **(कक्षा ११)**, [SIJ. 512] **(कक्षा १२)**

**पाठ्यघण्टा :** ५ **वार्षिक कार्यघण्टा :** १६०

## १. परिचयः

सिद्धान्तज्योतिषविषयस्य पाठ्यक्रमः क्षेत्रमिति-मुहूर्त-जातक-ग्रहगणित-खगोलीयविषयाणां सैद्धान्तिकानां व्यावहारिकाणां च पक्षाणां पठनपाठनयोरुद्देश्येन विकसितो वर्तते । एतदर्थं २०७६ विक्रमवर्षीयस्य राष्ट्रियपाठ्यक्रमप्रारूपस्य मार्गदर्शनानुसारेण विद्यालयशिक्षाया माध्यमिकरस्तरे (एकादश्यां द्वादश्याञ्च कक्षयोः) सिद्धान्तज्योतिषविषयस्य एतस्मिन् पाठ्यक्रमे विषयवस्तूनां बोधस्तद्विश्लेषणञ्च, सम्बद्धविषयवस्तूनां व्यावहारिकः प्रयोगः, निर्दिष्टजातकविषयाणामाधारे फलादेशस्तत्परीक्षणञ्च, ग्रहस्पष्टीकरण-पञ्चाङ्गनिर्माण-त्रिप्रश्नग्रहणादिविषयाणां विमर्शः, व्रतोपवासयात्रादीनां तथा संस्कारसम्बद्धधार्मिक-सांस्कृतिक-व्यावहारिकविषयाणां च विमर्शनम्, ज्योतिषसम्बद्धविषयाणां बोध-व्यावहारिकसामर्थ्यपरीक्षणपरं मूल्याङ्कनञ्च कृत्वा अधीतविषयाणां बोधो बुद्धविषयाणामभिव्यक्तिसामर्थ्यञ्च छात्रेषु स्यादिति हेतोर्बोधाभिव्यक्त्योरुल्लेखोऽपि विहितो विद्यते । एतस्माद् वर्तमानसन्दर्भे ज्योतिषमितोऽपि व्यावहारिकं निर्माय विद्यार्थिनां रुच्यकाङ्क्षे प्रपूर्य शिक्षाया राष्ट्रियोद्देश्यं प्राप्स्यते, एतस्य सान्दर्भिकतां विस्तार्य विधाय उपयुक्तता सुनिश्चिता च विधास्यते इत्यपेक्षितमस्ति । अनेन पाठ्यक्रमेण सम्बद्धविषये उच्चशिक्षाया आधारोऽपि निर्मास्यते इति चापेक्षितं वर्तते ।

संस्कृतवाङ्मयसम्बद्धशास्त्रीयविषयेषु ज्योतिषविषयो हि ज्ञानविज्ञानाश्रितो जनजीवन-सापेक्षकश्च वर्तते । ज्योतिषं खलु खगोलग्रहगणितज्ञानपरं तथापि विशेषरूपेणास्य फलादेशपक्षे जनजिज्ञासा जागर्ति । वर्तमानसमयेऽपि प्रत्यक्षरूपेण सामान्यजनजीवनसंपृक्तस्यास्य महत्त्वं सर्वातिशायि वर्तते । सूर्यादिग्रहाणां स्पष्टीकरणम्, पञ्चाङ्गसाधनम्, दिग्देशकालज्ञानम्, ताराग्रहाणां वक्रमार्गोदयास्तज्ञानम्, गणनागत-ग्रहणपरीक्षणं तदनु प्रातःस्मरणीयमुनिवृन्दरचितसंहिता-जातकादिग्रन्थानामाधारेण मानवजीवनेषु तेषां प्रभाव-परिज्ञानञ्चेति ज्योतिषशास्त्रस्य प्रमुखज्ञातव्यविषयाः सन्ति । शास्त्रमेतद् व्यक्ताव्यक्तगणितसाध्यमस्ति । ज्योतिषशास्त्रं विनास्माकं संस्कृतेर्ज्ञानं न भवति । संस्कृतिस्तु परम्परया सुसंस्कारेण च निर्मिता भवति । स्वसंस्कृतेर्यथार्थस्थितिज्ञानाय पञ्चाङ्गपत्रस्थविषयपरिज्ञानं जातकप्रभृतिफलादेशपरकज्योतिषग्रन्थाना-मध्ययनञ्च परममावश्यकम् । सरलतयैव पञ्चाङ्गगणनायै ग्रहाणां गतिस्थितिज्ञानाय च करणग्रन्थस्याध्ययनं परममावश्यकं भवति । साधितलग्नग्रहाणामाधारेण जातकस्य शुभाशुभफलकथने, आर्षपरम्परागतानां लगधार्यभटवराहमिहिरप्रभृतिज्योति-र्विद्ग्रथितानां सिद्धान्त-संहिता-होरासम्बद्धग्रन्थानामध्ययनं परमोपयोगिकञ्च भवति । अत एवास्मिन् पाठ्यक्रमे रेखागणितम्, जातकशास्त्रम्, करणग्रन्थाधारितं ग्रहस्थितिसाधनं खगोलीयपिण्डानामध्ययनञ्च समाविष्टमस्ति । अत्र कतिपयविषयाः सैद्धान्तिकरूपेण कतिपयविषयास्तु प्रयोगात्मकरूपेण पाठयितुं शक्यन्ते । सिद्धान्तज्योतिषाध्ययने समुत्सुकानां छात्राणां कृत एष पाठ्यक्रमो बहूपयोगी भविष्यतीति आशास्यते ।

परिचयम्, स्तरगतसक्षमताम्, कक्षागतशिक्षणोपलब्धिम्, विषयवस्तुनः क्षेत्रक्रमौ, शिक्षणसहजीकरणप्रक्रियाम्, विद्यार्थिमूल्याङ्कनञ्च समाविश्य पाठ्यक्रमोऽसौ विकासं नीतः । एतस्मिन् क्रमे पाठ्यक्रमलेखनस्य विकासस्य च विषयगतौचित्यम्, पाठ्यक्रमे विद्यमाना मुख्यविशेषताः, पाठ्यक्रमस्य स्वरूपञ्च संयोज्य परिचयं, विषयगतरूपेणापेक्षितं ज्ञानम्, शिल्पम्, अभिवृत्तिम्, मूल्यञ्च, कार्यतत्परतां संयोज्य एतस्याः क्रियात्मकस्वरूपे सक्षमताम्, शिक्षणस्य स्तरम्, सक्षमताया विशिष्टीकृतविस्तृतीकरणेन शिक्षणोपलब्धिम्, सक्षमताम्, पूर्वकक्षाभिस्सह लम्बीयसन्तुलनस्याधारे विषयवस्तुनो क्षेत्रक्रमौ च, विषयगतविशिष्टतामौलिकते संयोज्य शिक्षणसहजीकरणस्य विधिम्, प्रक्रियाञ्च, निर्माणात्मकनिर्णयात्मकमूल्याङ्कनयोर्विधिं प्रक्रियाञ्चोल्लिख्य विद्यार्थिमूल्याङ्कनं व्यवस्थितं वर्तते ।

## २. स्तरगतयोग्यताः

**माध्यमिकस्तरे ११-१२ कक्षयोः सिद्धान्तज्योतिषविषयमधीत्य विद्यार्थिनो निर्दिष्टविषयेषु क्षमा भविष्यन्ति –**

१. रेखागणितस्य निर्दिष्टसाध्यानां स्वरूपपरिज्ञाने तदुपपत्तिप्रदर्शने च

२. सामान्यव्यवहारे प्रयोज्यमानानां कर्मणां शुभमुहूर्तप्रयोगे

३. जन्मपत्रिकां निर्माय जातकशास्त्रोक्तविधिना तस्य शुभाशुभफलविवेचने

४. निर्दिष्टखगोलीयविषयाणां परिज्ञाने

५. ग्रहगणितप्रसङ्गे दिग्देशकालसाधने चन्द्रसूर्यग्रहणपरीक्षणे च

६. पराशरप्रतिपादितसिद्धान्तानुसारेण जातकफलविवेचने

७. विशेषरूपेण सन्दर्भागतविषयाणामवबोधने निर्दिष्टविषयाणामभिव्यक्तीकरणे च

**३. कक्षागतशिक्षणोपलब्धिः**

**कक्षा ११**

**माध्यमिकस्तरीयायां ११ कक्षायां सिद्धान्तज्योतिषविषयमधीत्य छात्रा अधो निर्दिष्टविषयेषु क्षमा भविष्यन्ति –**

१. रेखागणितस्य प्रथम-द्वितीयाध्यायान्तर्गतानां निर्दिष्टसाध्यानामुपस्थापने प्रतिपादने च

२. रेखागणितस्य तृतीय-चतुर्थाध्यायान्तर्गतानां निर्दिष्टसाध्यानामुपस्थापने प्रतिपादने च

३. विशिष्टजन्मपत्रिकानिर्माणे

४. जन्मपत्रिकाधारे सामान्यरूपेण भाव-दशाफलवर्णने

५. जन्मपत्रिकाधारे  भावानुरूप-दशा-योगफलवर्णने

६. जातकस्य जन्मकालिकग्रहस्थित्याधारेण शास्त्रोक्तविविधफलकथने

७. निर्दिष्टाकाशीयविषयाणां परिचयप्रदाने

**कक्षा १२**

**माध्यमिकस्तरीयायां १२ कक्षायां सिद्धान्तज्योतिषविषयमधीत्य छात्रा अधो निर्दिष्टविषयेषु क्षमा भविष्यन्ति –**

१. अहर्गणानयने ग्रहाणां ध्रुव-क्षेपज्ञाने च

२. अहर्गणोत्पन्नमध्यमग्रहसाधने

३. ग्रहाणां मध्यमगतिज्ञाने, मध्यमस्पष्टग्रहसाधने च

४. देशान्तरसंस्कारविधाने

५. ताराग्रहाणां वक्रमार्गोदयास्तज्ञाने

६. दिग्देशकालसाधने चन्द्रसूर्यग्रहणपरीक्षणे च

७. पराशरोक्तविधिना जातकस्य शुभाशुभफलकथने

**४. विषयवस्तूनां क्षेत्राणि क्रमश्च**

**कक्षा ११**

| **क्र.सं.** | **विषयक्षेत्राणि वा प्रकरणानि** | **विषयवस्तूनि** | **बोधः** | **प्रयोगः** | **शिक्षण घण्टाः** |
|---|---|---|---|---|---|
| १ | रेखागणितम् (वृत्तभिन्नम्) | १. रेखादीनां परिभाषाः, स्वयंसिद्धविषयाः सङ्केतचिह्नानि<br>२. अभीष्टरेखोपरि समत्रिभुजनिर्माणम् | समस्यास्वरूपज्ञानम्<br>विषयवस्तूनां स्वरूपज्ञानम्<br>रेखात्मकप्रस्तुति- | विषयवस्तूनां स्वरूपप्रतिपादनम्<br>क्षेत्रात्मकोऽभिव्यक्तिः | ३० |

| | | | | | |
|---|---|---|---|---|---|
| | | ३. इष्टबिन्दुतो निर्दिष्टरेखातुल्यरेखाकरणम्<br>४. इष्टबृहद्रेखातोऽभीष्टलघुरेखातुल्यखण्डरचना<br>५. भुजयोस्तदुत्पन्नकोणयोश्च साम्ये त्रिभुजयोः समत्वम्<br>६. समद्विबाहुत्रिभुज आधारलग्नकोणयोः समत्वम्, कोणयोः समत्वे भुजयोश्च समत्वम्<br>७. त्रिभुजे कोणयोस्तुल्यत्वे तत्सम्मुख-भुजयोश्च तुल्यत्वम्<br>८. त्रिभुजद्वयमध्ये यद्येकस्य भुजत्रयं क्रमाद् द्वितीयस्य भुजत्रयेण तुल्यं तदा त्रिभुजद्वयस्य मिथस्तुल्यता<br>९. त्रिभुजस्य एकभुजवर्धनेन बहिरुत्पन्न-कोणस्य स्वपार्श्वगतकोणं विहाय अन्यान्तःकोणाभ्यां महत्त्वम्<br>१०. त्रिभुजेऽन्तःकोणद्वययोगस्य समकोण-द्वयान्न्यूनत्वम्<br>११. त्रिभुजे बृहद्भुजसम्मुखकोणस्य लघुभुजसम्मुख-कोणादधिकत्वम्<br>१२. त्रिभुजे बृहत्कोणसम्मुखभुजस्य लघुकोणसम्मुख-भुजादधिकत्वम्<br>१३. त्रिभुजे द्वयोर्भुजयोर्योगस्तृतीयभुजान्महत्त्वम्<br>१४. अभीष्टरेखाया निर्दिष्टबिन्दूपरि निर्दिष्टकोणतुल्य-कोणनिर्माणम्<br>१५. त्रिभुजयोर्मध्ये भुजद्वयस्य तुल्यत्वे तदन्तरगत-कोणस्य स्थूलसूक्ष्मत्वे तदाधारस्यापि स्थूलसूक्ष्मत्वम्<br>१६. जात्यत्रिभुजे भुजकोट्योवर्गयोगस्य कर्णवर्ग-समानत्वम्<br>१७. रेखायाः खण्डद्वयकरणेन खण्डद्वयवर्ग-द्विघ्न-तत्खण्डद्वयघातयुक्तस्याभीष्टरेखावर्गसमानत्वम्<br>१८. रेखायाः खण्डद्वयकरणेन निर्दिष्टरेखैकखण्डयो-र्वर्गयोगस्तदेकखण्डनिर्दिष्टरेखयोद्विघ्नघात-द्वितीयवर्गयोगसमानत्वम्<br>१९. अधिककोणत्रिभुजे न्यूनकोणस्य सम्मुखभुजवर्धनेन कृते लम्बेऽधिककोणसम्मुखभुजवर्गोऽवशिष्टभुज-वर्गयोगाद् भुजतद्वर्धितभागयोर्द्विगुण घाताधिक्यम्<br>२०. निर्दिष्ट ऋजुभुजक्षेत्रसमं वर्गक्षेत्रकरणम् | कलाबोधः | उपपत्तिप्रदर्शनम्<br>तुलनात्मकं विश्लेषणं तदुपयोगश्च<br>व्यावहारिकप्रयोगः | |
| २ | रेखागणितम्<br>(वृत्ताधारितम्) | १. वृत्तस्य केन्द्रान्वेषणम्<br>२. वृत्ते व्यासरेखायाः पूर्णज्यार्धकरणम्, तस्य लम्बत्वसम्पादनम्, लम्बभूतायाः | समस्यास्वरूपज्ञानम्<br>विषयवस्तूनां स्वरूपज्ञानम् | विषयवस्तूनां स्वरूपप्रतिपादनम्<br>क्षेत्रात्मकोऽभिव्यक्तिः | ३० |

| | | | | | |
|---|---|---|---|---|---|
| | | व्यासरेखायाः पूर्णज्यार्धकरणञ्च<br>३. यदि द्वयोर्वृत्तयोरन्तःस्पर्शो बहिःस्पर्शो वा भवति तदा तयोः वर्धितकेन्द्रगतरेखायाः स्पर्शबिन्दुतो गमनम् ।<br>४. वृत्ते तुल्यजीवयोः केन्द्रात् समानदूरत्वम्, समानान्तरजीवयोस्तुल्यता च<br>५. जीवासु व्यासस्य महत्ता, केन्द्रतो दूरस्थजीवातो निकटस्थजीवाया बृहत्ता, बृहज्जीवायाः केन्द्रसमीपता च<br>६. एकस्मिन्नेव चापाधारे निर्मितस्य परिधिकोणात् केन्द्रीयकोणस्य द्विगुणता<br>७. एकस्मिन्नेव चापेऽन्तर्गतकोणानां समानता<br>८. वृत्तान्तर्गतस्य चतुर्भुजस्य सम्मुखकोणद्वययोगस्य समकोणतुल्यत्वम्<br>९. समानवृत्तेषु केन्द्रपरिधिकोणयोस्तुल्यत्वेन कोणा-श्रितचापानां च तुल्यता<br>१०. समानवृत्तानां समानचापखण्डगत-केन्द्रपरिधि-कोणानां समानता<br>११. जीवावृत्तयोस्तुल्यत्वेन तन्निर्मित- चापानां तुल्यता<br>१२. वृत्तचापयोस्तुल्यत्वे जीवानां तुल्यता<br>१३. वृत्तार्धसमेऽल्पेऽधिके चापे तदन्तर्गतकोणस्य क्रमेण समोऽधिकन्यूनकोणत्वम्<br>१४. वृत्तरेखास्पर्शबिन्दुतो वृत्तच्छेदनरेखाकरणे यौ कोणौ जायेते तयोरेकान्तरचापान्तःकोणसमत्वम्<br>१५. वृत्ते तद्व्यासाल्पनिर्दिष्टरेखातुल्यं जीवाकरणम्<br>१६. निर्दिष्टत्रिभुजकोणतुल्यं वृत्तान्तर्गतत्रिभुजनिर्माणम्<br>१७. निर्दिष्टत्रिभुजकोणतुल्यवृत्तोपरिगत्रिभुजनिर्माणम्<br>१८. अभीष्टत्रिभुजान्तर्गतवृत्तनिर्माणम्<br>१९. अभीष्टत्रिभुजोपरिगतवृत्तनिर्माणम्<br>२०. अभीष्टवृत्तान्तर्गतवर्गक्षेत्रनिर्माणम्<br>२१. अभीष्टवृत्तोपरिगतवर्गक्षेत्रनिर्माणम्<br>२२. अभीष्टवर्गक्षेत्रान्तर्गतवृत्तनिर्माणम्<br>२३. अभीष्टवर्गक्षेत्रोपरिगतवृत्तनिर्माणम् | रेखात्मकप्रस्तुति-कलाबोधः | उपपत्तिप्रदर्शनम्<br>तुलनात्मकं विश्लेषणं तदुपयोगश्च<br>व्यावहारिकप्रयोगः | |

| | | | | | |
|---|---|---|---|---|---|
| ३ | विशेषजन्म-पत्रिका तदनुरूप-फलादेशश्च | १. प्रामाणिकसूर्योदयः स्थानीयसूर्योदयश्च<br>२. पञ्चाङ्गपरिवर्तनम्<br>३. भयातम्, भभोगोऽवकहडाचक्रञ्च<br>४. विभिन्नदेशस्य विभिन्नस्थानानां तात्कालिकस्पष्टग्रहाः<br>५. विविधस्थानस्य कृते लग्नम्<br>६. ग्रहाणां बाल्याद्यवस्थाः<br>७. ग्रहाणामुच्चनीच-वक्र-मार्गावस्थाः<br>८. दशमलग्नं ससन्धिद्वादशभावाश्च<br>९. भुक्तोन-विंशोत्तरी-त्रिभागी-योगिनीदशासाधनम्<br>१०. विशिष्टजन्मपत्रिका<br>११. जन्मपत्रिकाधारेण सामान्यफलादेशः<br>१२. भावफलम्<br>१३. षड्वर्गभावकुण्डलीषु ग्रहस्थितिवशात् विशेषफलम्<br>१४. विंशोत्तरी-योगिनी-दशाधारेण फलादेशः<br>१५. मूलवृक्षस्य शाखाः, मूलनिवासस्थानं तत्फलञ्च<br>१६. व्रतपत्रिका, विवाहपत्रिका च | प्रामाणिक-स्थानीय-समयान्तरज्ञानम्<br>पञ्चाङ्गपरिवर्तन-ज्ञानम्<br>नक्षत्रनामाद्याक्षरज्ञानम्<br>स्पष्टग्रहसाधनप्रक्रिया-ज्ञानम्<br>लग्नसाधनप्रक्रिया-ज्ञानम्<br>ग्रहाणां बाल्याद्यवस्था-ज्ञानम्<br>नक्षत्रदशासाधनप्रक्रिया-ज्ञानम्<br>जन्मपत्रिकानिर्माण-ज्ञानम्<br>गण्डनक्षत्रज्ञानम्<br>व्रतबन्ध-विवाहलग्नानां स्वरूपादीनां क्षेत्राणां ज्ञानम् | प्रामाणिक-स्थानीय-समयान्तरसाधनम्<br>पञ्चाङ्गपरिवर्तनम्<br>नक्षत्रनामाद्याक्षरसाधनम्<br>स्पष्टग्रहसाधनम्<br>लग्नसाधनम्<br>ग्रहाणां बाल्याद्यवस्था-कथनम्<br>नक्षत्रदशासाधनम्<br>जन्मपत्रिकानिर्माणम्<br>गण्डनक्षत्रजन्मफलकथनम्<br>व्रतबन्ध-विवाहलग्न-पत्रिकालेखनम् | २५ |
| ४ | जातकफलादेशः | १. उपचयानुपचयभावलक्षणम्<br>२. ग्रहस्वरूपम्<br>३. कालपुरुषस्यात्मादिसंज्ञा<br>४. ग्रहाणां दृष्टिः<br>५. ग्रहाणां मित्रामित्राणि<br>६. गर्भे पुरुषस्त्रीज्ञानम्<br>७. यमलयोगः<br>८. चान्द्रयोगानां लक्षणानि फलानि च<br>९. द्वित्रिग्रहयोगः<br>१०. भावफलम्<br>११. लग्नगतचन्द्रफलम्<br>१२. लग्नगतसूर्यफलम्<br>१३. स्वक्षेत्रगतग्रहफलम्<br>१४. उच्चगतग्रहफलम्<br>१५. नीचगतग्रहफलम्<br>१६. नाभसयोगानां लक्षणानि फलानि च<br>१७. स्त्रीणामाकाररूपशीलादिज्ञानम्<br>१८. विधवा-पतित्यक्ता-कुलटा-ब्रह्मवादिनी- | उपचयानुपचय-स्थानज्ञानम्<br>कालपुरुषस्यात्मादि-संज्ञाज्ञानम्<br>ग्रहाणां शत्रुमित्रज्ञानम्<br>चान्द्रयोगज्ञानम्<br>ग्रहयोगलक्षणज्ञानम्<br>भावफलज्ञानम्<br>नवमांशज्ञानम्<br>नाभसयोगज्ञानम्<br>स्त्रीजातकवैशिष्ट्य-ज्ञानम् | उपचयानुपचयस्थानप्रदर्शनम्<br>कालपुरुषस्यात्मादिसंज्ञा-कथनम्<br>ग्रहाणां शत्रुमित्रनिर्धारणम्<br>चान्द्रयोगफलवर्णनम्<br>ग्रहयोगफलवर्णनम्<br>भावफलवर्णनम्<br>नवमांशफलवर्णनम्<br>नाभसयोगफलकथनम्<br>स्त्रीजातकफलकथनम् | २५ |

| | | | | | |
|---|---|---|---|---|---|
| | | स्त्रीणां लक्षणानि फलानि च<br>१९. मृत्युकारणम्, मृत्युस्थानानि, देवलोकादिगति-मोक्षस्थितिश्च | | | |
| ५ | आधुनिकं ज्योतिषम् | खगोलः (परिचयः), भूगोलः (परिचयः), अक्षांशः, देशान्तरम्, पलभा, क्रान्तिः, चरः, अयनांशः, उत्तरायणम्, दक्षिणायनम्, उत्तरगोलः, दक्षिणगोलः, स्वस्तिकम्, समस्थानम्, लग्नम्, रेखादेशः, स्वदेशः, निरक्षदेशः, विषुवद् दिनम्, भुजांशः, शरः, भूभा, वलनम्, नतिः, लम्बनम्, ध्रुवस्थानम्, गुरुत्वाकर्षणं गुरुत्वबलञ्च, चन्द्रकला, चन्द्रपृष्ठविषयकं मतम्, ग्रहाणामुदयास्तलक्षणम्, ग्रहाणां वक्रगतिपरिचायका नूतनव्याख्या, टालमी गणकस्य ग्रहगतिसिद्धान्तः, धूमकेतवः, नक्षत्रमण्डलानि, नक्षत्रस्तबकाः, आकाशगङ्गा, घटिकायन्त्रम् (धूपघडी), नलिकायन्त्रम्, दूरदर्शकयन्त्रम्, वेधशाला च । | गोलीय-क्षेत्र-नियामकानां विषयाणां परिज्ञानम्<br>आकाशीयपिण्ड-विषयकज्ञानम्<br>आकर्षणसिद्धान्त-विषयकज्ञानम्<br>नक्षत्रस्तवकविषय-ज्ञानम्<br>ग्रहाणामुदयास्तमार्ग-वक्रावस्थाज्ञानम्<br>ग्रहगतिसिद्धान्तज्ञानम्<br>आकाशीयपिण्डानाम -<br>वलोकनेऽर्वाचीनरीति ज्ञानम् | गोलीयनियामकानां वर्णनम्<br>आकाशीयपिण्डविषय-काभिव्यक्तिः<br>आकर्षणसिद्धान्तविषयकं व्याख्यानम्<br>नक्षत्रस्तवकविषयवर्णनम्<br>ग्रहाणामुदयास्तमार्गवक्रा-वस्थानां चित्रात्मिका प्रस्तुतिः<br>ग्रहगतिसिद्धान्तव्याख्यानम्<br>आकाशीयपिण्डानामव-लोकनेऽर्वाचीनरीतेः प्रयोगः | १० |
| सैद्धान्तिकाभ्यासः | | | | | १२० |
| प्रयोगात्मकाभ्यासः | | | | | ४० |
| योगः | | | | | १६० |

**कक्षा १२**

| क्र.सं. | विषयक्षेत्राणि वा प्रकरणानि | विषयवस्तूनि | बोधः | प्रयोगः | शिक्षण घण्टाः |
|---|---|---|---|---|---|
| १ | मध्यमग्रह-साधनं रविचन्द्र-स्पष्टीकरणञ्च | १. वेदग्रहलाघवयोः समानोत्कर्षता<br>२. ग्रहलाघवरामचन्द्रयोः स्मरणे समानता<br>३. अहर्गणानयनम्<br>४. ग्रहाणां ध्रुवक्षेपकाः<br>५. अहर्गणोत्पन्नग्रहे ध्रुवक्षेपकसंस्कारविधानम्, चन्द्रमसि देशान्तरसंस्कारविधानञ्च<br>६. अहर्गणोत्पन्नग्रहसाधनम्<br>७. ग्रहाणां मध्यमगतिकला, ग्रहलाघवोक्तग्रहाणामन्यग्रन्थसाधित-ग्रहयोस्तुलना<br>८. भुजकोटिसाधनम्, सूर्यमन्दोच्चज्ञानम्, रविचन्द्रयोर्मन्दफलानयनम्, तयोः स्पष्टीकरणञ्च<br>९. रविचन्द्रयोः स्पष्टगतिसाधनम् | वेदग्रहलाघवयोः समत्वज्ञानम्,<br>ग्रहलाघव-रामचन्द्रस्मरणे समानत्वज्ञानञ्च<br>अहर्गणानयनज्ञानम्<br>ग्रहाणां ध्रुव-क्षेपकज्ञानम्<br>अहर्गणोत्पन्नग्रहे ध्रुवक्षेपकसंस्कारविधि-ज्ञानम्<br>ग्रहाणां मध्यमगति-कलाज्ञानम्<br>भुजकोटि-सूर्यमन्दोच्चज्ञानम् | वेदग्रहलाघवयोः समत्ववर्णनम्,<br>ग्रहलाघवरामचन्द्रस्मरणे समानत्वकथनम्<br>अहर्गणसाधनम्<br>अहर्गणोत्पन्नमध्यमग्रहानयनम्<br>ग्रहलाघवोक्तसाधितग्रहाणा-मन्यग्रन्थसाधितग्रहैः सह समीक्षणम्<br>भुजकोट्यानयनम्<br>रविचन्द्रयोः स्पष्टगतिसाधन-ज्ञानम्<br>पलभाचरखण्डानयनम् | २५ |

| | | | | | |
|---|---|---|---|---|---|
| | | १०. पलभा-चरखण्डानामानयनम्<br>११. चर-भुजफलसाधनम्, तत्संस्कारविधिदर्शन-मयनांशानयनञ्च<br>१२. तिथि-नक्षत्र-योग-करणानां साधनम् | रविचन्द्रयोः स्पष्टगतिसाधनज्ञानम्<br>पलभाचरखण्डज्ञानम्<br>चर-भुजफलज्ञानम्<br>तिथि-नक्षत्र-योग-करणानां साधनज्ञानम् | चर-भुजफलसाधनम्<br>तिथि-नक्षत्र-योग-करणानां साधनम् | |
| २ | पञ्चतारा-स्पष्टीकरणम् | १. पञ्चताराणां शीघ्राङ्काः<br>२. पञ्चताराणां शीघ्रफलानि<br>३. पञ्चताराणां मन्दाङ्क-मन्दकेन्द्राणि<br>४. पञ्चताराणां मन्दफलानि<br>५. पञ्चताराणां स्पष्टीकरणे फलसंस्कारप्रकारः<br>६. पञ्चताराणां मन्दस्पष्टगतिसाधनप्रकारः<br>७. पञ्चताराणां गतिस्पष्टीकरणप्रक्रिया<br>८. कुज-शुक्रयोर्गतिस्पष्टीकरणे विशेषविधिः<br>९. बुध-शुक्र-भौमानां गतिफलसाधने विशेषप्रक्रिया<br>१०. भौमादीनां वक्रमार्गकेन्द्रांशानयनम्<br>११. कुज-गुरु-शनीनामुदयास्तकेन्द्रांशाः<br>१२. बुध-शुक्रयोरुदयास्तकेन्द्रांशाः<br>१३. पञ्चताराणां वक्रोदयादिगतैष्यदिनसाधन-प्रकारः<br>१४. पञ्चताराणां पूर्वास्तादन्तरं पश्चिमोदय-वक्र-पश्चिमास्त-पूर्वोदय-मार्गादीनां ज्ञानोपायाश्च | पञ्चताराणां शीघ्राङ्कज्ञानम्<br>पञ्चताराणां शीघ्रफलज्ञानम्<br>पञ्चताराणां मन्दाङ्कमन्दकेन्द्रज्ञानम्<br>पञ्चताराणां मन्दफलज्ञानम्<br>पञ्चताराणां स्पष्टीकरणे फल-संस्कारविधिज्ञानम्<br>पञ्चताराणां मन्दस्पष्टगतिसाधन-प्रकारज्ञानम्<br>कुजशुक्रयोर्गति स्पष्टीकरणे विशेषविधि-ज्ञानम्<br>कुजगुरुशनीनामुदयास्त-केन्द्रांशज्ञानम्<br>बुधशुक्रयोरुदयास्त-केन्द्रांशज्ञानम्<br>पञ्चताराणां वक्रो-दयादिगतैष्यदिनज्ञानम् | पञ्चताराणां शीघ्रफलानयनम्<br>पञ्चताराणां मन्दाङ्क-मन्दकेन्द्रवर्णनम्<br>पञ्चताराणां मन्दफल-साधनम्<br>पञ्चताराणां स्पष्टीकरणे फलसंस्कार-प्रकारवर्णनम्<br>पञ्चताराणां मन्दस्पष्ट-गतिसाधनप्रकारदर्शनम्<br>पञ्चताराणां गति-स्पष्टीकरणप्रक्रियादर्शनम्<br>कुजशुक्रयोर्गतिस्पष्टीकरणे विशेषविधिवर्णनम्<br>बुध-शुक्र-भौमानां गति-फलसाधने विशेषप्रक्रिया-कथनम्<br>भौमादीनां वक्रमार्ग-केन्द्रांशानयनम्<br>पञ्चताराणां वक्रो-दयादिगतैष्यदिनसाधनम् | २५ |
| ३ | त्रिप्रश्नगणितम् | १. मेषादिराशीनां लङ्कोदयकथनमेषामाधारेण स्वदेशोदयसाधनम्<br>२. प्रथमलग्नसाधनम्<br>३. भोग्यतोऽल्पेष्टकाले लग्नानयनं लग्नादिष्टकाल-साधनञ्च<br>४. लग्नसूर्ययोरेकराशित्वे लग्नानयनप्रकारः<br>५. गोलस्य दक्षिणोत्तरलक्षणं दिनरात्रिमानमक्षांशाश्च<br>६. नतोन्नतपलकर्णाः<br>७. छायार्थं हारसाधनम्<br>८. भाज्येष्टकर्णेष्टच्छायासाधनम् | मेषादिराशीनां लङ्को-दयज्ञानमेषामाधारेण स्वदेशोदयज्ञानम्<br>प्रथमलग्नज्ञानम्<br>लग्नादिष्टकालज्ञानम्<br>गोलस्य दक्षिणोत्तरज्ञानम् दिन-रात्रिमानं क्षांशज्ञानञ्च<br>हारज्ञानम्<br>नतकालज्ञानम् | मेषादिराशीनां लङ्कोदया-धारेण स्वदेशोदयसाधनम्<br>प्रथमलग्नसाधनम्<br>लग्नादिष्टकालसाधनम्<br>गोलस्य दक्षिणोत्तरज्ञानम्, दिनरात्रि-मानम्, अक्षांशवर्णञ्च<br>हारसाधनम्<br>नतकालानयनम्<br>स्थूल-सूक्ष्मक्रान्तिसाधनम्<br>भुजांशानयनम् | २५ |

| | | | | | |
|---|---|---|---|---|---|
| | | ९. इष्टच्छायातो नतकालानयनम्<br>१०. स्थूल-सूक्ष्मक्रान्तिः<br>११. भुजांशाः<br>१२. स्थूलक्रान्तिसाधनम्<br>१३. दिनार्धसमये नतांशोन्नतांशानयनम्<br>१४. उन्नतकालादिष्टकर्णानयनं कर्णादिष्टोन्नत-कालसाधनञ्च<br>१५. उन्नतकालो यन्त्रजोन्नतांशश्च<br>१६. यन्त्रांशात् कर्णस्ततश्च यन्त्रांशानयनम्<br>१७. दिक्साधनप्रकारः<br>१८. भुजदिशोः साधनविधिः<br>१९. दिग्ज्ञानार्थं दिगंशानयनप्रकारस्तथा दिगंशेभ्यो दिग्ज्ञानप्रकारश्च<br>२०. सप्रयोजनं भुजकोट्यंशानयनम्<br>२१. नलिकाबन्धनप्रकारः | स्थूलसूक्ष्मक्रान्तिज्ञानम्<br>भुजांशज्ञानम्<br>स्थूलक्रान्तिज्ञानम्<br>दिनार्धसमये नतांशोन्नतांशज्ञानम्<br>दिग्ज्ञानम्<br>नलिकाबन्धनप्रकार-ज्ञानम् | स्थूलक्रान्तिसाधनम्<br>दिनार्धसमये नतांशोन्नतांश-साधनम्<br>दिग्ज्ञानप्रकारवर्णनम्<br>नलिकाबन्धनप्रकारकथनम् | |
| ४ | ग्रहणगणितम् | १. ग्रहाणां तात्कालिकीकरणम्<br>२. ग्रहणसम्भवासम्भवविचारः शरश्च<br>३. चन्द्र-सूर्यबिम्बः<br>४. मानैक्यखण्डम्, ग्रासश्च<br>५. स्थितिघटिका, मर्दश्च<br>६. स्पर्श-मोक्ष-स्थिति-मर्दाः<br>७. मध्यग्रहण-स्पर्श-मोक्ष-सम्मीलनोन्मीलनकालाश्च<br>८. इष्टग्रासानयनविधिः<br>९. आयनाक्षवलनसाधनम्<br>१०. ग्रासाङ्घ्रि-खग्रासाङ्घ्रिसाधनम्, वलनादिदानेन ग्रहणमध्यज्ञानं खग्रासानयनञ्च<br>११. ग्रहणे स्पर्श-मोक्षादिदिग्ज्ञानप्रकारः<br>१२. हारानयनम्, ततो लम्बनसाधनम्, लम्बनसंस्कारेण स्पष्टामान्तसाधनञ्च<br>१३. व्यगौ लम्बनसंस्कारनिदर्शनम्<br>१४. नतिसाधनप्रकारः, नतितः स्पष्टशरसाधनम्, तस्मात् स्थितिग्रासमोक्षाद्यानयनञ्च<br>१५. सूर्यग्रहणे स्पर्शमोक्षकालज्ञानोपायः<br>१६. सम्मीलनोन्मीलनकालसाधनमनादेश्य-ग्रहणज्ञानं सूर्यचन्द्रयोर्ग्रस्तभागानां | तात्कालिकग्रहज्ञानम्<br>ग्रहणसम्भवासम्भवज्ञानं शरसाधनञ्च<br>चन्द्रसूर्यबिम्बज्ञानम्<br>मानैक्यखण्डज्ञानं ग्रासज्ञानञ्च<br>स्थितिघटिकाज्ञानं मर्दज्ञानञ्च<br>स्पर्शमोक्षस्थितिमर्दज्ञानम्<br>मध्यग्रहणस्पर्शमोक्षसम्मी-लनोन्मीलनकालज्ञानम्<br>इष्टग्रासानयनविधिज्ञानम<br>आयनाक्षवलनज्ञानम्<br>ग्रहणे स्पर्शमोक्षादि-दिग्ज्ञानम्<br>नतिज्ञानम्<br>सूर्यग्रहणे स्पर्शमोक्ष-कालज्ञानम्<br>ग्रहणवर्णज्ञानम्<br>इष्टकालेऽर्कस्य | तात्कालिकग्रहसाधनम्<br>ग्रहणसम्भवासम्भवनिदर्शनं शरसाधनञ्च<br>चन्द्रसूर्यबिम्बसाधनम्<br>मानैक्यखण्डानयनं ग्रासा-नयनञ्च<br>स्थितिघटिकानयनं मर्द-साधनञ्च<br>स्पर्शमोक्षस्थितिमर्दानयनम्<br>मध्यग्रहणस्पर्शमोक्षसम्मीलनो-न्मीलनकालसाधनम्<br>इष्टग्रासानयनविधिप्रदर्शनम्<br>आयनाक्षवलनसाधनम्<br>ग्रहणे स्पर्शमोक्षादिदिग्ज्ञान-प्रकारवर्णनम्<br>नतिसाधनप्रकारवर्णनम्<br>सूर्यग्रहणे स्पर्शमोक्षकाल-ज्ञानोपायवर्णनम्<br>ग्रहणवर्णकथनम्<br>इष्टकालेऽर्कस्य ग्रासमान-साधनम्<br>गणेशदैवज्ञस्य | २० |

| | | | | | |
|---|---|---|---|---|---|
| | | वर्णज्ञानञ्च<br>१७. इष्टकालेऽर्कस्य ग्रासमानम्<br>१८. गणेशदैवज्ञस्य जीवनचरितम् | ग्रास-मानज्ञानम्<br>गणेशदैवज्ञस्य जीवनचरितज्ञानम् | जीवनचरित-वर्णनम् | |
| ५ | पराशरोक्त-फलादेशः | १. मङ्गलाचरणम्<br>२. पराशरग्रन्थेप्रतिपाद्यविषयाः<br>३. दशाफलवर्णनाधारः<br>४. अन्यशास्त्रापेक्षया पराशरग्रन्थस्य वैशिष्ट्यम्<br>५. पाराशरीयग्रहदृष्टिविचारः<br>६. त्रिकोण-केन्द्राधिपतीनां दशाफलानि<br>७. केन्द्र-त्रिकोणाधिपतीनां दशाफलानि, एषामुत्तरोत्तरबलवर्णनम्<br>८. द्वितीयेश-द्वादशेशाऽष्टमेशाधारेण फलादेशप्रकारः<br>९. गुरुशुक्रयोः केन्द्राधिपत्ये मारकत्वे च विशेषारिष्टम्<br>१०. केन्द्राधिपत्ये मारकत्वे च गुरुशुक्रबुधचन्द्राणां वैशिष्ट्यवर्णनम्, ततोऽष्टमेशजन्यफलादेशश्च<br>११. पापग्रहाणां केन्द्राधिपत्ये फलम्<br>१२. राहुकेत्वोराधारेण फलादेशविधिः<br>१३. केन्द्रत्रिकोणपतीनां सम्बन्धेन फलम्<br>१४. दोषयुक्तयोरपि केन्द्रत्रिकोणेशयोः सम्बन्धेन फलम्<br>१५. केन्द्रत्रिकोणाधिपयोः सम्बन्धेन योगकारकत्वम्<br>१६. केन्द्रत्रिकोणाधिपयोः सम्बन्धेन सुयोगदर्शनम्<br>१७. योगकारकग्रहाणां फलदानसमयः<br>१८. पापग्रहाणां सम्बन्धेन योगफलप्राप्तिसमय-निरूपणम्<br>१९. भाग्ययोगानन्तरं राहुकेत्वाधारेण योगकारकत्वम्<br>२०. योगभङ्गग्रहस्थितिः<br>२१. आयुःस्थानमारकस्थानयोर्निर्दर्शनम्, प्रबलमारक-स्थाननिर्धारणञ्च<br>२२. मारकदशानिर्णयः<br>२३. मारकदशाऽसम्भवे मृत्युकालनिर्णयः<br>२४. मारकदशाऽसम्भवेऽपि निधनकारिणी ग्रहदशा<br>२५. मारकदशायां शनेर्वैशिष्ट्यम् | पराशरग्रन्थे प्रतिपाद्य-विषयज्ञानम्<br>दशाफलवर्णनाधारज्ञानम्<br>अन्यशास्त्रापेक्षया पराशरग्रन्थस्य वैशिष्ट्यज्ञानम्<br>ग्रहदृष्टिज्ञानम्<br>पराशरोक्तभावफलादेश-विधिज्ञानम्<br>मारकत्वलक्षणज्ञानम्<br>भावेशत्वजन्यफलज्ञानम्<br>योगकारकग्रहाणां फलदानसमयः<br>योगभङ्गग्रहस्थितिज्ञानम्<br>आयुःस्थानमारकस्थान-ज्ञानम्<br>मारकदशाया आधारे मृत्युकालनिर्णयः<br>ग्रहाणां दशाफलदान-कालप्रकारज्ञानम्<br>शनिशुक्रयोर्भुक्तिव्यत्यय-येन शुभाशुभत्वज्ञानम्<br>लग्नेश-दशमेशयोः लग्नेश-नवमेशयोश्च सम्बन्धेन विख्याति-कारकयोगज्ञानम् | – पराशरग्रन्थे प्रतिपाद्यविषय-कथनम्<br>– दशाफलवर्णनाधारवर्णनम्<br>– अन्यशास्त्रापेक्षया पराशर-ग्रन्थस्य वैशिष्ट्यकथनम्<br>– ग्रहदृष्टिवर्णनम्<br>– पराशरोक्तभावफलादेश-विधिकथनम्<br>– मारकत्ववर्णनम्<br>– भावेशजन्यफलकथनम्<br>– योगकारकग्रहाणां फलदानसमयकथनम्<br>– योगभङ्गग्रहस्थितिवर्णनम्<br>– आयुःस्थानमारकस्थानवर्णनम्<br>– मारकदशातो मृत्युकाल-निश्चयः<br>– ग्रहाणां दशाफलदानकाल-प्रकारकथनम्<br>– शनिशुक्रयोर्भुक्तिव्यत्ययेन शुभाशुभत्ववर्णनम्<br>– लग्नेश-दशमेशयोर्लग्नेश-नवमेशयोश्च सम्बन्धेन विख्यातिकारकयोगवर्णनम् | २५ |

| | | | | | |
|---|---|---|---|---|---|
| | | २६. ग्रहाणां दशाफलदानकालनिरूपणम्<br>२७. दशानाथविरुद्धफलदायिग्रहाणां दशाफलनिर्देशनम्<br>२८. केन्द्र-त्रिकोणाधिपयोः परस्परान्तर्दशाफलवर्णनम्<br>२९. योगकारकग्रहाणां दशासु मारकाणां पापानाञ्चान्तर्दशासु च फलनिरूपणम्<br>३०. तमोग्रहयोर्योगकारकत्ववर्णनम्<br>३१. पापग्रहदशायां तदसंयुजां शुभानां योगकारिणाञ्च ग्रहाणामन्तर्दशाफलवर्णनम्<br>३२. मारकदशायां सम्बन्धासम्बन्धकृतां शुभग्रहाणामाधारेण मारकत्वनिरूपणम्<br>३३. शनिशुक्रयोर्भुक्तिव्यत्ययेन शुभाशुभत्ववर्णनम्<br>३४. लग्नेशदशमेशयोः सम्बन्धेन विख्यातिकारक-योगवर्णनम्<br>३५. लग्नेश-नवमेशयोः सम्बन्धेन विख्यातिकारक-योगवर्णनम् | | | |
| सैद्धान्तिकाभ्यासः | | | | | १२० |
| प्रयोगात्मकाभ्यासः | | | | | ४० |
| योगः | | | | | १६० |

**५. प्रयोगात्मककार्यं परियोजनाकार्यञ्च**

| क्र.सं. | क्षेत्रम् | परीक्षणीयाः पक्षाः | अङ्कभारः | मूल्याङ्कनाधाराः |
|---|---|---|---|---|
| १. | शिक्षण-सहभागिता | (क) उपस्थितिः<br>(ख) सहभागिता | ३ | • विद्यार्थिनां दैनिकोपस्थितेरभिलेखः<br>• जातकफलादेशविषये मनन-चिन्तन-प्रश्नोत्तर-समूहविमर्शनादि-कक्षागतशिक्षणसहभागिता |
| २. | कक्षाकार्यं परियोजना-कार्यं वा | कक्षाकार्यं परियोजनाकार्यं वा | ६ | • रेखागणितपरिभाषा-आधुनिकज्योतिष-त्रिप्रश्नगणितसम्बद्धा लिखिता मौखिकी च प्रस्तुतिः,<br>• रेखागणित-मध्यमग्रहसम्बद्धाः प्रश्नोत्तरलेखन-विमर्श-तात्पर्यस्फुटीकरणम्<br>• गृहकार्यं कक्षाकार्यं वा<br>• सम्पादितानां कार्याणां प्रतिवेदनानामभिलेखस्य संरक्षणञ्च<br>• अधीतानां विषयाणामनुसरणं दैनन्दिनव्यवहारे तत्प्रदर्शनं च |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | (क) बोधः | ५ | • रेखागणितम्, विशेषजन्मपत्रिका, तदनुरूपफलादेशः, जातकफलादेशः, आधुनिकज्योतिषञ्च<br>• वा<br>• मध्यमग्रहसाधनम्, रविचन्द्रस्पष्टीकरणम्, |

| | | | | |
|---|---|---|---|---|
| | | | | पञ्चतारास्पष्टीकरणम् त्रिप्रश्नगणितम् ग्रहणगणितम् पराशरोक्तफलादेशः |
| | | (ख) अभिव्यक्तिः | ५ | ● रेखागणितम्, विशेषजन्मपत्रिका, तदनुरूपफलादेशः, जातकफलादेशः, आधुनिकज्योतिषञ्च<br>वा<br>● मध्यमग्रहसाधनम्, रविचन्द्रस्पष्टीकरणम्, पञ्चतारास्पष्टीकरणम्, त्रिप्रश्नगणितम्, ग्रहणगणितम्, पराशरोक्तफलादेशश्च |
| ४. | त्रैमासिकपरीक्षा | मौखिकं लिखितं वा | ६ | त्रैमासिकपरीक्षायाः प्राप्ताङ्कस्यानुपातिकप्रतिशताधारेणाङ्कनिर्धारणं कर्तव्यम् |
| योगः | | | २५ | |

## ६. शिक्षणसहजीकरणप्रक्रिया

सिद्धान्तज्योतिषशिक्षणविधौ विषयक्षेत्रगतशिल्पविकासाय अध्ययनसहजीकरणप्रक्रिया अपरिहार्या मन्यते । अस्यां प्रक्रियायां छात्रकेन्द्रितक्रियाकलापस्य विशिष्टं महत्त्वं भवति । प्रक्रियेयं पाठ्यक्रमस्य उद्देश्ये विषयवस्तुषु, छात्राणां पृष्ठभूमौ चाधृता भवति । अध्ययनस्य सहजीकरणं सामूहिके वैयक्तिके चाभ्यासे आश्रितं भवति । अस्य पाठ्यक्रमस्य उद्देश्यस्य परिपूर्तये अधो निर्दिष्टेषु अध्ययनसहजीकरणक्रियाकलापेषु महत्त्वं दीयमानमस्ति -

१. शिक्षकेण वार्षिकीमर्धवार्षिकीं मासिकीमर्धमासिकीं साप्ताहिकीं दैनिकीञ्च शिक्षणयोजनां पाठ्यांश-शिक्षण-योजनां दैनिकीं पाठयोजनां च निर्माय तदनुसारं शिक्षणकार्यं करणीयम् ।

२. शिक्षणे विशेषरूपेण विद्यार्थिकेन्द्रितशिक्षणपद्धतिरवलम्बनीया ।

३. छात्रेषु विषयवस्तुगतामभिरुचिमुत्प्रेरणाञ्च जागरयितुमुपयुक्तवातावरणस्य निर्माणादनन्तरं विषयशिक्षणं कार्यम् ।

४. विद्यार्थिनां स्तरं वयोऽभिरुचिं च ज्ञात्वाऽध्यापनीयम् ।

५. रेखागणिताध्यापनात् पूर्वं पाठ्यमानाध्यायगत-रेखा-त्रिभुज-चतुर्भुजादीनां परिभाषाः पाठनीयाः ।

६. साध्यगतविषयवस्तुप्रतिपादनार्थं तत्र प्रयोज्यमानसाध्यानां प्रथमं सामान्यपरिचयो देयस्ततश्च शुद्धमाकर्षकं क्षेत्रं निर्मीय तत्र सामान्यरूपेण कोणरेखादिदर्शनेन साध्यविषयः प्रतिपादनीयस्तदनन्तरं सामान्योद्देश्यविशेषोद्देश्यमितिकर्तव्यतामुपपत्तिञ्च श्वेतपट्टे श्यामपट्टे वा विलिख्य सर्वमपि विषयजातं सम्यगध्यापनीयम् ।

७. सिद्धसाध्यानुरूपमन्यमनुमानजं साध्यञ्च परिकल्प्यैतेषामपि प्रमाणीकरणाय छात्रा अभिप्रेरणीयाः ।

८. मुहूर्तशास्त्रस्याध्यापनात्पूर्वं तत्र प्रयोज्यमानाः तिथि-वार-नक्षत्र-योग-करणायनर्तुमासादिविषयाः परिचेतव्याः ।

९. प्रचलितपञ्चाङ्गस्य साहाय्येन नक्षत्रादीनां भोग्यघट्यादिज्ञाने, ग्रहाणां वक्रमार्गादिज्ञाने, ग्रहावस्थितराशिज्ञाने, ग्रहोदयास्तज्ञाने च छात्राः प्रशिक्षणीयाः । व्याख्यानेनोदाहरणेन, विश्लेषणेन व्यतीतोदाहरणदर्शनेन, पञ्चाङ्गप्रदर्शनेन च सम्बद्धविषयाः शिक्षणीयाः ।

१०. जातकशास्त्रस्याध्यापनात् पूर्वमध्यापनीया राशि-राशिस्वामि-लग्न-होरा-द्रेष्काण-नवमांश-द्वादशांश-त्रिंशांश-मूलत्रिकोण-ग्रहमैत्री-ग्रहदृष्टि-नीचादिजातकसम्बद्धविषया अध्यापनीयाः । जातकग्रन्थस्य यः श्लोकः पाठनीयो भवति, प्रथमं तच्छ्लोको लेखनीयस्ततश्च श्लोकानुगतमन्वयमन्वयानुगतं वर्णनम्, विश्लेषणं कुण्डलीप्रदर्शनञ्च कार्यम् । ऐतिहासिकमहापुरुषाणां कुण्डलीप्रदर्शनेन तेषां जीवने घटितघटनानां पठितशास्त्राधारेण विश्लेषणं विधाय शास्त्रोक्तफलं समीक्षणीयम् ।

११. यस्य कस्यापि बालकस्य अथवा बालिकाया यज्जन्मस्थानं भवति प्रथमं मानचित्रेऽथवा गोलीयमानचित्रे तत् स्थानमङ्कनीयम् । तत्पश्चाच्च मानचित्रस्य साहाय्येन तस्य स्थानस्याक्षांशो देशान्तरम्, प्रामाणिकं समयान्तरं

क्रान्तिमानञ्च समवगम्य प्रचलितपञ्चाङ्गस्थसारणीसाहाय्येन चरपलानि वेलान्तरञ्च ज्ञात्वा तत्संस्कारेण सूर्योदयमानं साध्यम् । तस्माच्च स्वेष्टकालं परिज्ञाय तदाधारे जन्मस्थानीयान् स्पष्टग्रहान् जन्मस्थानीयलग्नपञ्चाङ्गादिकञ्च समानीय प्रथममेका जन्मपत्रिका छात्राणां पुरतोऽध्यापकेनैव निर्मेया । ततश्चैतादृशमन्यमेतत् भिन्नं भिन्नं जन्मस्थानं परिकल्प्य भिन्न-भिन्नजन्मपत्रिकानिर्माणे विद्यार्थिनो गृहकार्ये प्रेरयितव्याः । विद्यार्थिनिर्मितामेतादृशीं निदर्शनजन्मपत्रिकां निरीक्ष्य सा जन्मपत्रिकाभिलेखरूपेण संरक्षणीया ।

१२. करणग्रन्थस्याध्यापनात्प्राग्भगण-राश्यंश-कला-विकलादीनां षट्कर्मसु छात्राः प्रशिक्षणीयाः ।

१३. ग्रहगणिते प्रयोज्यमानसूत्ररूपपद्याध्यापनपूर्वं श्लोकगतविषयस्तस्य महत्त्वं प्रयोज्यमानस्थलं च प्रथमं निर्देष्टव्यम् । ततः पद्यगतविषय उपस्थापनीयस्तदनुरूपं गणितीयसूत्रं च दर्शयितव्यम् । सूत्रदर्शनपश्चाच्च गणितसंदर्शनपूर्वकं शुद्धोत्तरं समानीय छात्रेभ्यो विषयवस्तुज्ञानं कारयितव्यम् ।

१४. विषयवस्तूनां ज्ञाने सुन्दरक्षेत्रदर्शनमाकाशावलोकनं विविधवर्णप्रयुक्तनक्षत्रग्रहचित्रावलोकनञ्च कारयितव्यम् ।

१५. ग्रहलाघवोक्तविधिना स्पष्टग्रहान्, पञ्चाङ्गानि, ग्रहाणामुदयास्तं, ग्रहणादिकञ्च विगणय्य प्रचलितपञ्चाङ्गे स्थितैरेतैरेव विषयैः सह तुलनात्मकं समीक्षणं कारयितव्यम् ।

१६. ग्रहाणां छायाचित्राणि, मानचित्रम् ९ःबउ०, गोलीयमानचित्रम् ९नियदभ०, नक्षत्रपटमाकाशीयग्रहनक्षत्रादि - स्थितिबोधकं पटचित्रं वेधशालायाश्चित्रं दूरवीक्षणयन्त्रं च प्रयोज्य ग्रहाणामध्ययने छात्राणामभिरुचिर्वर्धनीया ।

१७. स्वच्छाकाशसमये ग्रहाणां नक्षत्राणां ग्रहणस्य चावलोकनं कारयित्वैतेषामध्ययने छात्राः प्रेरयितव्याः ।

१८. नेपालस्य नगरकोटस्थितवेधशालायामथवाऽन्यत्रस्थितवेधशालायां विद्यार्थिनो नाययित्वा तत्र ग्रहनक्षत्रवेधकरणविधिश्च दर्शयितव्यः ।

१९. एवमेव कमपि क्रियात्मकमध्ययनं परिकल्प्य विद्यार्थिभिः प्राप्ताङ्काः सम्बद्धस्थाने परीक्षानियमानुसारेण यथासमय एव प्रेषणीयाः ।

२०. अध्ययनसहजीकरणक्रियाकलापेषु गणकयन्त्रम्, ज्यामितीयपेटिका ९क्ष्लकतचगफभलत द्ययह०, ग्रहनक्षत्राणां चित्रपटानि, नेपालदेशीयपञ्चाङ्गम्, विश्वमानचित्रम् ९नियदर्बा ःबउ०, गोलीयमानचित्रम् ९नियदभ०, दूरवीक्षणयन्त्रम् ९त्भभिकअयउभ०, ऐतिहासिकमहापुरुषाणां जन्मपत्रिकाः, विषयवस्तुबोधकानि रेखाचित्राणि, विविधवर्णयुक्तमृल्लेखन्यः, विविधक्षेत्रनिर्मितकाष्ठपट्टिकाश्च शिक्षणसामग्रीरूपेण प्रयोक्तव्याः ।

## ७. मूल्याङ्कनप्रक्रिया

विद्यार्थिनां शिक्षणोपलब्धिं सुनिश्चेतुं निर्माणात्मकं निर्णयात्मकञ्चोभ्यप्रकारकमेव मूल्याङ्कनं विधातव्यं भवति । विद्यार्थिनां शिक्षणोपलब्धे, सुधाराय कक्षाशिक्षणस्यैव क्रमे कक्षाकार्य-परियोजनाकार्य-प्रस्तुतीकरणोपलब्धिपरीक्षासदृशान् क्रियाकलापान् कारयित्वा सैद्धान्तिकज्ञानशिल्पयो-रवाप्तिरावश्यकी । एतत्कार्यस्य प्रभावकारिरूपेण क्रियान्वयनाय, विद्यार्थिनां शिक्षणस्तरस्य सुधाराय च सहजीकरणक्रियाकलापस्य अभिन्नाङ्गस्य रूपेण निर्माणात्मकमूल्याङ्कनमुपयोक्तव्यम् । निर्माणात्मकमूल्याङ्कनस्य शिक्षणोपलब्धेर्निश्चितभारो निर्णयात्मकमूल्याङ्कनेऽपि संयोज्यते ।

पाठ्यक्रमेण निर्धारितस्योद्देश्यस्यानुरूपं विद्यार्थिनो ज्ञान-शिल्पाभिवृत्तीः प्राप्नुवन्नवेति विषयस्यान्वेषकं महत्त्वपूर्णं संयन्त्रं मूल्याङ्कनं भवति । विद्यार्थिनां मूल्याङ्कनं शिक्षणोपलब्धीर्ध्यात्वा सक्षमतां शिक्षणोपलब्धीनाञ्चानुरूपं शिक्षणस्य सर्वान् स्तरान् समाविश्य विधातव्यम् । आन्तरिकबाह्यमूल्याङ्कनयोर्माध्यमेन एतस्य विषयस्य मूल्याङ्कनं विधीयते । मूल्याङ्कनस्य समग्रभारतः पञ्चविंशतिप्रतिशतमान्तरिकं पञ्चसप्ततिप्रतिशतं बाह्यञ्च मूल्याङ्कनं विधीयेते । एवमेव बाह्यमूल्याङ्कनस्यान्तर्गतं लिखितपरीक्षा सञ्चाल्यते । विद्यार्थीमूल्याङ्कनस्यान्तर्गतं निर्माणात्मकं निर्णयात्मकञ्च मूल्याङ्कनं पद्धतिद्वयेनैव क्रियते । अस्य विषयस्य पाठ्यक्रमे समाविष्टानां स्तरगतसक्षमतानाम्, कक्षागतशिक्षणेपलब्धीनाम्, तासां विषयवस्तूनाम्, तैस्सह सम्बद्धस्य शिल्पस्य, शिक्षण सहभागितायाः शिक्षणसक्रियतायाश्चाधारेषु विद्यार्थिनां शिक्षणस्य मूल्याङ्कनं विधातव्यम् ।

स्तरस्यास्य विद्यार्थिमूल्याङ्कनप्रक्रिया सम्प्रति प्रचलिताक्षराङ्कनपद्धत्या विधीयते । मूल्याङ्कने निर्माणात्मकं निर्णयात्मकञ्चेति प्रक्रियाद्वयमवलम्ब्यते । कक्षाकार्य-गृहकार्य-कक्षासहभागिता-प्रकरणपरीक्षा-पाक्षिकपरीक्षा-मासिकपरीक्षामाध्यमेन विद्यार्थिनां योग्यताभिवृद्धये प्रयासो विधीयते । एवमेव शिक्षणक्रमे शिक्षणदुर्बलविद्यार्थिभ्यो

व्यावहारिकपरिवर्तनाय तेषां कृते शिक्षणकार्यस्य सहजीकरणायोपयुक्तवातावरणनिर्माणं क्रियते । तत्क्रमे स्तरानुगतयोग्यताभिवृद्धये सामूहिकविमर्शन-मौखिकपरीक्षालिखितपरीक्षाप्रत्युत्पन्नमतिप्रदर्शन-प्रश्नोत्तरण-कक्षाकार्यपरीक्षणप्रभृतिकार्यै-र्निर्माणात्मकं मूल्याङ्कनं विधीयते । माध्यमेनानेन विद्यार्थिनां योग्यतावृद्धिर्भवेत् । पाठ्यक्रमस्योद्देश्यानुरूपं ज्ञानं विद्यार्थिभ्यो प्रापितं नवेति स्पष्टीकरणार्थमावधिकरूपेण मूल्याङ्कनं कृत्वा छात्राणां योग्यतानिर्धारणं क्रियते । स्तरोन्नतये कक्षोन्नतये च शैक्षिकसत्रस्यान्ते निर्णयात्मकमूल्याङ्कनमन्तिमपरीक्षाया माध्यमेन विधीयते । प्रायशस्त्रैमासिक परीक्षारूपेण षाण्मासिकपरीक्षारूपेण वार्षिकपरीक्षारूपेण च तादृशो निर्णयः क्रियते ।

मूल्याङ्कनप्रणालीं विश्वसनीयां विधिसम्मताञ्च विधाय तत्रैकरूपतामानेतुं स्थानीय-प्रादेशिक-राष्ट्रियस्तरीयाणां बाह्यसार्वजनिकपरीक्षणं तथा सर्वेषु विषयेष्वान्तरिकीं बाह्या च मूल्याङ्कनपद्धतिः क्रियान्वयन आनीयते । सार्वजनिकपरीक्षायाः प्रत्येकविषये प्रतिशतं पञ्चविंशत्यङ्कानामान्तरिकं प्रतिशतं पञ्चसप्तत्यङ्कानां बाह्यं मूल्याङ्कनञ्च भवति । आन्तरं मूल्याङ्कनं सम्बद्धविद्यालयस्य शिक्षकेण विधातव्यम् । शिक्षणप्रक्रियया सहैव विषयवस्तुनो मूल्याङ्कनं निरन्तरं विधेयम् । औपचारिकेणानौपचारिकेण च शिक्षणोपलब्धिः क्रमेण परिमापणीया । शिक्षणसहजीकरणस्य क्रमे विद्यार्थिभिरधिगतानां ज्ञानशिल्पप्रयोगोच्चदक्षतासम्बद्धपक्षाणां मूल्याङ्कनं कर्तव्यम् ।

**(अ) आन्तरं मूल्याङ्कनम्**

| **क्र.सं.** | **क्षेत्रम्** | **अङ्कभारः** |
|---|---|---|
| १. | शिक्षणसहभागिता | ३ |
| २. | कक्षाकार्यं परियोजनाकार्यं वा | ६ |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | १० |
| ४. | त्रैमासिकपरीक्षा | ६ |
| योगः | | २५ |

**(ख) बाह्यमूल्याङ्कनम्**

निर्णयात्मके बाह्ये वा मूल्याङ्कने पाठ्यक्रमे निर्धारितोद्देश्यानुरूपं छात्रैः ज्ञानम्, शिल्पमधिगतं नवेति सम्परीक्ष्य तदनुसारेण छात्राणामुत्तीर्णत्वमनुत्तीर्णत्वं वा निर्णीयते । एतादृशं मूल्याङ्कनमावधिकं भवति । शैक्षिकसत्रस्यान्त एतद् मूल्याङ्कनं विधीयते ।

**अधोलिखिताधारेण बाह्यमूल्याङ्कनं कर्तव्यम् :**

**कक्षा ११**

| **क्र.सं** | **विषयक्षेत्रगतस्वरूपम्** | **विषयक्षेत्रम्** | **अङ्कभारः** |
|---|---|---|---|
| १. | रेखादीनां परिभाषा, विशेषोद्देश्यम् | रेखागणितम् (वृत्तभिन्नम्) | १+१ |
| | अभीष्टरेखोपरि समभुजत्रिभुजनिर्माणतः अभीष्टरेखाया निर्दिष्टबिन्दूपरि निर्दिष्टकोण-तुल्यकोणनिर्माणपर्यन्तम् | रेखागणितम् (वृत्तभिन्नम्) | ४ |
| | त्रिभुजयोर्मध्ये भुजद्वयस्य तुल्यत्वे तदन्तरगत-कोणस्य स्थूलसूक्ष्मत्वे तदाधारस्यापि स्थूलसूक्षत्वपर्यन्तम् | रेखागणितम् (वृत्तभिन्नम्) | ८ |
| २. | वृत्तस्य केन्द्रव्यासजीवादीनां परिभाषा विशेषोद्देश्यञ्च | रेखागणितम् (वृत्ताधारितम्) | १ |
| | वृत्तस्य केन्द्रान्वेषणतो जीवावृत्तयोस्तुल्यत्वेन तन्निर्मितचापानां तुल्यतापर्यन्तम् | रेखागणितम् (वृत्ताधारितम्) | १२ |

| | | | |
|---|---|---|---|
| | वृत्तचापयोस्तुल्यत्वे तज्जीवानां तुल्यता, ततोऽभीष्टवर्गक्षेत्रोपरिगतवृत्तनिर्माणपर्यन्तम् | रेखागणितम् (वृत्ताधारितम्) | ८ |
| ३. | प्रामाणिकसूर्योदयः, स्थानीयसूर्योदयः, पञ्चाङ्गपरिवर्तनम्, भयातभभोगोऽवकहडाचक्रञ्च | विशेषजन्मपत्रिका तदनुरूपफलादेशश्च | २+१ |
| | स्पष्टग्रहसाधनम्, ससन्धिद्वादशभावसाधनम्, दशासाधनञ्च | विशेषजन्मपत्रिका तदनुरूपफलादेशश्च | ४ |
| | फलादेशप्रकारः | विशेषजन्मपत्रिका तदनुरूपफलादेशश्च | ८ |
| ४. | उच्चगत-नीचगत-स्वक्षेत्रगतग्रहफलम् | जातकफलादेशः | २+३ |
| | उपचयानुपचयभावलक्षणम्, ग्रहस्वरूपम्, कालपुरुषस्यात्मादिसंज्ञा, ग्रहाणां दृष्टिः, ग्रहाणां मित्रामित्राणि, गर्भे पुरुषस्त्रीज्ञानम्, यमलयोगः, चान्द्रयोगानां लक्षणानि फलानि च, द्वित्रिग्रहयोगः, भावफलम्, लग्नगतचन्द्रफलम्, लग्नगतसूर्यफलम्, नाभसयोगाः, स्त्रीणां फलादेशप्रकारः, मृत्युकारणम्, मृत्युस्थानानि, देवलोकादिगति-र्मोक्षस्थितिश्च | जातकफलादेशः | ८ |
| ५ | खगोलः, भूगोलः, अक्षांशः, देशान्तरम्, पलभा, क्रान्तिः, चरः, अयनांशः, अयनम्, गोलः, स्वस्तिकम्, समस्थानम्, लग्नम्, रेखादेशः, स्वदेशः, निरक्षदेशः, विषुवद्दिनम्, भुजांशः, शरः, भूभा, वलनम्, नतिः, लम्बनम्, ध्रुवस्थानम्, गुरुत्वाकर्षणम्, गुरुत्वबलम्, चन्द्रकला च<br>चन्द्रपृष्ठविषयकमर्वाचीनं मतम्, ग्रहाणामुदयास्तलक्षणम्, ग्रहाणां वक्रगतिविषयिका नूतनव्याख्या, टालमी गणकस्य ग्रहगतिसिद्धान्तः, धूमकेतवः, नक्षत्रमण्डलानि, नक्षत्रस्तबकाः, आकाशगङ्गा, घटिकायन्त्रम् (धूपघडी), नलिकायन्त्रम्, दूरदर्शकयन्त्रम्, वेधशाला च | आधुनिकं ज्योतिषम् | १२ |
| योगः | | | ७५ |

**कक्षा १२**

| क्र.सं | विषयक्षेत्रगतस्वरूपम् | विषयक्षेत्रम् | अङ्कभारः |
|---|---|---|---|
| १. | वेदग्रहलाघवयोः समानोत्कर्षता, ग्रहलाघव-रामचन्द्रयोः स्मरणे समानता, ग्रहाणां ध्रुवक्षेपकाः, पलभा-चरखण्डानामानयनम्, चर-भुजफलसाधनम्, तत्संस्कारविधिदर्शनम्, अयनांशानयनम्, तिथि-नक्षत्र-योग-करणानां साधनञ्च | मध्यमग्रहसाधनं रविचन्द्रस्पष्टीकरणञ्च | १+२ |
| | अहर्गणानयनम्, अहर्गणोत्पन्नग्रहे ध्रुवक्षेपकसंस्कारविधानम्, चन्द्रमसि देशान्तरसंस्कारविधानम्, अहर्गणोत्पन्नग्रहसाधनञ्च | मध्यमग्रहसाधनं रविचन्द्रस्पष्टीकरणञ्च | ४ |
| | ग्रहाणां मध्यमगतिकला, ग्रहलाघवे साधितग्रहाणामन्यग्रन्थसाधितग्रहैस्तुलना, भुजकोटिसाधनम्, सूर्यमन्दोच्चज्ञानम्, रविचन्द्रयोर्मन्दफलानयनम्, तयोः स्पष्टीकरणञ्च, रविचन्द्रयोः स्पष्टगतिसाधनम् | मध्यमग्रहसाधनं रविचन्द्रस्पष्टीकरणञ्च | ८ |
| २. | पञ्चताराणां शीघ्राङ्क-शीघ्रफल-मन्दाङ्क-मन्दकेन्द्र-मन्दफलम्, पञ्चताराणां स्पष्टीकरणे फलसंस्कारप्रकारः | पञ्चतारास्पष्टीकरणम् | २+१ |
| | पञ्चताराणां मन्दस्पष्टगतिसाधनप्रकारः, पञ्चताराणां गतिस्पष्टीकरणप्रक्रिया, कुज-शुक्रयोर्गतिस्पष्टीकरणे विशेषविधिः, बुध-शुक्र-भौमानां गतिफलसाधने विशेषप्रक्रिया, भौमादीनां | पञ्चतारास्पष्टीकरणम् | १२ |

| | | | |
|---|---|---|---|
| | वक्रमार्गकेन्द्रांशानयनम्, कुज-गुरु-शनीनामुदयास्तकेन्द्रांशाः, बुध-शुक्रयोरुदयास्तकेन्द्रांशाः, पञ्चताराणां वक्रोदयादिगतैष्यदिनसाधनप्रकारः, पञ्चताराणां पूर्वास्तादन्तरं पश्चिमोदय- वक्र-पश्चिमास्त-पूर्वोदय-मार्गादीनां ज्ञानोपायाः | | |
| ३. | मेषादिराशीनां लङ्कोदयमानम्, स्वदेशोदयसाधनम्, गोलस्य दक्षिणोत्तरलक्षणं दिनरात्रिमानम्, अक्षांशाश्च, नतांशोन्नतांशानयनम्, दिक्साधनञ्च | त्रिप्रश्नगणितम् | १+२ |
| | स्थूल-सूक्ष्मक्रान्ती, भुजांशाः, स्थूलक्रान्तिसाधनम्, उन्नतकालादिष्टकर्णानयनं, कर्णादिष्टोन्नत- कालसाधनम्, उन्नतकालः, यन्त्रजोन्नतांशाः, यन्त्रांशात् कर्णस्ततश्च यन्त्रांशानयनम्, भुजदिशोः साधनम्, भुजकोट्यंशानयनञ्च | त्रिप्रश्नगणितम् | ४ |
| | प्रथमलग्नसाधनम्, भोग्यतोऽल्पेष्टकाले लग्नानयनम्, लग्नादिष्टकाल-साधनम्, लग्नसूर्ययोरेकराशित्वे लग्नानयनप्रकारः, नतोन्नतपलकर्णाः, छायार्थं हारसाधनम्, भाज्येष्टकर्णेष्टच्छायासाधनानि, इष्टच्छायातो नतकालानयनम्, नलिकाबन्धनप्रकारश्च | त्रिप्रश्नगणितम् | ८ |
| ४. | मानैक्यखण्ड-ग्रास-स्पर्श-सम्मीलनोन्मीलन-मोक्ष-स्थिति-मर्दाः, ग्रहणे स्पर्श-मोक्षादिदिग्ज्ञानप्रकारः, गणेशदैवज्ञस्य जीवनचरितञ्च | ग्रहणगणितम् | १+१ |
| | ग्रहाणां तात्कालिकीकरणम्, ग्रहणसम्भवासम्भवविचारः शरः, चन्द्र-सूर्यबिम्बम्, मध्यग्रहण-स्पर्श-मोक्ष-सम्मीलनोन्मीलनकालाः, इष्टग्रासानयनविधिः, आयनाक्षवलनसाधनम्, ग्रासाङ्घ्रि-खग्रासाङ्घ्रिसाधनम्, वलनादिदानेन ग्रहणमध्यज्ञानं खग्रासानयनञ्च | ग्रहणगणितम् | ४ |
| | हारानयनम्, ततो लम्बनसाधनम्, लम्बनसंस्कारेण स्पष्टामान्तसाधनम्, व्यगौ लम्बनसंस्कारनिदर्शनम्, नतिसाधनप्रकारः, नतितः स्पष्टशरसाधनम्, तस्मात् स्थितिग्रासमोक्षाद्यानयनम्, सम्मीलनोन्मीलनकालसाधनम्, अनादेश्यग्रहणज्ञानम् सूर्यचन्द्रयोर्ग्रस्तभागानां वर्णज्ञानम्, इष्टकालेऽर्कस्य ग्रासमानञ्च | ग्रहणगणितम् | ८ |
| ५ | सम्बद्धश्लोकपूरणम्, केन्द्रत्रिकोणमारकादीनां परिचयः, पराशरोक्तविधिना फलादेशप्रकारश्च<br>सम्बद्धश्लोकानां व्याख्यानम्, अन्यजातकग्रन्थेभ्यः पराशरस्य वैशिष्ट्यञ्च | पराशरोक्तफलादेशः | १६ |
| योगः | | | ७५ |

# न्यायः

**कक्षा** : ११ र १२ **विषय सङ्केत** : [SIJ. 513] (**कक्षा ११**), [SIJ. 514] (**कक्षा १२**)

**पाठ्यघण्टा** : ५ **वार्षिक कार्यघण्टा** : १६०

## १. परिचयः

न्यायविषयस्य पाठ्यक्रमः नव्यन्यायसम्बद्धानां विषयक्षेत्राणां सैद्धान्तिकानां व्यावहारिकाणां च पक्षाणां पठनपाठनयोरुद्देश्येन विकसितो वर्तते । एतदर्थं २०७६ विक्रमवर्षीयस्य राष्ट्रियपाठ्यक्रमप्रारूपस्य मार्गदर्शनानुसारेण विद्यालयशिक्षाया माध्यमिकरस्तरे (एकादश्यां द्वादश्याञ्च कक्षयोः) न्यायविषयस्य एतस्मिन् पाठ्यक्रमे नव्यन्यायविषयस्य प्रतिप्रकरणे निर्धारितविषयाणां बोधो बुद्धविषयाणामभिव्यक्तिसामर्थ्यञ्च छात्रेषु स्यादिति हेतोर्बोधाभिव्यक्त्योरुल्लेखोऽपि विहितो विद्यते । एतस्माद् वर्तमानसन्दर्भे न्यायसम्बद्धविषयमितोऽपि व्यावहारिकं निर्माय विद्यार्थिनां रुच्यकाङ्क्षे प्रपूर्य शिक्षाया राष्ट्रियोद्देश्यं प्राप्स्यते, एतस्य सान्दर्भिकतां विस्तार्य विधाय उपयुक्तता सुनिश्चिता च विधास्यते इत्यपेक्षितमस्ति । अनेन पाठ्यक्रमेण सम्बद्धविषये उच्चशिक्षाया आधारोऽपि निर्मात्स्यते इति चापेक्षितं वर्तते ।

न्याये विशेषतो नव्यन्याये प्रयुक्ताया भाषिकशैल्यास्तत्परिष्कारप्रणाल्याश्च ज्ञानार्थं न्यायसम्बद्धानां केषाञ्चन प्रमुखाणां प्रतियोग्यनुयोग्यवच्छेदकावच्छिन्नेत्यादीनां पारिषिकपदानामर्थबोधनेन सह सप्रयोगं सनिदर्शनं तद्विषयकविवेचनसामर्थ्यं छात्राः प्राप्नुयुरिति धिया केचन प्रमुखा विशेषतो न्यायदर्शने प्रयुक्ताः पारिभाषिकशब्दाः पाठ्यक्रमेऽत्र यथाप्रकरणं सन्निविष्टाः । तथैव नव्यन्यायचिन्तनस्य केन्द्रीभूतस्य प्रमेयसाधकस्य प्रमाणस्य तत्रापि अनुमानस्य अङ्गीभूताया व्याप्तेः सम्यग्बोधसम्पादनाय व्याप्तिपञ्चकाख्ये प्रारम्भिके व्याप्तिनिरूपके ग्रन्थे सिद्धान्तव्याप्तिनिरूपके सिद्धान्तलक्षणाख्ये ग्रन्थे च विवेचितानां परिष्कृतानाञ्च व्याप्तिसम्बद्धानां लक्षणानामवबोधस्यावश्यकत्वाद् व्याप्तिपञ्चकस्य समाथुरीकं प्रथमलक्षणम् अवशिष्टं द्वितीयादि-लक्षणचतुष्टयञ्च मूलमात्रं निर्धार्य तत्सम्बद्धाः पाठ्यविषयाः समाविष्टाः सन्ति । एवमेव सजागदीशीकं सिद्धान्तलक्षणञ्चास्मिन् पाठ्यक्रमे निर्धारितं वर्तते । तथैव पौरस्त्यचिन्तने शिखरायमाणस्य वेदान्तदर्शनस्य ज्ञानं विना पौरस्त्यचिन्तनमपूर्णमपर्याप्तं च मन्यते । अतस्तद्विषयस्य सामान्यपरिचयार्थं वेदान्तसम्बद्धमंशभूतं किञ्चन प्रकरणञ्च समाविष्टं वर्तते । एवमेव पौरस्त्यदर्शनेषु योग-साङ्ख्यदर्शनप्रतिपाद्यविषयपरिचयाय योगसाङ्ख्यदर्शनसम्बद्धानि कानिचिन्महत्त्वपूर्णप्रकरणानि चात्र पाठ्यक्रमे समावेश्य तदुपयोगिनः पाठ्यविषया निर्धारिताः सन्ति ।

परिचयम्, स्तरगतसक्षमताम्, कक्षागतशिक्षणोपलब्धिम्, विषयवस्तुनः क्षेत्रक्रमौ, शिक्षणसहजीकरणप्रक्रियाम्, विद्यार्थिमूल्याङ्कनञ्च समाविश्य पाठ्यक्रमोऽसौ विकासं नीतः । एतस्मिन् क्रमे पाठ्यक्रमलेखनस्य विकासस्य च विषयगतौचित्यम्, पाठ्यक्रमे विद्यमाना मुख्यविशेषताः, पाठ्यक्रमस्य स्वरूपञ्च संयोज्य परिचयं, विषयगतरूपेणापेक्षितं ज्ञानम्, शिल्पम्, अभिवृत्तिम्, मूल्यञ्च, कार्यतत्परतां संयोज्य एतस्याः क्रियात्मकस्वरूपे सक्षमताम्, शिक्षणस्य स्तरम्, सक्षमताया विशिष्टीकृतविस्तृतीकरणेन शिक्षणोपलब्धिम्, सक्षमताम्, पूर्वकक्षाभिस्सह लम्बीयसन्तुलनस्याधारे विषयवस्तुनो क्षेत्रक्रमौ च, विषयगतविशिष्टतामौलिकते संयोज्य शिक्षणसहजीकरणस्य विधिम्, प्रक्रियाञ्च, निर्माणात्मकनिर्णयात्मकमूल्याङ्कनयोर्विधिं प्रक्रियाञ्चोल्लिख्य विद्यार्थिमूल्याङ्कनं व्यवस्थितं वर्तते ।

## २. स्तरगतयोग्यताः

**माध्यमिकस्तरे ११-१२ कक्षयोः न्यायविषयमधीत्य विद्यार्थिनो निर्दिष्टविषयेषु क्षमा भविष्यन्ति –**

१. न्यायशास्त्रे प्रयोक्तव्यानामस्मिन् स्तरे निर्दिष्टानां पारिभाषिकपदानां बोधपूर्वकं यथायथं प्रयोगसामर्थ्यम्

२. न्यायगतानुमानप्रक्रियायाः सनिर्दशनं सप्रयोगं प्रतिपादनक्षमत्वम्

३. न्याये विशेषतो नव्यन्याये प्रतिपादितेऽनुमानान्तर्गतव्याप्तिविषये विश्लेषणक्षमत्वम्

४. पूर्वपक्षव्याप्तिषु पञ्चलक्षण्यां प्रतिपादितानां पञ्चानां व्याप्तीनां व्याख्यानसामर्थ्यम्

५. नव्यन्यायनिर्दिष्टपरिष्कारपद्धत्या प्रकरणगतपाठ्यविषयाणां सपरिष्कारं विवेचनक्षमत्वम्

६. पूर्वपक्षव्याप्तौ आगतानाम् अव्याप्त्यतिव्याप्त्यादिदोषाणां प्रदर्शनक्षमत्वम्

७. वेदान्त-योगविषयसम्बद्धानामारम्भिकविषयाणां सामान्यपरिचयक्षमत्वम्

८. सिद्धान्तलक्षणस्य व्याख्याने परिष्कारे च सामर्थ्यम्

९. तत्परिकाष्कारपद्धत्या लक्षणपरिष्कारे विवेचने च क्षमत्वम्

१०. साङ्ख्यदर्शनसम्बद्धानां मूलभूतविषयाणां विवेचनक्षमत्वम्

**३. कक्षागतशिक्षणोपलब्धिः**

**कक्षा ११**

**माध्यमिकस्तरीयायां ११ कक्षायां न्यायविषयमधीत्य छात्रा अधो निर्दिष्टविषयेषु क्षमा भविष्यन्ति –**

**(क) श्रवणनैपुण्यम्**

१. व्याप्तिविषयके लक्षणे प्रयुक्तानां पदानां स्पष्टतः श्रवणे

२. अव्यभिचरितत्वपदप्रतिपाद्यव्याप्तीनां स्पष्टतः पृथक्पृथक्पदज्ञानपूर्वकश्रवणे

३. न्यायसम्बद्धानि अवच्छेदकावच्छिन्ननिरूप्यनिरूपकसाध्यसाध्यतावच्छेदकधर्मसम्बन्धप्रतियोगितादीनि पदानि पृथक्कृत्य तेषां स्पष्टतः श्रवणे

४. योगदर्शनसम्बद्धसूत्राणां स्पष्टतः श्रवणे

५. वेदान्तसारे आगतानां सामान्यपदानां पारिभाषिपदानाञ्च स्पष्टतः श्रवणे

**(ख) अभिव्यक्तिनैपुण्यम्**

१. न्यायदर्शनसम्बद्धानां पारिभाषिकपदानां बोधेन सह शुद्धोच्चारणे

२. योगदर्शनस्थसूत्राणामर्थबोधेन सह शुद्धतया स्पष्टतया च सूत्राणामुच्चारणे

३. योगदर्शनगतपारिभाषिकपदानामर्थबोधेन सह शुद्धोच्चारणे

४. अवच्छेदकावच्छिन्नेत्यादीनां पारिभाषिकपदानां व्याप्तिलक्षणव्युत्पादने यथायथं मौखिकप्रयोगेण लक्षणोपस्थापने

५. अवच्छेदकावच्छिन्नेत्यादीनि न्यायसम्बद्धानि पारिभाषिकपदानि व्याप्तिलक्षणपरिष्कारे यथायथं प्रयुज्य तदनुरूपपरिष्कृतलक्षणोपस्थापने विवेचने च

६. पूर्वपक्षव्याप्तौ आगतासु कोटिषु उपस्थापितानां पूर्वपक्षमतानां स्फुटीकरणे

७. पूर्वपूर्वलक्षणपरित्यागबीजोद्घाटने लक्षणान्तरानुसरणौचित्यप्रदर्शने च

**(ग) लेखननैपुण्यम्**

१. पूर्वपक्षव्याप्तिषु पञ्चलक्षण्यां निर्दिष्टानां पञ्चानां लक्षणानां शुद्धलेखने

२. न्यायदर्शनसम्बद्धानां पारिभाषिकपदानां शुद्धलेखने

३. न्यायदर्शनसम्बद्धानां पारिभाषिकपदानां लक्षणप्रसङ्गे यथाप्रकरणं यथायथं पारिभाषिकपदानि प्रयुज्य शुद्धलेखने

४. अवच्छेदकावच्छिन्नेत्यादीनां न्यायसम्बद्धानां पारिभाषिकपदानां प्रयोगनिर्देशेन सह व्याप्तिलक्षणानां परिष्कारे यथायथं ह्रस्वदीर्घादिकं विचार्य शुद्धलेखने

५. पूर्वपक्षव्याप्तिपरित्यागस्य बीजं स्पष्टीकृत्य शुद्धलेखने

**कक्षा १२**

**माध्यमिकस्तरीयायां १२ कक्षायां न्यायविषयमधीत्य छात्रा अधो निर्दिष्टविषयेषु क्षमा भविष्यन्ति –**

**(क) श्रवणनैपुण्यम्**

१. व्याप्तेः सिद्धान्तलक्षणस्य अर्थप्रत्यायकत्वेन स्पष्टश्रवणे

२. व्याप्तेः सिद्धान्तलक्षणघटकानां पदानां पार्थक्येन शुद्धतया श्रवणे

३. सिद्धान्तलक्षणपरिष्कारप्रसङ्गे प्रयुक्तानां सामानाधिकरण्य-वैयधिकरण्य-अनवच्छेकत्व-प्रतिबध्यत्व-प्रतिबन्धकत्वादीनां पारिभाषिकपदानां यथायथं शुद्धश्रवणे

४. व्याप्तेः सिद्धान्तलक्षणस्य परिष्कारप्रसङ्गे पूर्वपक्षिभिरुपस्थापितानां दोषाणां यथायथं श्रवणे

५. सिद्धान्तव्याप्तिपरिष्कारप्रसङ्गे पूर्वपक्षमतखण्डनप्रसङ्गे सिद्धान्तिभिः प्रस्तुतानां युक्तीनां शुद्धश्रवणे

६. सिद्धान्तलक्षणे परिष्कारक्रमे प्रयुक्तानां पारिभाषिकपदानां शुद्धश्रवणे

७. परिष्कृतसिद्धान्तलक्षणस्य अर्थप्रत्यायकत्वेन शुद्धश्रवणे

९. साङ्ख्यकारिकान्तर्गतानां कारिकाणां शुद्धश्रवणे

१०. साङ्ख्यदर्शनसम्बद्धपारिभाषिकपदानां प्रमाणप्रमेयपदानाञ्च यथायथं शुद्धश्रवणे

**(ख) अभिव्यक्तिनैपुण्यम्**

१. सिद्धान्तव्याप्तिबोधकवाक्यस्य अर्थबोधपूर्वकशुद्धोच्चारणे

२. सिद्धान्तलक्षणपरिष्कारप्रसङ्गे प्रयुक्तानां सामानाधिकरण्य-वैयधिकरण्यादीनां पारिभाषिक-पदानामर्थ-बोधपूर्वकशुद्धोच्चारणे

३. परिष्कृतसिद्धान्तलक्षणस्य अर्थप्रत्यायकत्वेन शुद्धोच्चारणे

४. साङ्ख्यकारिकायामागतानां कारिकाणां शुद्धोच्चारणे

५. साङ्ख्यदर्शनसम्बद्धपारिभाषिकपदानां यथायथं शुद्धोच्चारणे

**(ग) लेखननैपुण्यम्**

१. सिद्धान्तलक्षणान्तर्गतपाठ्यविषयाणां शुद्धलेखने

२. सिद्धान्तलक्षणपरिष्कारप्रसङ्गे प्रयोक्तव्यानां सामानाधिकरण्य-वैयधिकरण्यादीनां पारिभाषिकपदानामर्थबोध-पूर्वकशुद्धलेखने

३. सामानाधिकरण्य-वैयधिकरण्य-अनवच्छेकत्व-प्रतिबध्यत्व-प्रतिबन्धकत्वादीनां न्यायसम्बद्धानां पारिभाषिक-पदानां यथायथं शुद्धलेखनेन सह न्याये न्यायेतरशास्त्रेषु च तत्प्रयोगप्रदर्शने

४. सिद्धान्तलक्षणस्य परिष्कारप्रसङ्गे उपस्थापितानां पूर्वपक्षमतानां शुद्धलेखने

५. परिष्कृतसिद्धान्तलक्षणस्य स्वरूपनिर्देशनेन सह शुद्धतया तल्लेखने

६. साङ्ख्यकारिकायामागतानां कारिकाणां शुद्धलेखने

७. साङ्ख्यदर्शनसम्बद्धपारिभाषिकपदानां शुद्धलेखने

९. साङ्ख्यदर्शनसम्बद्धानां सिद्धान्तानां सामान्यविश्लेषणपूर्वकशुद्धलेखने

## ४.	विषयक्षेत्रं क्रमश्च

**कक्षा ११**

| क्र. सं. | प्रकरणम् | शीर्षकम् | उपशीर्षकम् | बोधः | अभिव्यक्तिः | पाठ्य घण्टाः |
|---|---|---|---|---|---|---|
| १ | पद-निर्वचनम् | पारिभाषिक-पदानि | | न्यायसम्बद्धपारिभाषिक-पदार्थबोधः | लक्षणपरिष्कारे न्यायसम्बद्धपारिभाषिक-पदप्रयोगः | १२ |
| २ | प्रमाणम् | अनुमानम् | पूर्वपक्ष-व्याप्तिषु प्रथम-लक्षणम् | व्याप्त्यनुमानयोः सङ्गतिबोधः । अव्यभिचरितत्वशब्द-प्रतिपाद्यार्थस्य व्याप्तित्वनिरसनबोधः । नञ्द्वयग्रहणस्य सार्थक्यबोधः । साध्याभाववदवृत्तित्वम् इत्यत्र घटकपदानां व्युत्पत्तिप्रदर्शनपूर्वकं समासबोधः । | व्याप्त्यनुमानयोः सङ्गतिप्रदर्शनम् । अव्यभिचरितत्वशब्द-प्रतिपाद्यार्थस्य व्याप्तित्वभिन्नत्वनिरूपणम् । नञ्द्वयग्रहणस्य सार्थक्यनिरूपणम् । साध्याभाववदवृत्तित्वम् इत्यत्र घटकपदानां व्युत्पत्तिप्रदर्शनपूर्वकं समासप्रदर्शनम् । | १२ |
| | | | अवृत्तित्वस्य परिष्कारः । वृत्तित्वसाध्ययोः प्रतियोगितावच्छे-दकधर्मसम्बन्धः । | साध्याभाववदवृत्तित्वघटका-वृत्तित्वपदार्थबोधः । साध्यनिष्ठप्रतियोगितायाः अवच्छेदकसम्बन्ध-धर्मबोधः । | साध्याभाववदवृत्तित्वघटका-वृत्तित्वपदार्थनिरूपणम् । साध्यनिष्ठप्रतियोगितायाः अवच्छेदकसम्बन्धधर्माणां विवेचनम् । | १२ |
| | | | साध्याभावाधिकरणे साध्याभावस्य सम्बन्धविचारः । | साध्याभावनिष्ठाधेयतायाः अवच्छेदकधर्मबोधः । अभावनिष्ठाधेयतायाः विषयित्वाव्याप्यत्वादिसम्बधस्य अवच्छेदकत्वकल्पने दोषबोधः । अभावनिष्ठाधेयतायाः अभाववीयविशेषणतासम्बधस्य अवच्छेदकत्वोपस्थापने दोषबोधः । अभावनिष्ठाधेयतायाः परम्परा-सम्बन्धस्य अवच्छेदकत्वबोधः । तत्र सम्बन्धबोधकवाक्ये सामान्य-पदोपादानस्य सार्थक्यप्रदर्शनेन सह सामान्यीयत्वार्थबोधः । | साध्याभावनिष्ठाधेयतायाः अवच्छेदकधर्मनिरूपणम् । अभावनिष्ठाधेयतायाः विषयित्वाव्याप्यत्वादिसम्बधस्य अवच्छेदकत्वकल्पने दोषोद्घाटनम् । अभावनिष्ठाधेयताया अभाववीयविशेषणतासम्बन्धस्य अवच्छेदकत्वोपस्थापने दोषप्रदर्शनम् । अभावनिष्ठाधेयतायाः परम्परासम्बन्धस्य अवच्छेदकत्वोपपादनम् । परम्परासम्बन्धबोधकवाक्ये सामान्यपदोपादानस्य सार्थक्यप्रदर्शनेन सह सामान्यीयत्वपरिष्कारोपस्थापनम् । | १२ |

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | साध्याभावाधिकरणे साध्याभावस्य सम्बन्धविचार-प्रसङ्गे विविधः कल्पः । | भेदाभावसाध्यकस्थले समस्यो-पस्थापनपूर्वकसमाधानोपाय-बोधः । प्रतियोगित्वस्वरूपबोधः । साध्यतावच्छेदकसम्बन्धा-वच्छिन्नसाध्याभाववृत्तित्वे प्रतियोगिताविशेषणत्वस्य आवश्यकत्वबोधः । तत्र यद्वापक्षीयबोधः । तथा च अव्याप्यवृत्तिसाध्यक-सद्धेतौ दोषोद्भावनेन सह समाधानोपायबोधः । इदं वह्निमद् गगनाद् इत्यादावतिव्याप्तिप्रदर्शनात्मकोबोधः । द्रव्यं गुण-कर्म्मान्यत्वविशिष्टसत्त्वाद् इत्यादावव्याप्तिबोधेन सह तन्निरसनोपायः । वस्तुतस्तु, अन्ये तु केचित्तु इत्यादिमतविषयको बोधः । | भेदाभावसाध्यकस्थले समस्यो-पस्थापनपूर्वकं समाधानोपाय-विश्लेषणम् । प्रतियोगित्वस्वरूप-निरूपणम् । साध्यतावच्छेदक-सम्बन्धावच्छिन्नसाध्याभाववृत्तित्वे प्रतियोगिताविशेषणत्वस्य आवश्यकत्वप्रदर्शनम् । तत्र यद्वापक्षीयविवेचनम् । तथा च अव्याप्यवृत्तिसाध्यकसद्धेतौ दोषोद्भावनपूर्वकं समाधानोपाय-प्रदर्शनम् । इदं वह्निमद् गगनाद् इत्यादावतिव्याप्तिं प्रदर्श्य द्रव्यं गुणकर्म्मान्यत्वविशिष्टसत्त्वाद् इत्यादावव्याप्तिप्रदर्शनपूर्वकं तन्निरसनोपायनिरूपणम् । वस्तुतस्तु, अन्ये तु केचित्तु इत्यादिमतविश्लेषणम् । | १२ |
| | | | पूर्वपक्षव्याप्तिषु पञ्चलक्षण्या द्वितीयलक्षणम् | द्वितीयलक्षणानुसरणस्य बीजोपस्थापनेन सह तत्सार्थक्यबोधः । | द्वितीयलक्षणानुसरणे बीजनिरूपणम् । प्रथमलक्षणे आपतितस्य दोषस्य निराकरणम् । द्वितीयलक्षणस्य सार्थक्यनिरूपणम् | ६ |
| | | | पूर्वपक्षव्याप्तिषु पञ्चलक्षण्याः तृतीयलक्षणम् | तृतीयलक्षणानुसरणस्य बीज-प्रदर्शनेन सह तल्लक्षणबोधः । असमानाधिकरण्यपदस्य व्युत्पत्तिबोधः । | तृतीलक्षणानुसरणे बीज-निरूपणपूर्वकं तल्लक्षणोपस्थापनम् । तृतीयलक्षणघटकस्य असमाना-धिकरण्यपदस्य निरूपणम् | ६ |
| | | | पूर्वपक्षव्याप्तिषु पञ्चलक्षण्याः चतुर्थलक्षणम् | चतुर्थलक्षणार्थबोधः । लक्षणघटकसकलपदस्य परिष्कारात्मको बोधः । | चतुर्थलक्षणनिरूपणम् । अव्याप्त्यतिव्याप्तिदोषनिरसनपूर्वकं लक्षणसमन्वयप्रदर्शनम् । लक्षणघटक-सकलपदस्य विशेषणं क्व किञ्चेति स्फुटीकरणम् । | ६ |
| | | | पूर्वपक्षव्याप्तिषु पञ्चलक्षण्याः पञ्चमलक्षणम् | पञ्चमलक्षणार्थबोधः । पञ्चानामेव लक्षणानां परित्यागबीजविषयको बोधः । | पञ्चमलक्षणनिरूपणम् । पञ्चानामेव लक्षणानां न्यूनत्वनिदर्शनेन सह तत्परित्यागबीजप्रदर्शनम् । | ६ |

| | | | | | | |
|---|---|---|---|---|---|---|
| ३. | वेदान्त-दर्शनम् | मङ्गलाचरणा-दारभ्य अध्यारोप-निरूपण-पर्यन्तम् | अनुबन्धचतुष्टयम् ।<br>अधिकारिस्वरूपम् ।<br>नित्यनैमित्तिका-दिकर्माणि । साधनचतुष्टयम् ।<br>समाधिषट्कसम्पत्तिः<br>गुरुशिष्यकर्तव्यम् ।<br>अध्यारोपः । | वेदान्तशास्त्रस्य अनुबन्धचतुष्टयबोधः ।<br>अधिकारिस्वरूपबोधः ।<br>नित्यनैमित्तिकादिकर्मबोधः ।<br>साधनचतुष्टयबोधः ।<br>समाधिषट्कसम्पत्तिबोधः ।<br>गुरुशिष्यकर्तव्यबोधः ।<br>अध्यारोपबोधः । | वेदान्तशास्त्रस्य अनुबन्धचतुष्टयनिरूपणम् ।<br>अधिकारिस्वरूपोपस्थापनम् ।<br>नित्यनैमित्तिकादिकर्मविवेचनम् ।<br>साधनचतुष्टयप्रदर्शनम् ।<br>समाधिषट्कसम्पत्तिविवेचनम् ।<br>गुरुशिष्यकर्तव्यनिरूपणम् ।<br>अध्यारोपनिरूपणम् । | ९ |
| | | वेदान्तसारस्य अज्ञानस्वरूप-निरूपणा-दारभ्य स्थूलप्रपञ्च-निरूपण-पर्यन्तम् | अज्ञानस्वरूपम् ।<br>अज्ञानस्य द्वैविध्यम्<br>अज्ञानावच्छिन्न-चैतन्यस्य द्वैविध्यम्<br>वेदान्तसम्बद्धा सृष्टिप्रक्रिया ।<br>स्थूलप्रपञ्चस्वरूपम्<br>अध्यारोपः । | अज्ञानस्वरूपबोधः ।<br>अज्ञानद्वैविध्यबोधः । अज्ञाना-वच्छिन्नचैतन्य द्वैविध्यबोधः । वेदान्तदृष्टेया सृष्टिप्रक्रियाबोधः ।<br>स्थूलप्रपञ्चबोधः । | अज्ञानस्य स्वरूपनिरूपणम् ।<br>अज्ञानस्य द्वैविध्यनिर्वचनम् । अज्ञानावच्छिन्नचैतन्यस्य द्वैविध्यनिरूपणम् । वेदान्त-दृष्ट्यासृष्टिप्रक्रियायाः निरूपणम् ।<br>वेदान्तरीत्या स्थूलप्रपञ्चनिर्वचनम् । | ९ |
| ४. | योगदर्शनम् | साधनपादः | योगस्य लक्षणम् । योगलक्षणोपस्थापनस्यौचित्यम् ।<br>चित्तवृत्तीनां भेदः ।<br>चित्तवृतीनामवान्तर-भेदपुरस्सरं लक्षणोपस्थापनम् ।<br>अभ्यासवैराग्य-लक्षणम् सम्प्रज्ञातासम्प्रज्ञातसमाधिद्वयलक्षणम्, तद्भेदप्रदर्शनञ्च ।<br>ईश्वरलक्षणम् ।<br>चित्तविक्षेपान्त-रायतदभावोपस्थापनम् ।<br>मनोनिरोधोपायः ।<br>सभेदं समापत्तिस्वरूप-प्रदर्शनम् । | योगस्य लक्षणबोधः । योगस्यौचित्यविषयको बोधः ।<br>चित्तवृत्तीनां बोधः ।<br>चित्तवृतीनामवान्तरभेदबोधः । अभ्यासवैराग्यबोधः । भेदपुरस्परं सम्प्रज्ञाता-सम्प्रज्ञातसमाधिद्वयबोधः ।<br>योगसूत्ररीत्या ईश्वरपरिचयः ।<br>चित्तविक्षेपान्त्रायतदभाव-बोधः । मनोनिरोधोपायबोधः । समापत्तितद्भेदबोधश्च । | ग्रन्थारम्भप्रतिज्ञानिरूपणम् ।<br>योगस्वरूपनिर्वचनम् । भेदपुरस्सरं चित्तवृत्तीनां निरूपणम् । अभ्यासवैराग्ययोः सामान्यनिरूपणम् ।<br>सम्प्रज्ञातासम्प्रज्ञातसमाधिद्वयस्य सामान्यनिरूपणम् ।<br>योगदर्शनरीत्या ईश्वरस्वरूपनिरूपणम् ।<br>चित्तविक्षेपान्तरायतदभावनिरूपणम्<br>मनोनिरोधोपायनिरूपणम् ।<br>भेदपुरस्सरं समापत्तिनिरूपणम् । | ९ |
| | | समाधिपादः | क्रियायोगः, तत्फलञ्च<br>क्लेशपञ्चकम् । क्लेशत्यागश्च ।<br>अविद्याफलम् ।<br>दुःखम्, दुःखहानो-पायाश्च । द्रष्टृदृश्ययोः स्वरूपम्, अष्टयोगाङ्गानि | क्रियायोगतत्फलबोधः ।<br>क्लेशपञ्चक-तत्त्यागबोधश्च<br>अविद्याफलबोधः ।<br>दुःख-तद्धानोपायबोधः । द्रष्टृदृश्ययोः स्वरूपबोधः ।<br>अष्टयोगाङ्गबोधः । | क्रियायोग-तत्फलप्रदर्शनम् ।<br>क्लेशपञ्चक-तत्त्यागनिरूपणम् ।<br>अविद्याफलप्रदर्शनम् ।<br>दुःख-तद्धाहानोपयनिरूपणम् । द्रष्टृदृश्यस्वरूपविवेचनम् ।<br>अष्टयोगाङ्गविवेचनम् । | ९ |

| | |
|---|---|
| सैद्धान्तिकाभ्यासः | १२० |
| प्रयोगाभ्यासः | ४० |
| आहत्य÷योगः | १६० |

**कक्षा १२**

| क्र.सं. | प्रकरणम् | शीर्षकम् | उपशीर्षकम् | बोधः | अभिव्यक्तिः | शिक्षण घण्टाः |
|---|---|---|---|---|---|---|
| १. | पद-निर्वचनम् | पारिभाषिक-पदानि | | न्यायसम्बद्धपारिभाषिक-पदार्थबोधः | लक्षणपरिष्कारे न्यायसम्बद्धपारिभाषिक पदप्रयोगः | १८ |
| २.१ | प्रमाणम् | अनुमानम् (अनुमाने व्याप्तेः सिद्धान्त लक्षणम्) | (सिद्धान्तलक्षणादारभ्य दण्ड्यादौ साध्ये इत्यादि-दीधितिग्रन्थान्तो भागः)<br>चालनीयन्यायेनाभाव-मादायाव्याप्तिः ।<br>अनवच्छेदकत्वानुसरण-घटितलक्षणम् ।<br>महानसीयवह्न्यभावमादाय अव्याप्तिः ।<br>मूलोक्ततद्पदस्य तद्धर्मावच्छिन्नपरत्वम् ।<br>विशिष्टसाध्यतावच्छेदक-स्थले अव्याप्तिः<br>विशिष्टसाध्यतावच्छेदकक-स्थलीयनिरवच्छिन्न-साध्यतावच्छेदककस्थलीये लक्षणे ।<br>दण्ड्यादौ साध्ये ... इत्यत्र आदिपदप्रयोगस्य औचित्यम् ।<br>प्रतियोगितावच्छेदकतानवच्छेद कत्वघटितलक्षणम् ।<br>परम्परया दण्डत्वस्य साध्यतावच्छेदकत्वव्यवस्थापन म् ।<br>केचित्तु यत्तु अपरे तु नव्यास्तु इत्यादीनां मतानि । | चिन्तामण्युक्तसिद्धान्तलक्षणे ‘वह्निमान् धूमाद्’ इत्यत्र चालनीयन्यायेन अभावमादाय अव्याप्तिबोधः) -तद्वारणोपायबोधश्च ।<br>अनवच्छेदकत्वानुसरणघटित -लक्षणवाक्यबोधः ।<br>अनवच्छेदकत्वघटितलक्षणे दोषोद्भावनबोधः । तद्वारणोपायबोधश्च ।<br>महानसीयवह्न्यभावमादाय अव्याप्तिवारणाय उपायान्तरबोधः<br>मूलोक्ततद्पदस्य तद्धर्मावच्छिन्नपरत्वबोधः ।<br>विशिष्टसाध्यतावच्छेदक-स्थलबोधः । तत्राव्याप्तिस्तद्वारणोपाय-बोधश्च ।<br>विशिष्टसाध्यतावच्छेदकक-स्थलीयनिरवच्छिन्नसाध्यताव च्छेदककस्थलीययोर्लक्षणयोब धिः<br>दण्ड्यादौ साध्ये ... इत्यत्र आदिपदस्य सार्थक्यबोधः ।<br>प्रतियोगितावच्छेदकतानवच्छे द-कत्वघटितलक्षणस्वरूपबोधः ।<br>परम्परया दण्डत्वस्य साध्यतावच्छेदकत्वबोधः ।<br>केचित्तु यत्तु अपरे तु नव्यास्तु इत्यादीनां मतानां बोधः । | चिन्तामण्युक्तसिद्धान्तल क्षणे ‘वह्निमान् धूमाद्’ इत्यत्र चालनीयन्यायेन अभावमादाय अव्याप्तिप्रदर्शनेन सह तद्वारणोपाय-प्रदर्शनम् । अनवच्छेदकत्व-घटितलक्षणोपस्थापनम् ।<br>अनवच्छेदकत्वघटितलक्ष णे दोषप्रदशनपूर्वकस्तद्वा रणोपाय-विचारः ।<br>महानसीयवह्न्यभावादा य अव्याप्तिवारणाय उपायान्त-राणामवलम्बने दोषोद्भावनम् ।<br>मूलोक्ततद्पदस्य तद्धर्मावच्छिन्नपरतया व्याख्यानस्य प्रयोजनप्रदर्शनम् ।<br>विशिष्टसाध्यतावच्छेदक स्थले अव्याप्तिस्तद्वारणोपाय प्रदर्शनम् विशिष्टसाध्यतावच्छेदक कस्थलीय-निरवच्छिन्नसाध्यतावच छेदकक-स्थलीययोर्लक्षणयोर्निरू पणम् ।<br>दण्ड्यादौ साध्ये ... इत्यत्र आदिपदप्रयोगस्यौचित्य प्रदर्शनम् | १२ |

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | प्रतियोगितावच्छेदकता नवच्छेद-कत्वघटितलक्षणपरिष्कारः ।<br>परम्परया दण्डत्वस्य साध्यतावच्छेदकत्वं प्रदर्श्य तत्र दोषोद्भावनम् ।<br>केचित्तु यत्तु अपरे तु नव्यास्तु इत्यादीनां मतानां परिशीलनम् | |
| | | | (इत्थञ्च इदं द्रव्यं गुण-कर्मान्यत्वे सति इत्यारभ्य साध्यसाधनभेदेन व्याप्तेर्भेदाद् इति वदन्तीति इति यावत्)<br>यत्पदं यद्धर्मावच्छिन्नपरम्<br>इदं द्रव्यमित्यत्र पक्षनिर्देशः<br>'यद्यपि अवश्यक्लृप्तम्' इत्यस्य तात्पर्यार्थः ।<br>द्विविधव्याप्ती ।<br>अव्याप्यवृत्तिसाध्यकस्थले अव्याप्तिः । नव्यमतेन प्रतियोग्यसमानाधि-करणान्तपदम् ।<br>वृक्षे संयोगसामान्याभाव-प्रत्यक्षे बाधकम् ।<br>द्रव्ये संयोगासामान्याभाव-साधकानुमानम् ।<br>संयोगसामान्याभावसाधक-विशेषानुमानम्<br>द्रव्ये संयोगसामान्याभाव-साधने केचित्तु-यत्त्वादीनां मतानि ।<br>प्रतियोग्यसमानाधिकरणेति पदानुपाने नवीनमते दोषः नोपादेयञ्चेति दीधितिग्रन्थस्याशयः ।<br>सत्तावान् जातेरित्यत्राऽव्याप्तिः | यत्समानाधिकरण इत्यत्र मूले यत्पदस्य यद्धर्मावचिछन्नार्थबोधः ।<br>इदं द्रव्यमित्यत्र पक्षनिर्देशसार्थक्यबोधः ।<br>'यद्यपि अवश्यक्लृप्तम्' इत्यस्य तात्पर्यार्थबोधः ।<br>द्विविधव्याप्तिबोधः ।<br>अव्याप्यवृत्तिसाध्यकस्थले अव्याप्तिबोधः । नव्यमतेन प्रतियोग्यसमानाधिकरणान्त-पदार्थबोधः । वृक्षे संयोगसामान्याभावप्रत्यक्षे बाधकबोधः । द्रव्ये संयोगसामान्याभावसाधकानुमा-नोपस्थापनसामर्थ्यबोधः ।<br>संयोगसामान्याभावसाधकविशेषा-नुमानबोधः । द्रव्ये संयोगसामान्याभावसाधने केचित्तु-यत्त्वादीनां मतबोधः ।<br>प्रतियोग्यसमानाधिकरणेति पदानुपादाने नवीनमते दोषबोधः<br>नोपादेयञ्चेति दीधितिग्रन्थ-स्याशयबोधः ।<br>व्याप्यवृत्तिसाध्यकस्थले प्रतियोग्यसमानाधिकरणेति पदानुपादाने सत्तावान् जातेरित्यादिस्थलेऽव्याप्तिबोधः । | यत्समानाधिकरण इत्यत्र मूले यत्पदं यद्धर्मावच्छिन्नपरतया व्याख्येयम्, तत्प्रयोजनञ्च प्रकाश्यम् ।<br>इदं द्रव्यमित्यत्र पक्षनिर्देशप्रयोजनकथनम् ।<br>'यद्यपि अवश्यक्लृप्तम्' इत्यादि जागदीशीग्रन्थस्य तात्पर्यार्थ-प्रकाशनम् । सामानाधिकरण्यस्य व्याप्तित्वे दोषमुद्भाव्य तद्वारणोपाये दीधितिकृदुक्तयोः द्विविधव्याप्त्योः स्वरूपनिर्वचनम्<br>अव्याप्यवृत्तिसाध्यकस्थले अव्याप्तिप्रदर्शनम् । तद्वारणाय प्रतियोग्यसमानाधि-करणमिति पदस्य प्रयोजन-कथनञ्च । नव्यमतेन प्रतियोग्यसमानाधिकरणान्त-पदस्य प्रयोजननिरूपणम् ।<br>वृक्षे संयोगसामान्याभावप्रत्यक्षे बाधकोपस्थापनम् । द्रव्ये संयोगसामान्याभावसाधकानु-मानोपस्थापनम् । संयोग-सामान्याभावसाधकविशेषा-नुमानोपस्थापनम् । द्रव्ये संयोगसामान्याभावसाधने केचित्तुयत्त्वादीनां | १८ |

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | मतविवेचनम् ।<br>प्रतियोग्यसमानाधिकरणेति पदानुपादाने नवीनमते आपतितदोषोद्भावनम् ।<br>नोपादेयञ्चेति दीधितिग्रन्थ-स्याशयप्रदर्शनम् । व्याप्यवृत्ति-साध्यकस्थले प्रतियोग्य-समानाधिकरणेति पदानुपादाने सत्तावान् जातेरित्यादिस्थलेऽ-व्याप्तिनिरूपणम् । | |
| | | | प्रतियोग्यसमानाधिकरणञ्चेत्यारभ्य प्रयोजनविरहोऽ-व्याप्तिश्चेति भागः)<br>प्रतियोग्यसमानाधि-करणास्यार्थः ।<br>जातिहेतुं परित्यज्य मूर्तत्वहेतोरुपादानम् ।<br>सार्वभौममतेन उभयत्वपदार्थः ।<br>अत्यन्तपदस्य प्रयोजनम् ।<br>कालो गोमान् गोत्वाद् इत्यत्रातिव्याप्तिः ।<br>संसर्गाभावप्रवेशः ।<br>ध्वंसप्रागभावीय-प्रतियोगितायाअवच्छेदकधर्मसम्बन्धौ ।<br>देशवृत्तितायां कालस्य कालवृत्तितायाञ्च देशस्य अवच्छेदकत्वम् ।<br>संसर्गाभावप्रवेशे प्रयोजनविरहोऽव्याप्तिश्च दीधितेराशयः । | प्रतियोग्यसमानाधिकरणस्यार्थ-बोधः । जातिहेतुं परित्यज्य मूर्तत्वहेतौ अतिव्याप्तिबोधः ।<br>सार्वभौममतेन उभयत्वपदार्थ-बोधः । मौलोक्तात्यन्तपदस्य प्रयोजनबोधः । अत्यन्ताभावनिवेशे कालो गोमान् गोत्वाद् इत्यत्रातिव्याप्तिबोधः ।<br>मिश्रमतानुसारेण संसर्गाभाव-प्रवेशे कालो द्व्यणुकवान् स्पन्दाद् इत्यादावतिव्याप्तिबोधः<br>ध्वंसप्रागभावीयप्रतियोगितायाः अवच्छेदकधर्मसम्बन्धबोधः ।<br>देशवृत्तितायां कालस्य कालवृत्तितायां देशस्य अवच्छेदकत्वबोधः ।<br>संसर्गाभावप्रवेशे प्रयोजनविरहोऽ-व्याप्तिश्चेति दीधितेरर्थबोधः । | प्रतियोग्यसमानाधिकरणस्यार्थ-निरूपणम् । जातिहेतुं परित्यज्य मूर्तत्वहेतौ अतिव्याप्तिकथनम् ।<br>सार्वभौममतेन उभयत्व-पदार्थविवेचनम् । मौलोक्ता-त्यन्तपदस्य प्रयोजनकथनम् ।<br>अत्यन्ताभावनिवेशे कालो गोमान् गोत्वाद् इत्यत्राति-व्याप्तिप्रदर्शनम् ।<br>मिश्रमतानुसारेण संसर्गाभावप्रवेशे कालो द्व्यणुकवान् स्पन्दाद् इत्यादावतिव्याप्तिकथनम् ।<br>ध्वंसप्रागभावीयप्रतियोगितायाः अवच्छेदकधर्मसम्बन्धनिरूपणम्<br>देशवृत्तितायां कालस्य कालवृत्तितायां देशस्य अवच्छेदकत्वकथनम् ।<br>संसर्गाभावप्रवेशे प्रयोजनविरहोऽव्याप्तिश्चेति दीधितेरर्थप्रकाशनम् । | १२ |
| | | | (अथ ज्ञानवान् द्रव्यत्वाद् इत्यारभ्य धर्मिणोः धर्मव्याप्यव्यापकत्वे बोध्ये अतः एव .. सङ्गच्छेत | ज्ञानवान् द्रव्यत्वाद् इत्यादिस्थले अतिव्याप्तिबोधः ।<br>प्रतियोगितावच्छेदकसम्बन्धेन | ज्ञानवान् द्रव्यत्वाद् इत्यादिस्थले अतिव्याप्तिप्रदानम्, तद्वारणोपायप्रदर्शनम् | १२ |

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | इत्यन्तो भागः)<br>ज्ञानवान् द्रव्यत्वाद् इत्यत्रातिव्याप्तिः । प्रतियोगितावच्छेदक-सम्बन्धेन प्रतियोगिनोऽ-धिकरणविवक्षणेनाति-व्याप्तिवारणम् ।<br>अधिकरणपदं विहाय सम्बन्धिपदनिवेशनम्<br>प्रतियोग्यसमानाधिकरणेति पदस्य प्रतियोगिसमानाधि-करणभिन्नार्थः प्रतियोग्य-समानाधिकरणहेत्वधि-करणेत्यस्यार्थः ।<br>हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणे साध्यतावच्छेदकसम्बन्धा-वच्छिन्नप्रतियोगिताकाभा-वमादाय लक्षणसङ्गतिः साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वप्रवेशः । | प्रतियोगिनोऽधिकरणविवक्षणेना-तिव्याप्तिवारणबोधः ।<br>अधिकरणपदं विहाय सम्बन्धि-पदनिवेशेन अव्याप्यवृत्तिसाध्यक-स्थले अव्याप्तिवारणोपायबोधः<br>प्रतियोग्यसमानाधिकरणेति पदस्य प्रतियोगिसमानाधिकरण-भिन्नार्थपरत्वे दोषबोधः ।<br>प्रतियोग्यसमानाधिकरणहेत्वधिक-रणेत्यस्यार्थबोधः ।<br>हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणे साध्यतावच्छेदक-सम्बन्धावच्छिन्नप्रतियोगिताका-भावमादाय लक्षणसङ्गतिबोधः ।<br>साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वप्रवेशे प्रतियोगितायां साध्यतावच्छेदक-सम्बन्धावच्छिन्नत्वं न देयमिति प्रसङ्गबोधः ।<br>लक्षणेऽत्राधिकरणस्थले सम्बन्धिपदं वृत्तिस्थले च सम्बद्धेति पदं निवेश्य लक्षणनिर्वचने तादात्म्येन हेतुसाध्यकस्थले धर्मिणोऽपि धर्मव्याप्यव्यापकत्वबोधः । | ।<br>प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिनोऽधिकरणविवक्षणेना-तिव्याप्तिवारणकथनम् ।<br>अधिकरणपदं विहाय सम्बन्धिपदनिवेशेन अव्याप्यवृत्तिसाध्यकस्थलेऽव्याप्तिवारणोपायप्रदर्शनम् ।<br>प्रतियोग्यसमानाधिकिरणेति पदस्य प्रतियोगिसमानाधिकरण-भिन्नार्थपरत्वे दोषप्रदर्शनम् ।<br>प्रतियोग्यसमानाधिकरण हेत्वधिक-रणेत्यस्यार्थनिर्वचनम् ।<br>हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणे साध्यतावच्छेदक-सम्बन्धावच्छिन्नप्रतियोगिताका-भावमादाय लक्षणसङ्गति-प्रदर्शनम् । साध्यतावच्छेदक-सम्बन्धेन प्रतियोग्यनधिकरणत्व-प्रवेशे प्रतियोगितायां साध्यता-वच्छेदकसम्बन्धावच्छिन्नत्वं न देयमिति प्रसङ्गनिरूपणम् ।<br>लक्षणेऽत्राधिकरणस्थले सम्बन्धिपदं वृत्तिस्थले च सम्बद्धेति पदं निवेश्य लक्षणकरणे तादात्म्येन हेतुसाध्यकस्थले धर्मिणोऽपि धर्मव्याप्यव्यापकत्वे सम्पादनीय इति प्रसङ्गनिरूपणम् । | |
| | | | (यथा च यादृशेन सम्बन्धेन हेतोर्व्याप्यता इत्यारभ्य हेत्वधिरणीभूत-यत्किञ्चिद्व्यक्त्यनुयोगि-कत्वसामान्योभयाभावस्य विवक्षितत्वात् इत्यन्तो भागः)<br>व्याप्यतावच्छेदकसम्बन्धेन पक्षे हेतुमत्ताज्ञानेन | व्याप्यतावच्छेदकसम्बन्धेन पक्षे हेतुमत्ताज्ञानेन व्यापकता-वच्छेदकसम्बन्धेन पक्षे साध्यस्यानुमितिर्भवतीति प्रसङ्गबोधः ।<br>वृत्त्यनियामकसम्बन्धेन साध्यत्वं सम्भवति न वेति बोधः | व्याप्यतावच्छेदकसम्बन्धेन पक्षे हेतुमत्ताज्ञानेन व्यापकतावच्छेदकसम्बन्धेन पक्षे साध्यस्यानुमितिर्भवतीति प्रसङ्गनिरूपणम् ।<br>वृत्त्यनियामकसम्बन्धेन साध्यत्वं सम्भवति न | १२ |

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | व्यापकतावच्छेदक-सम्बन्धेन पक्षे साध्यस्यानुमिति-र्भवतीति प्रसङ्गः ।<br>वृत्त्यनियामकसम्बन्धेन साध्यत्वं सम्भवति न वेति विचारः ।<br>कालिकसम्बन्धेन घटादेः साध्यकस्थले अव्याप्तिः<br>पूर्वपक्षिणां मतोपस्थापन-पूर्वकं तत्र दोषप्रदर्शनम् ।<br>सम्बन्धधर्मिकोभयाभाव-घटितलक्षणोपस्थापनम् । | कालिकसम्बन्धेन घटादेः साध्यकस्थले अव्याप्तिबोधः ।<br>पूर्वपक्षिणां मतबोधपूर्वकस्तत्र दोषबोधश्च ।<br>सम्बन्धधर्मिकोभयाभावघटित-लक्षणोपस्थापनविषयको बोधः । | वेति निरूपणम् ।<br>कालिकसम्बन्धेन घटादेः साध्यकस्थले अव्याप्तिप्रदर्शनम्<br>तद्वारणाय पूर्वपक्षिणां मतोपस्थापनं तत्र दोषप्रदर्शनञ्च । सम्बन्धधर्मिकोभयाभाव घटित-लक्षणप्रतिपादनम्, तल्लक्षणे समन्वयप्रदर्शनञ्च । | |
| | | | (धूमसंयोगे वह्न्यधिरणा-योगोलकानुयोगिकत्वस्य इत्यारभ्य अवशिष्टान्तो भागः)<br>सम्बन्धर्मिकोभयाभावघटितल क्षणस्यासद्धेतौ अतिव्याप्तिः ।<br>स्वरूपसम्बन्धेन गगनादेर्वृत्तिमत्त्वपक्षे प्रतियोगिताधर्मिकोभयाभावघटितलक्षणमनुसृत्य महाकालत्वहेतावव्याप्ति-निरासः ।<br>समवायस्यैकत्वे द्रव्यं जातेरित्यादौ कथमतिव्याप्तिवारणमिति सोहापोहविचारः ।<br>प्रतियोत्वादयः पदार्थाः किमात्मकाः ? लक्षणे प्रवेशनीया इत्यस्मिन् विषये विचारः ।<br>लक्षणेऽत्र अभावत्वं कीदृशं ग्राह्यमिति विचारः । | सम्बन्धधर्मिकोभयाभावघटित-लक्षणस्यासद्धेतौ अतिव्याप्तिबोधः ।<br>स्वरूपसम्बन्धेन गगनादेर्वृत्तिमत्त्वपक्षे प्रतियोगिताधर्मिकोभयाभावघटितलक्षणमनुसृत्य महाकालत्व-हेतावव्याप्तिनिरासबोधः ।<br>समवायस्यैकत्वे द्रव्यं जातेरित्यादौ कथमतिव्याप्ति-वारणमिति बोधः ।<br>प्रतियोगित्वादयः पदार्थाः किमात्मकाः ? लक्षणे प्रवेशनीया इति बोधः ।<br>लक्षणेऽत्र अभावत्वं कीदृशं ग्राह्यम् ? इति शङ्कापक्षविषयको बोधः । | सम्बन्धधर्मिकोभयाभाव घटित-लक्षणस्यासद्धेतौ अतिव्याप्तिनिवारणम् ।<br>स्वरूपसम्बन्धेन गगनादेर्वृत्तिमत्त्वपक्षे प्रतियोगिताधर्मिकोभयाभाव-घटितलक्षणमनुसृत्य महाकालत्वहेतावव्याप्ति निरास-प्रदर्शनम् ।<br>समवायस्यैकत्वे द्रव्यं जातेरित्यादौ कथमतिव्याप्तिवारणमिति सोहापोहनिरूपणम् ।<br>प्रतियोगित्वादयः पदार्थाः किमात्मकाः ? लक्षणे प्रवेशनीया इति स्फुटीकरणम् ।<br>लक्षणेऽत्र अभावत्वं कीदृशं ग्राह्यम् ? इति सोदाहरणं प्रतिपादनम् । | १२ |
| ३.२ | साङ्ख्य-दर्शनम् । | साङ्ख्य-कारिकायाः मङ्गला-चरणतः करणविभागं यावत् । | दुःखत्रयम्<br>तद्धानोपायः ।<br>साङ्ख्यप्रतिपादितानि तत्त्वानि ।<br>प्रधानादीनामनुपलब्धौ कारणम् ।<br>सत्कार्यवादः<br>व्यक्ताव्यक्तयोः सारूप्यवैरूप्ये साधर्म्यञ्च<br>व्यक्ताव्यक्तयोः पुरुषेण सह वैधर्म्यम् । | दुःखत्रयबोधः<br>तद्धानोपायबोधः ।<br>साङ्ख्यप्रतिपादिततत्त्वानां परिचयात्मको बोधः ।<br>प्रधानादीनामनुपलब्धौ कारणबोधः ।<br>सत्कार्यवादस्य सामान्यबोधः<br>व्यक्ताव्यक्तयोः सारूप्यवैरूप्य-बोधः । व्यक्ताव्यक्तयोः साधर्म्यबोधः । | दुःखत्रयनिरूपणम्<br>तद्धानोपायनिरूपणम् ।<br>साङ्ख्यप्रतिपादिततत्त्वानामुद्देशमात्रम् ।<br>प्रधानादीनामनुपलब्धौ कारणविवेचनम् ।<br>सत्कार्यवादनिरूपणम्<br>व्यक्ताव्यक्तयोः सारूप्यवैरूप्य-प्रदर्शनम् । व्यक्ताव्यक्तयोः साधर्म्यनिरूपणम् । | १२ |

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | गुणत्रयस्य लक्षणम् ।<br>पुरुषबहुत्वसिद्धिः ।<br>विवेकज्ञानस्य उपयोगिता पुरुषधर्माः<br>पुरुषप्रकृत्योः संयोगस्य प्रयोजनम् ।<br>सृष्टेः क्रमः ।<br>बुद्धेर्लक्षणम्, तद्धर्मश्च ।<br>अहङ्कारलक्षणम्, तस्य कार्यभेदः ।<br>इन्द्रियाणामन्तः-करणानाञ्च वृत्तयः ।<br>करणभेदाः । | व्यक्ताव्यक्तयोः पुरुषेण सह वैधर्म्यबोधः ।<br>गुणत्रयस्य लक्षणबोधः ।<br>पुरुषबहुत्वबोधः ।<br>विवेकज्ञानस्य उपयोगिताबोधः ।<br>पुरुषधर्मबोधः ।<br>पुरुषप्रकृत्योः संयोगस्य प्रयोजनपरको बोधः ।<br>सृष्टेः क्रमबोधः ।<br>बुद्धेर्लक्षणबोधः ।<br>अहङ्कारलक्षणबोधपूर्वकस्तस्य कार्यभेदस्य बोधः ।<br>इन्द्रियाणामन्तःकरणानाञ्च वृत्तिबोधः ।<br>करणभेदबोधः । | व्यक्ताव्यक्तयोः पुरुषेण सह वैधर्म्यनिरूपणम् ।<br>गुणत्रयस्य लक्षणनिरूपणम् ।<br>पुरुषबहुत्वसिद्धिविवेचनम् ।<br>विवेकज्ञानस्योपयोगितायाः विश्लेषणम् ।<br>पुरुषधर्म-प्रकाशनम् ।<br>पुरुषप्रकृत्योः संयोगस्य प्रयोजनप्रदर्शनम् ।<br>सृष्टेः क्रमनिरूपणम् ।<br>बुद्धेर्लक्षणं निरूप्य तत्तद्धर्म-विवेचनम् ।<br>अहङ्कारलक्षण-कथनपूर्वकं तस्य कार्यभेद-निरूपणम् ।<br>इन्द्रियाणामन्तः-करणानाञ्च वृत्तिनिरूपणम् ।<br>करणभेदविवेचनम् । | |
| | | अन्तःकरणस्य वैविध्य-विवेचनतः अन्तं यावत् | बाह्येन्द्रियाणां विषयाः ।<br>इन्द्रियाणां कार्याणि ।<br>स्थूलसूक्ष्मशरीरम् ।<br>अशक्तितुष्टिसिद्धयः ।<br>प्रकृतिकृतसर्गः ।<br>बन्धमोक्षयोः प्रकृति-धर्मत्वम् । साङ्ख्य-शास्त्रीयतत्त्वस्य उपयोगः । विशुद्धकेवल-ज्ञानस्य फलम् ।<br>तत्त्वज्ञानानन्तरं शरीरस्य स्थितिः । | बाह्येन्द्रियाणां विषयबोधः ।<br>इन्द्रियाणां कार्यबोधः ।<br>स्थूलसूक्ष्म-शरीरबोधः । अशक्तितुष्टि-सिद्धीनां सामान्यपरिचयः ।<br>प्रकृतिकृतसर्गबोधः ।<br>बन्धमोक्षयोः प्रकृतिधर्मत्वबोधः ।<br>साङ्ख्यशास्त्रीयतत्त्वस्य उपयोगबोधः । विशुद्धकेवल-ज्ञानस्य फलबोधः ।<br>तत्त्वज्ञानानन्तरं शरीरस्य स्थितिबोधः । | बाह्येन्द्रियाणां विषयनिरूपणम् इन्द्रियाणां कार्यनिर्देशनम् ।<br>स्थूलसूक्ष्मशरीरनिरूपणम् ।<br>अशक्तितुष्टिसिद्धीनां परिगणनम् ।<br>प्रकृतिकृतसर्गविवेचनम् ।<br>बन्धमोक्षयोः प्रकृतिधर्मत्व-निरूपणम् । साङ्ख्यशास्त्रीय-तत्त्वस्योपयोगप्रदर्शनम् ।<br>विशुद्धकेवलज्ञानस्य फलनिरूपणम् ।<br>तत्त्वज्ञानानन्तरं शरीरस्य स्थितिविषयकं विवेचनम् । | १२ |
| सैद्धान्तिकाभ्यासः | | | | | | १२० |
| प्रयोगाभ्यासः | | | | | | ४० |
| आहत्य÷योगः | | | | | | १६० |

### ५. प्रयोगात्मककार्यं परियोजनाकार्यञ्च

| क्र.सं. | क्षेत्रम् | परीक्षणीयाः पक्षाः | अङ्कभारः | मूल्याङ्कनाधाराः |
|---|---|---|---|---|
| १. | शिक्षण-सहभागिता | (क) उपस्थितिः<br>(ख) सहभागिता | ३ | विद्यार्थिनां दैनिकोपस्थितेरभिलेखः<br>साङ्ख्ययोगन्यायवेदान्तसम्बद्ध-विषयवस्तूनां ज्ञानार्जने तत्सबद्धपारिभाषिकपदानां प्रयोगसामर्थ्यसम्पादनम् । तेषां प्रयोगेण सह वाक्यनिर्माणे विवेचने च व्युत्पत्तिसम्पादनसहभागिता । |
| २. | कक्षाकार्यं परियोजना-कार्यं वा | कक्षाकार्यं परियोजनाकार्यं वा | ६ | श्रवण-भाषण-पठन-लेखनशिल्पविकास-सम्बद्धा लिखिता मौखिकी च प्रस्तुतिः<br>गृहकार्यं कक्षाकार्यं च<br>सम्पादितानां कार्याणां प्रतिवेदनानामभिलेखस्य संरक्षणञ्च<br>विषयवस्तुसम्बद्ध-परियोजनाकार्यस्य प्रतिवेदनमन्तर्वार्ता च |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | (क) बोधः | ५ | रेडियो-क्यासेट-मोबाइल-नामधेयानामन्येषां वैद्युतोपकरणानां वा माध्यमेनाभिव्यक्तिः<br>श्रुतिलेखनम्<br>विद्यार्थिषु पाठ्यवस्तुबोधः, आवश्यकतानुसारेण निर्दिष्टव्याप्तिसम्बद्धलक्षणानां सपरिष्कारं व्युत्पादनम् ।<br>साङ्ख्ययोगवेदान्तसम्बद्धानां दार्शनिकसिद्धान्तानां विवेचनम्, तत्सम्बद्धानां पारिभाषिकपदानाञ्च सबोधः प्रयोगः । |
| | | (ख) अभिव्यक्तिः | ५ | पूर्वोत्तरपक्षगतव्याप्तिलक्षणोपस्थापनम्, लक्ष्ये लक्षण-समन्वयप्रदर्शनम्, अव्याप्त्यादिदोषोद्भावनम्, तदपाकरणम्, निष्कृष्टलक्षणानां सपरिष्कारमुपस्थापनम्, प्रथमादिलक्षणपरित्यागबीजोस्थापनपूर्वकं सिद्धान्तलक्षणानुसरणौचित्यप्रदर्शनम् ।<br>साङ्ख्ययोगवेदान्तदर्शनसम्बद्धानां प्रकरणगतानां विषयाणां सैद्धान्तिकं प्रतिपादनम् । |
| ४. | त्रैमासिकपरीक्षा | मौखिकं लिखितं वा | ६ | त्रैमासिकपरीक्षायाः प्राप्ताङ्कस्यानुपातिकप्रतिशताधारेणाङ्कनिर्धारणं कर्तव्यम् |
| योगः | | | २५ | |

### ६. शिक्षणसहजीकरणप्रक्रिया

नैपालकमूल्यमान्यताऽऽदर्शानामध्ययनस्य माध्यमेन विद्यार्थिनां मौलिकसंस्कृतिसभ्यतयोर्विविधपक्षाणां ज्ञानेन सह सच्चरित्रवतां नैतिकतायुतानां च नागरिकाणां निर्माणमस्य विषयस्योद्देश्यं विद्यते । एतस्मिन् सन्दर्भे नेपालस्य सभ्यता-संस्कृति-मर्यादाऽऽदर्शमौलिकपरम्पराप्रभृतिनैतिकसांस्कृतिकवैभवौस्सह सम्बद्धानि विविधक्षेत्राणि समाविश्य अयं पाठ्यक्रमो निर्मितोऽस्ति । एतस्मिन् समाविष्टानां विषयवस्तुनामध्यापनक्रमे सर्वेभ्यः क्षेत्रभ्यः समानं महत्त्वं प्रदातव्यं भवति । सम्बद्धविषयवस्तुनः सहजीकरणपूर्वकं ज्ञानशिल्पधारणानां विकासनमावश्यकम् । विद्यार्थिषु सैद्धान्तिकपक्षेण सह व्यावहारिकपक्षञ्च विकासस्यानुकूलचिन्तनव्यवहारयोः समुन्नयनमेतस्य विषयस्य मुख्योद्देश्यं निर्धारितं वर्तते ।

न्यायविषयस्य अध्यापने अध्ययने तज्ज्ञाने च शिक्षणसहजीकरणप्रक्रिया अपरिहार्या भवति । अत्र खलु यद्यपि विद्यार्थिकेन्द्रितक्रियाकलापे बलं देयमथापि शिक्षककेन्द्रितक्रियाकलापा अपि न त्याज्याः । कक्षायां शिक्षकः स्वयमपि सक्रियो जागरूको वा भवेत् । ततोऽपि छात्रा उत्सुका जागरूकाश्च भवेयुः । अतो मूलतो विद्यार्थिकेन्द्रितविधिरवलम्बलनीयः । यान् विधीनवलम्ब्य शिक्षणकार्ये सम्पादिते सति छात्राणां सम्यग् बोधः सम्पद्येत, तथाविधाः ये केऽपि विधयः शिक्षकेण प्रयोक्तुं शक्यन्ते । पाठ्यक्रमप्रकरणगतान् विषयान् बोधयितुं शिक्षणसहजीकरणप्रक्रियायाः कृते अधस्तनाः शिक्षणपद्धतयोऽवलम्बनीयाः -

#### (क) व्याख्यानविधिः

अत्र विधौ छात्राणां पुरतः यथाप्रकरणान्तर्गतं पाठ्यं विषयं प्रस्तुत्य सम्यग् विवरणं देयम् । व्याख्यामुखेन पाठ्यविषयः

सम्यक् स्फुटीकर्तव्यः ।

**(ख) प्रश्नोत्तरविधिः**

अत्र विधौ पूर्वं व्याख्याते विवृते च विषये छात्राणां कियान् बोधो जातः ? इति ज्ञानार्थं पाठितविषये छात्राः प्रष्टव्याः । अज्ञाते अस्पष्टे च पुनर्व्याख्या विधेया ।

**(ग) प्रदर्शनविधिः (प्रयोगविधिः)**

न्याये तत्रापि नव्यन्याये लक्षणबाहुल्याल्लक्ष्ये तत्समन्वयप्रकारबोधनावसरे प्रथमतो लक्षणघटकानि तत्परिष्कारघटकानि पारिभाषिकपदानि विद्यार्थिनां पुरतः श्यामपट्टादिषु विलिख्य व्याख्याय च तेषां समन्वयप्रकारं प्रदर्श्य छात्राः प्रष्टव्याः, बोधस्थितिं विचार्य पुनर्व्याख्या च विधेया ।

**(घ) अवेक्षणविधिः**

लक्षणघटकानां पदानां परस्परं समन्वयः कथम् ? कथञ्चान्यत्रापि तानि पदानि प्रयोक्तव्यानीति छात्राः सावधानतया प्रत्यक्षतोऽवक्षेरन् । अयं विधिर्विशेषतो विद्यार्थिकेन्द्रितः ।

**(ङ) अन्तःक्रियात्मकविधिः**

पाठितस्य अंशस्य छात्राणां बोधः कियान् कीदृशश्च जातः ? इति ज्ञानार्थं छात्रैः सह शिक्षकस्य परस्परं छात्राणाञ्च अन्तःक्रिया कार्या । अज्ञाते स्थले च पुनर्व्याख्या विधेया ।

**(च) आगमनविधिः**

प्रथमतः कस्यापि विषयस्य नियमं लक्षणं वानुक्त्वा तद्विषयकं विवरणं लक्ष्यस्थलं वोपस्थापनीयम् । ततः एव व्याख्यातस्य विषयस्य नियमो लक्षणं वा वाच्यम् । विद्यार्थिनां बोधाभावे ते पुनर्बोधनीयाश्च ।

**(छ) निगमनविधिः**

अत्र विधौ आगमनविधिविपरीततया व्याख्येयस्य विषयस्य नियमं लक्षणं वा विविच्य उदाहरणं लक्ष्यस्थलं वोपस्थापनीयम् । ततः कथञ्च लक्षणस्य लक्ष्ये समन्वयो भवतीति च सम्यग् विवेच्यम् ।

उक्तान् शिक्षणविधीन् प्रयुज्य सहजाध्यापनस्य कृते शिक्षकैरधस्तनाः केचन विषया विशेषतोऽवधेयाः -

(अ) शिक्षकेण वार्षिकीं मासिकीं पाक्षिकीं साप्ताहिकीं दैनिकीञ्च शिक्षणयोजनाम् एवमेव पाठ्यांश-शिक्षण-योजनां दैनिक-पाठयोजनां च निर्माय, तदनुसारेण शिक्षणकार्यं सम्पादनीयम् ।

(आ) पाठ्यविषयेषु छात्राणां यथा रुचिः प्रवृत्तिश्च सम्पद्येत तदनुरूपं शिक्षणं सम्पादनीयम् ।

(इ) पाठ्यमानस्य पूर्वं पाठितस्य च विषयस्य सम्बन्धं बोधयित्वैव पाठ्यकार्यमारभणीयम् ।

(ई न्यायविषयस्य पाठनक्रमे प्रथमतस्तस्मिन् पाठे प्रयोक्तव्यानां पारिभाषिकपदानां छात्रेभ्यः परिचयं दŒवा तेषां प्रयोगस्थलञ्च निर्देष्टव्यम् ।

(उ) व्याप्तिविषयकाध्यापनक्रमेऽनुमानचिन्तनप्रक्रियायां व्याप्तिबोधस्य अपरिहार्यत्वे महŒवे च छात्रा असकृद् उद्बोध्याः ।

(ऊ) व्याप्तेरध्यापनक्रमे न केवलं ग्रन्थगतपङ्क्ते कण्ठस्थीकरणे तद्बोधे एव बलं देयमपि तु तत्रस्थपङ्क्तिगतानि पारिभाषिकपदानि प्रयुज्य व्यावहारिकवाक्यनिर्माणे विषयविवेचने च छात्रा उत्प्रेरणीयाः ।

## ७. विद्यार्थिमूल्याङ्कनप्रक्रिया

शिक्षणेन सह विषयवस्तूनां मूल्याङ्कनमपि सततं विधेयम् । औपचारिकरूपेण अनौपचारिकरूपेण वा शिक्षणमुपलब्धिमूलकं वस्तुगतञ्च जातं न वेति मापनप्रक्रियाऽपि प्रवर्तनीया । तत्र मौखिकं लिखितं प्रयोगात्मकञ्च विधिमवलम्ब्य प्रकरणगतानां विषयाणां बोधः शिक्षार्थिनां जातो न वेति सततमवधेयम् । मूल्याङ्कनावसरे छात्रैः कीदृशी योग्यता व्युत्पत्तिश्चाधिगता कुत्र च समस्या ? समाधानञ्च कथं विधेयमित्यादिज्ञानार्थञ्च मूल्याङ्कनविधिरवलम्बनीयः ।

प्रारम्भिक-निर्माणात्मक-निदानात्मक-निर्णयात्मकभेदेन मूल्याङ्कनविधेश्चातुर्विध्यं वर्तते । अत्र चतुर्विधोऽपि विधिरवलम्बनीयः । तत्र वार्षिकपाठयोजनानुसारेण मासिकं पाक्षिकं साप्ताहिकं दैनिकञ्च कक्षाकार्यविधिं निर्धार्य मौखिकीं लिखिताञ्च परीक्षां विधाय छात्राणां शैक्षिकी स्थितिः व्युत्पत्तिश्च परीक्षणीया । मूल्याङ्कनावसरे पाठ्यक्रमप्रकरणगतेषु विषयेषु व्याप्तिलक्षणोपस्थापने लक्ष्ये लक्षणसमन्वयप्रदर्शने अव्याप्त्यादिदोषोद्भावने तदपाकरणे लक्षणपरिष्कारे प्रथमलक्षणपरित्यागकारणप्रदर्शने द्वितीयादिलक्षणविचारे, वेदान्तयोगयोश्चारम्भिके विषये च कीदृशी व्युत्पत्तिः छात्रैरधिगतेति पूर्वोक्तविधिना छात्राणां व्युत्पत्तिगतं मापनं विधेयम् ।

मूल्याङ्कनप्रक्रियां विश्वसनीयां विधिसम्मताञ्च सम्पाद्य एकरूपतायामानेतुं स्थानीय-प्रादेशिक-राष्ट्रियस्तरेषु बाह्यसार्वजनिकपरीक्षणविधौ सर्वेषु विषयेषु आन्तरं बाह्यं च मूल्याङ्कनं विधीयते । सार्वजनिकपरीक्षणे प्रतिविषयं प्रतिशतं पञ्चविंशत्याः अङ्कानां कृते आन्तरं परीक्षणं, प्रतिशतं पञ्चसप्तत्याः अङ्कानां कृते बाह्यं परीक्षणञ्च विधीयते ।

आन्तरं मूल्याङ्कनं सम्बद्धविद्यालयस्य सम्बद्धशिक्षकेण विधातव्यम् । शिक्षणप्रक्रियया सहैव विषयवस्तुसम्बद्धं मूल्याङ्कनं नैरन्तर्येण विधेयम् । तत्र शिक्षणोपलब्धिः क्रमशः औपचारिकरूपेण अनौपचारिकरूपेण च परिमापनीया । शिक्षणसहजीकरणस्य क्रमे विद्यार्थिभिरधिगतानां ज्ञानशिल्पप्रयोगोच्चदक्षतासम्बद्धपक्षाणां मूल्याङ्कनञ्च अनिवार्यतया विधेयम् ।

### (क) आन्तरं मूल्याङ्कनम्

शिक्षणसहजीकरणप्रक्रियया कक्षागतशिक्षणेन सहैव छात्राणामान्तरं निर्माणात्मकं वा मूल्याङ्कनमपि कर्तव्यम् । न्यायस्य शिक्षणक्रमे छात्राणां निर्माणात्मकमूल्याङ्कनाय अधोऽङ्किता विधयोऽवलम्बयितुं शक्यन्ते-

- लिखितप्रश्नोत्तरमाध्यमेन
- मौखिकप्रश्नोत्तरमाध्यमेन
- छात्राणां परस्परविचारविमर्शमाध्यमेन

अधोलिखिताधारेणान्तरमूल्याङ्कनं कर्तव्यम् :

| क्र.सं. | क्षेत्रम् | अङ्कभारः |
|---|---|---|
| १. | शिक्षणसहभागिता | ३ |
| २. | कक्षाकार्यं परियोजनाकार्यं वा | ६ |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | १० |
| ४. | त्रैमासिकपरीक्षा | ६ |
| योगः | | २५ |

### (ख) बाह्यमूल्याङ्कनम्

निर्णयात्मके बाह्ये वा मूल्याङ्कने पाठ्यक्रमे निर्धारितोद्देश्यानुरूपं छात्रैः ज्ञानम्, शिल्पमधिगतं नवेति सम्परीक्ष्य तदनुसारेण छात्राणामुत्तीर्णत्वमनुत्तीर्णत्वं वा निर्णीयते । एतादृशं मूल्याङ्कनमावधिकं भवति । शैक्षिकसत्रस्यान्त एतद् मूल्याङ्कनं विधीयते ।

अधोलिखिताधारेण बाह्यमूल्याङ्कनं कर्तव्यम् :

**कक्षा ११**

| क्र.सं | विषयक्षेत्रगतस्वरूपम् | विषयक्षेत्रम् (पठनं लेखनञ्च) | अङ्कभारः |
|---|---|---|---|
| १. | न्याययोगवेदान्तसम्बद्धनिर्दिष्ट-पारिभाषिकपदानाम् | पद-निर्वचनम् | २+१ |

| | | | |
|---|---|---|---|
| | उदाहारणपूर्वकमर्थबोधः | | |
| | न्यायसम्बद्धनिर्दिष्टपारिभाषिकपदप्रयोगेण सह लक्षणपरिष्कारः | पद-निर्वचनम् | ४ |
| २. | विषयवस्तूनामर्थबोधः, सङ्क्षेपेण प्रश्नोत्तरञ्च | प्रमाणम् | २+३ |
| | विषयवस्तूनां सपरिष्कारं विश्लेषणम् | प्रमाणम् | २४ |
| | विषयवस्तूनां निरूपणम्, पूर्वपक्षव्याप्तिगतदोषोद्भावनम्, तदपाकरणञ्च । | प्रमाणम् | १६ |
| ३. | विषयवस्तूनामर्थबोधः, सङ्क्षेपेण प्रश्नोत्तरञ्च | वेदान्तदर्शनम् | १+३ |
| | यथासिद्धान्तं विषयवस्तूनां विवेचनम् | वेदान्तदर्शनम् | ८ |
| ४. | विषयवस्तूनामर्थबोधः, सङ्क्षेपेण प्रश्नोत्तरञ्च<br>यथासिद्धान्तं विषयवस्तूनां विवेचनम् | योगदर्शनम् | १२ |
| योगः | | | ७५ |

**कक्षा १२**

| **क्र.सं** | **विषयक्षेत्रगतस्वरूपम्** | **विषयक्षेत्रम् (पठनं लेखनञ्च)** | **अङ्कभारः** |
|---|---|---|---|
| १. | न्यायसाङ्ख्यसम्बद्धनिर्दिष्ट-पारिभाषिकपदानां सोदाहरणमर्थबोधः | पद-निर्वचनम् | १+२ |
| | न्यायसम्बद्धनिर्दिष्टपारिभाषिक-पदप्रयोगेण सह लक्षणपरिष्कारः | पद-निर्वचनम् | ४ |
| २. | विषयवस्तूनामर्थबोधः, सङ्क्षेपेण प्रश्नोत्तरञ्च | प्रमाणम् | २+२ |
| | विषयवस्तूनां सपरिष्कारं विवेचनम् | प्रमाणम् | २८ |
| | विषयवस्तूनां निरूपणम्, उत्तरपक्षव्याप्तिलक्षणगतदोषोद्भावनम्, तदपाकरणञ्च | प्रमाणम् | १६ |
| ३. | विषयवस्तूनामर्थबोधः, सङ्क्षेपेण प्रश्नोत्तरञ्च | साङ्ख्यदर्शनम् | २+२ |
| | विषयवस्तूनामाधारेण प्रश्नोत्तरम् | साङ्ख्यदर्शनम् | ७ |
| | यथासिद्धान्तं विषयवस्तूनां विवेचनम् | साङ्ख्यदर्शनम् | ८ |
| योगः | | | ७५ |

# संस्कृतसाहित्यम्

**कक्षा** : ११ र १२ **विषय सङ्केत** : [SAS. 517] (**कक्षा** ११), [SAS. 518] (**कक्षा** १२)

**पाठ्यघण्टा** : ५ **वार्षिक कार्यघण्टा** : १६०

## १. परिचयः

संस्कृतकाव्यं गद्यपद्यमयेन संवादसूक्तिसमलङ्कृतेन च कलात्मक-शब्दार्थचमत्कारेण छात्राणां मनसि रामादिवदाचरणीयं न तु रावणादिवदिति कृत्याकृत्य-विवेकमादधाति चेत् काव्यशास्त्रं रसभावध्वनिगुणालङ्कारविवेचनशीलप्रज्ञाधानपुरस्सरं सदसत्काव्यविवेकं शिक्षयति । तेषां विषयाणां सैद्धान्तिकानां व्यावहारिकाणां च पक्षाणां पठनपाठनयोरुद्देश्येन संस्कृतसाहित्यस्य पाठ्यक्रमः विकसितो वर्तते । एतदर्थं २०७६ विक्रमवर्षीयस्य राष्ट्रियपाठ्यक्रमप्रारूपस्य मार्गदर्शनानुसारेण विद्यालयशिक्षाया माध्यमिकरस्तरे (एकादश्यां द्वादश्याञ्च कक्षयोः) लोकोत्तर-सौन्दर्यानन्ददायकाद् नीरक्षीरविवेकाधायकाच्च संस्कृतसाहित्यस्य ज्ञानाद् नेपालिविद्यार्थिभिश्च वञ्चितैर्नैव भाव्यमिति धिया नेपालसर्वकारेण विद्यालयेषु विश्वविद्यालयेषु च संस्कृत-साहित्यशिक्षणस्य व्यवस्था विहिता वर्तते । । एतस्माद् वर्तमानसन्दर्भे संस्कृतमितोद्रपि व्यावहारिकं निर्माय विद्यार्थिनां रुच्यकाङ्क्षे प्रपूर्य शिक्षाया राष्ट्रियोद्देश्यं प्राप्स्यते, एतस्य सान्दर्भिकतां विस्तार्य विधाय उपयुक्तता सुनिश्चिता च विधास्यते इत्यपेक्षितमस्ति । अनेन पाठ्यक्रमेण सम्बद्धविषये उच्चशिक्षाया आधारोद्रपि निर्मात्स्यते इति चापेक्षितं वर्तते ।

सम्यक् काव्यं काव्यशास्त्रञ्च पठितवन्तो माध्यमिकाश्छात्राः शास्त्रिकक्षायां प्रौढपाण्डित्याधायकेषु काव्येषु काव्यशास्त्रेषु च सुखेन प्रवेशं प्राप्नुयुरिति पाठ्यक्रमेणानेन समुद्दिष्टो विषयः । पाठचक्रमेद्रस्मिन् निर्धारितविषयाणामध्ययनेनच्छात्राः पौराणिकैतिहासिककथावस्तुबोधपूर्वकं विषयसौन्दर्यपरिपाकयुतं पद्यकाव्यार्थगौरवम्, राष्ट्रभक्तिभरितां गद्यकाव्यगतार्थदीप्तिम्, त्यागकर्तव्यनिदर्शकं रूपकमाधुर्यञ्च ज्ञात्वा तदनुकूलमाचरितुं, काव्यीयचरितमनुकर्तुं, तदनुरूपं राष्ट्रियगौरवं साधयितुं, व्यवहारानुरूपं काव्यप्रयोजनं व्याख्यातुञ्च प्रभवन्ति । पाठ्यक्रमनिहितानां छन्दोद्रलङ्कारादिकाव्यशास्त्रीयविषयाणामध्ययनेन च विद्यार्थिनः पुना रसभाव-गुणालङ्कारसूक्ति-प्रयोगादिकलात्मकपक्षाणां परिशीलनपुरस्सरं काव्यसमीक्षासु, निर्दुष्टकाव्यरचनायाञ्च प्रवर्तन्ते । आधुनिकशिक्षणपद्धतिमवलम्ब्य निर्मितेद्रस्मिन् पाठ्यक्रमे छात्राणां श्रवण-भाषण-पठन-लेखनशिल्पविकाससहयोगिनः प्रयोगाभ्यासप्रधाना गद्यपद्यरूपकच्छन्दोद्रलङ्काररस-भावादिकाव्यशास्त्र-सम्बद्धा विषयाः पाठ्यविषयत्वेन सन्निविष्टाः सन्ति । एतदर्थमयमैच्छिकसाहित्यविषयकः पाठ्यक्रमो माध्यमिकसाहित्यविषयाध्ययनविधौ 'विद्यार्थिनः श्रवण-भाषण-पठन-लेखनरूपाणां चतुर्णामेव भाषिकशिल्पानां विकासाय सामर्थ्यं लभेयुः' इति लक्ष्यमात्मसात्करोति । विषयशिक्षणमाध्यमेन विद्यार्थिनां भाषिककौशलप्रवर्धनं साहित्यरचना-सामर्थ्योद्भावनञ्च पाठ्यक्रमस्यास्य हृदयस्थानीयमुद्देश्यमस्ति ।

परिचयम्, स्तरगतसक्षमताम्, कक्षागतशिक्षणोपलब्धिम्, विषयवस्तुनः क्षेत्रक्रमौ, शिक्षणसहजीकरणप्रक्रियाम्, विद्यार्थिमूल्याङ्कनञ्च समाविश्य पाठ्यक्रमोद्रसौ विकासं नीतः । एतस्मिन् क्रमे पाठ्यक्रमलेखनस्य विकासस्य च विषयगतौचित्यम्, पाठ्यक्रमे विद्यमाना मुख्यविशेषताः, पाठ्यक्रमस्य स्वरूपञ्च संयोज्य परिचयं, विषयगतरूपेणापेक्षितं ज्ञानम्, शिल्पम्, अभिवृत्तिम्, मूल्यञ्च, कार्यतत्परतां संयोज्य एतस्याः क्रियात्मकस्वरूपे सक्षमताम्, शिक्षणस्य स्तरम्, सक्षमताया विशिष्टीकृतविस्तृतीकरणेन शिक्षणोपलब्धिम्, सक्षमताम्, पूर्वकक्षाभिस्सह लम्बीयसन्तुलनस्याधारे विषयवस्तुनो क्षेत्रक्रमौ च, विषयगतविशिष्टतामौलिकते संयोज्य शिक्षणसहजीकरणस्य विधिम्, प्रक्रियाञ्च, निर्माणात्मकनिर्णयात्मकमूल्याङ्कनयोर्विधिं प्रक्रियाञ्चोल्लिख्य विद्यार्थिमूल्याङ्कनं व्यवस्थितं वर्तते ।

२. **स्तरगतयोग्यता:**

**माध्यमिकस्तरे ११-१२ कक्षयो: संस्कृतसाहित्यविषयमधीत्य विद्यार्थिनो निर्दिष्टविषयेषु क्षमा भविष्यन्ति -**

१. नैकविधकाव्य-काव्यसिद्धान्तानां बोधस्तदभिव्यक्तिश्च

२. विविधकाव्य-काव्यसिद्धान्ताध्ययने प्रवृत्तिः

३. विविधविषयसम्बद्धकाव्यानां पठनाद् बोधाच्च ज्ञानार्जनशक्तिः

४. काव्यशास्त्राध्ययनप्रभावान् नीरक्षीरविवेकपद्धत्या सदसत्काव्यविवेकसामर्थ्यार्जनम्

५. दृष्टान्, श्रुतान् ,पठितान्, अनुभूतांश्च विषयानवलम्ब्य काव्यरूपकादिरचनाभ्यास-

**प्रवृत्तिः**

६. राष्ट्र-समाज-भाषासंस्कृति-प्रकृति-मानवताप्रभृत्यनेकमूल्यवत्सु विषयेषु गद्यपद्य-

**काव्यलेखनसामर्थ्यावाप्तिः**

७. दृष्टानां श्रुतानां पठितानामनुभूतानाञ्च विषयाणां व्याख्यानसारांशप्रकाश-

**नानुशीलनकौशलार्जनम्**

८. पाठगतसन्दर्भप्रसङ्गाकलनानुमानचरित्रपरिवेशानामभिज्ञानं तदभिव्यक्तिश्च

९. निर्धारितातिरिक्तवृत्तानां लक्षणोदाहरणादिज्ञानप्रवृŒया पद्यकाव्यरचनाशक्ते-

**र्विशदीकरणम्**

१०. गद्यबन्धानां प्रकारानुसारिगद्यकाव्यपठनरचनाप्रवृत्तेर्विकासः

११. नाट्यसिद्धान्तोदाहरणज्ञानस्य पृष्ठभूमौ नाटकान्तररचनाभिनयेषु प्रवृत्तिः

१२. काव्यप्रकारोपप्रकारज्ञानस्य पृष्ठभूमौ मुक्तक-स्फुटक-काव्य-खण्डकाव्य-

**महाकाव्यादिरचनायाः संस्काराधानम्**

१३. सामान्यकाव्यरचनाया अपेक्षायां रसभावध्वनिकाव्यानां रचनायाम् आसक्तिः

१४. रचनात्मकसमीक्षात्मकप्रतिभयोर्विकासः

१५. साहित्यिकशब्दभाण्डागारवृद्धिः

३. **कक्षागतशिक्षणोपलब्धिः**

**कक्षा ११**

**माध्यमिकस्तरीयायां ११ कक्षायां संस्कृतसाहित्यविषयमधीत्य छात्रा अधो निर्दिष्टविषयेषु क्षमा भविष्यन्ति -**

**श्रवणभाषणशिल्पम्**

१. छन्दोलक्षणोदाहरणानामादर्शवाचनं श्रुत्वा तदनुरूपं सुसंस्कृतं वाचनम्

२. पद्यकाव्य-काव्यशास्त्रसम्बद्धानां लक्ष्यलक्षणोदाहरणपद्यानामादर्शवाचनं श्रुत्वा तेषां

**शुद्धमुच्चारणम्**

३. श्रुतान् पद्यकाव्य-काव्यशास्त्रसम्बद्धविषयानधिकृत्य सामूहिकं विमर्शनं

**तर्कपूर्णाभिव्यक्तिश्च**

४. काव्येन काव्यशास्त्रेण च सम्बद्धानां श्रुतानां विषयाणां क्रमेण प्रस्तुतिः

५. श्रुतानां विलोकितानाञ्च काव्यानां काव्यशास्त्राणाञ्च साधिकारं मौखिकाभिव्यक्तिः

**पठनशिल्पम्**

१. निर्दिष्टविषयाणां पठनकौशलवर्धकं सस्वरं मौनञ्च पठनम्

२. निर्दिष्टविषयाणां बोधपूर्वकं पठनम्

३. निर्दिष्टविषयाणां सन्देशबोधकारकं पठनम्

४. साहित्यसम्बद्धपारिभाषिकपदानां वाक्येषु प्रयोगसामर्थ्याधायि पठनम्

५. काव्येन काव्यशास्त्रेण च सम्बद्धपद्यानां लय-गतियतिपूर्वकं सस्वरं मौनञ्च पठनम्

६. पाठनिहितानां गद्यपद्यानां काव्यरचनाप्रेरकं पठनम्

७. निर्धारितपाठानां सन्दर्भ-पर्याय-कोश-समासादिव्युत्पŒयाधायकं पठनम्

८. निर्दिष्टपाठानां सरलार्थ-भावार्थ-विस्तृतार्थ-संक्षेपार्थ-बोधसामर्थ्यदायकं पठनम्

९. निर्दिष्टविषयाणां लक्ष्य-लक्षणसमन्वय-प्रश्नोत्तरण-विमर्शनशक्तिप्रदं पठनम्

**लेखनशिल्पम्**

१. छन्दःशास्त्रोद्भव-तत्कर्तृपरिचयोपस्थापनपूर्वकं छन्दसां प्रयोजनप्रतिपादनम्

२. लक्ष्यलक्षणसङ्गतिपूर्वकं छन्दोलक्षणोदाहरणलेखनम्

३. सम्बद्धकाव्यशास्त्रकारपरिचयोपस्थापनपूर्वकं काव्यशास्त्रवैशिष्ट्य-प्रयोजनलेखनम्

४. सोदाहरणं काव्यलक्षण-शब्दशक्तिस्वरूपप्रतिपादनम्

५. सोदाहरणं ध्वनिप्रकारप्रतिपादनपूर्वकं रसप्रकारविवेचनम्

६. सलक्षणोदाहरणं दोषगुणरीतिप्रकारविवेचनात्मकं लेखनम्

७. सलक्षणं सोदाहरणञ्च प्रसिद्धशब्दार्थालङ्काराणां स्वरूपप्रत्यायनात्मकं लेखनम्

८. ससन्दर्भं सप्रसङ्गञ्च निर्धारितमहाकाव्यपद्यानामन्वय-पर्याय-कोश-समासा-द्लङ्कारादिप्रदर्शनपूर्वकं व्याख्यानम्

९. निर्धारितमहाकाव्यगतपद्यानां सरलार्थ-भावार्थ-सूक्त्यर्थलेखनम्

१०. महाकाव्य-तत्कर्तृपरिचयवैशिष्ट्यादिप्रतिपादनपूर्वकं महाकाव्यांशनिहितकथावस्तु-चरित्र-भाषासौन्दर्यादिविषयेषु विशदं लेखनम्

११. अधीतपाठानां संक्षिप्तविस्तृताद्यनेकप्रश्ननिर्माणमुत्तरलेखनञ्च

**कक्षा १२**

**माध्यमिकस्तरीयायां १२ कक्षायां संस्कृतसाहित्यविषयमधीत्य छात्रा अधो निर्दिष्टविषयेषु क्षमा भविष्यन्ति –**

**श्रवणभाषणशिल्पम्**

१. अनेकच्छन्दोबद्धपद्यानामादर्शवाचनं श्रुत्वा तदनुरूपं सुसंस्कृतं वाचनम्

२. गद्य-पद्य-रूपक-काव्यशास्त्रसम्बद्धानां पद्यानामादर्शवाचनं श्रुत्वा तेषां

**शुद्धमुच्चारणम्**

३. श्रुतान् गद्यपद्यरूपकसम्बद्धविषयानधिकृत्य सामूहिकं विमर्शनं तर्कपूर्णाभिव्यक्तिश्च

४. श्रुतानां श्रव्य-दृश्यकाव्यसम्बद्धानां विषयाणां क्रमेण प्रस्तुतिः

५. श्रुतानां विलोकितानाञ्च रूपकाणां विषये साभिनयं मौखिकाभिव्यक्तिः

६. श्रुतस्य गद्यांशस्य भावाशयादिविषये मौखिकाभिव्यक्तिः

८. श्रुतानां पद्यानां मौखिकरूपेणान्वयसरलार्थभावार्थादिप्रकटनम्

९. दृश्यकाव्यसंवादान् श्रुत्वा साभिनयं विचारप्रकटनम्

**पठनशिल्पम्**

१. गण-यति-लय-गतिप्रभृतिच्छन्दोनियमपालनपूर्वकं निर्दिष्टपद्यानां पठननैपुण्याधायकं

**सस्वरं मौनञ्च पठनम्**

२. मुक्तकोत्कलिकाप्रभृतिगद्यबन्धनियमपालनपूर्वकं निर्दिष्टगद्यानां पठनकौशल-प्रवर्धकं सस्वरं मौनञ्च द्रुतपठनम्

३. निर्दिष्टगद्यपद्यानां बोधपूर्वकं पठनम्

४. साभिनयं सनैपुण्यञ्च रूपकसंवादपाठः

५. निर्दिष्टगद्य-पद्य-रूपकगतसन्देशबोधकारकं पठनम्

६. पाठनिहितानां गद्यपद्यानां काव्यरचनाप्रेरकं पठनम्

७. सम्बद्धपाठानां सन्दर्भ-पर्याय-कोश-समासालङ्कारादिव्युत्पŒयाधायकं पठनम्

८. निर्दिष्टपाठानां सरलार्थ-भावार्थ-विस्तृतार्थ-संक्षेपार्थबोधसामर्थ्यदायकं पठनम्

९. निर्दिष्टलक्ष्यपाठानां लक्षणसमन्वयप्रश्नोत्तरणविमर्शनशक्तिप्रदं पठनम्

**लेखनशिल्पम्**

१. सम्बद्धमहाकाव्यकारपरिचयोपस्थापनपूर्वकं तत्काव्यवैशिष्ट्यलेखनम्

२. ससन्दर्भं निर्दिष्टमहाकाव्यीयपद्यानामन्वय-पर्याय-कोश-समासाद्र-लङ्कारादिप्रदर्शनपूर्वकं व्याख्यानम्

३. सम्बद्धमहाकाव्यगतपद्यानां सरलार्थ-भावार्थ-सूक्त्यर्थलेखनम्

४. महाकाव्यांशनिहितकथावस्तु-चरित्र-भाषासौन्दर्यादिविषयेषु विशदं लेखनम्

५. निर्दिष्टगद्यकाव्यस्य लेखकपरिचयोपस्थापनपूर्वकं तत्काव्यवैशिष्ट्यप्रतिपादनम्

६. प्रसङ्गान्वय-कोश-समासाद्रलङ्कारादिप्रदर्शनपुरस्सरं निर्दिष्टगद्यांशव्याख्यानम्

७. गद्यकाव्यांशनिहितकथावस्तु-चरित्र-भाषासौन्दर्यादिविषयेषु विशदं लेखनम्

८. सप्रसङ्गं निर्दिष्टरूपकनिहितपद्यानामन्वय-पर्याय-कोश-समासाद्र-लङ्कारादिप्रदर्शनपूर्वकं व्याख्यानम्

९. सम्बद्धरूपकगतपद्य-गद्यभागानां सरलार्थ-भावार्थ-सूक्त्यर्थलेखनम्

१०. अधीतमहाकाव्य-गद्यकाव्य-रूपकेषु तत्तल्लक्षणपरिशीलनम्

११. सर्वेषामधीतपाठानां संक्षिप्तविस्तृताद्यनेकप्रश्ननिर्माणमुत्तरलेखनञ्च

## ४. विषयक्षेत्रं क्रमश्च

**कक्षा ११**

| क्र.सं | विषयः | प्रकरणम् | पाठ्यांशविवरणम् | बोधः | अभिव्यक्तिः | पाठ्यविषया-नुशीलनम् | पाठ्यघण्टाः |
|---|---|---|---|---|---|---|---|
| १ | छन्दःशास्त्रम् | छन्दः | शशिवदना, विद्युल्लेखा, विद्युन्माला, प्रमाणिका, | लक्षणोदाहरणबोधः । | लक्षणोदाहरणबोधा-भिव्यक्तिः । | समानाक्षरयुतानां वृत्तानां | १२ |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | | इन्द्रवज्रा, उपेन्द्रवज्रा, उपजातिः, शालिनी, रथोद्धता, स्वागता, दोधकम्, इन्दिरा, वंशस्थविलम्, इन्द्रवंशा, भुजङ्गप्रयातम्, तोटकम्, स्रग्विणी, प्रमिताक्षरा, द्रुतविलम्बितम्, प्रहर्षिणी, मत्तमयूरम्, वसन्ततिलकम्, मालिनी, पञ्चचामरम्, शिखरिणी, पृथ्वी, मन्दाक्रान्ता, हरिणी, शार्दूल-विक्रीडितम्, सुवदना, स्रग्धरा, कुसुमस्त-बकदण्डः, हरिणप्लुता, अपरवक्त्रम्, पुष्पिताग्रा, सुन्दरी, वक्त्रम्, पथ्यावक्त्रम्, अनुष्टुभ, पथ्या, गद्यभेदेषु- चूर्णकम्, उत्कलिकाप्रायम्, वृत्तगन्धि । | वार्णिकमात्रिक-वृत्तयोः पार्थक्यबोधः । गद्यबन्धबोधः । गद्यपद्ययोर्लक्ष्य लक्षणसमन्वयबोधः । | वार्णिकमात्रिकवृत्तयोः पार्थक्यविमर्शनम् । गद्यप्रकारलक्षणोदाहरणा-भिव्यक्तिः । | वर्गीकरणम् । अधीतलक्षणानां वृत्तानामुदाहरणा-न्तराणामन्वेषणम् । गद्यबन्धानां मौलिकोदाहरणो-दाहरणलेखनम् । | |
| २ | काव्यशास्त्रम् | काव्य-लक्षणं शब्द-शक्तिश्च | काव्यदीपिकायाः प्रथमशिखा द्वितीयशिखा च | काव्यस्य लक्षणोदाहरणबोधः । शब्दशक्तिपरिचयोदाहरणबोधः । शब्द-शक्ति-भेदावबोधः । | काव्यस्य लक्षणोदाहरणा-भिव्यक्तिः । शब्दशक्तिपरिचायनम् ।शब्दशक्तिभेदा-भिव्यक्तिः । | काव्यलक्षणानु-सारिकाव्योदाहरणा-न्वेषणम् । काव्यलक्षणनिहित-तत्व-निरूपणम् । लक्ष्यपद्येषु शब्द-शक्तिगवेषणम् । लक्ष्यपद्येषु व्यङ्ग्यार्थ-प्रभावान्वेषणम् | १२ |
| ३ | काव्यशास्त्रम् | काव्यभेदः | काव्यदीपिकाया -स्तृतीयशिखा | सोदाहरणं काव्यभेदावबोधः । ध्वनिगुणीभूतव्यङ्ग्य-चित्रकाव्य-भेदावबोधः । सोदाहरणं रसप्रकारावबोधश्च | काव्यभेदविमर्शनम् । चित्रकाव्यध्वनिकाव्ययोः पार्थक्यप्रकाशनम् । उदाहरणान्तरपद्येषु लक्षणसङ्गत्यभिव्यक्तिः | उदाहरणान्तरपद्येषु-ध्वनिचित्रकाव्य-गवेषणम् । उदाहरणान्तरपद्येषु रसप्रकारगवेषणम् । | २२ |
| ४ | काव्यशास्त्रम् | नाटच-तत्वानि | काव्यदीपिकायाः चतुर्थशिखा | नाट्यस्वरूपबोधः । नाट्यतत्वावबोधः । श्रव्यदृश्यकाव्ययोः भेदावबोधः । | नाटकस्य प्रकृत-पक्षाभिव्यक्तिः । नाटकस्याभिनेयत्व-विमर्शः । नाटके प्रेक्षालयस्य महत्वाभिव्यक्तिः । | नाटकेषु नाट्यतत्वानुसन्धानम् । नाटकेषु पञ्चसन्धि-परिशीलनम् । श्रव्यकाव्येषु सन्धिगवेषणम् । | १२ |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ५ | काव्यशास्त्रम् | दोषगुणरीतयः | काव्यदीपिकायाः पञ्चमषष्ठसप्तम-शिखान्तर्गता दोषाः, गुणाः, रीतयश्च | दोषलक्षणोदाहरण-बोधः । गुणस्वरूपोदाहरण-बोधः । रीतिलक्षणोदाहरण-बोधः । | दोषलक्षणाभिव्यक्तिः । सोदाहरणं गुणस्वरूपप्रदर्शनम् । रीतिस्वरूपाभिव्यक्तिः । | दोषपरिहारा-नुशीलनम् । काव्येषु गुणोदाहरणं गवेषणम् । गुणरीत्योः सम्बन्धपरिशीलनम् । | १५ |
| ६ | काव्यशास्त्रम् | अलङ्कारः | काव्यदीपिकाया अष्टमशिखान्तर्गता-अलङ्काराः | शब्दार्थालङ्कारयो-रन्तरबोधः । प्रसिद्धालङ्काराणां तत्वावबोधः । | शब्दार्थालङ्कारयोः पार्थक्याभिव्यक्तिः । प्रसिद्धालङ्काराणां सोदाहरणं तत्वविमर्शनम् । | उदाहरणान्तरेषु शब्दालङ्कारा-नुसन्धान-मुदाहरणान्तरेषु अर्थालङ्कारगवेषणम् । सङ्करसंसृष्ट्य-लङ्कारयोः परिशीलनम् । | २६ |
| ७ | काव्यम् (पद्यम्) | महाकाव्यांशः | पौराणिकस्य साहित्यिकस्य च रघुवंशमहाकाव्य-स्याष्टमसर्गः | महाकाव्यांशबोधः<br>कालिदासपरिचय-विषयकानुच्छेदबोधः रघुवंशमहाकावय-वैशिष्ट्यबोधः । | पद्यभावार्थप्रकाशनम्, सन्दर्भान्वयनिर्देशपूर्वकं पर्यायकोशसमासालङ्कारादियुतं व्याख्यानम् । कालिदासतत्काव्य-वैशिष्ट्य-प्रकाशनम् | छन्दोरसालङ्कारादिकाव्यसौन्दर्यतत्वप्रयोगा-नुशीलनम् | २१ |
| सैद्धान्तिकाभ्यासः | | | | | | | १२० |
| प्रयोगात्मकाभ्यासः | | | | | | | ४० |
| योगः | | | | | | | १६० |

**कक्षा १२**

| क्र.सं | विषयः | प्रकरणम् | पाठ्यांशविवरणम् | बोधः | अभिव्यक्तिः | पाठ्यविषयानुशीलनम् | पाठ्य घण्टाः |
|---|---|---|---|---|---|---|---|
| १ | काव्यम् (पद्यम्) | महाकाव्यांशः | पौराणिकस्य ऐतिहासिकस्य साहित्यिकस्य च किरातार्जुनीय-महाकाव्यस्य तृतीयसर्गः | महाकाव्यांशबोधः । भारविपरिचयकाव्य-विषयकानुच्छेदबोधः । किरातार्जुनीय-महाकाव्यवैशिष्ट्य-बोधः । | पद्यभावार्थप्रकाशनम्, सन्दर्भान्वयनिर्देशपूर्वकं पर्यायकोशसमासयुतं व्याख्यानम् । भारवितत्काव्यवैशिष्ट्य-प्रकाशनम् । | अर्थगाम्भीर्या-नुशीलनम् ।<br>छन्दोरसालङ्कारादिकाव्यसौन्दर्यतत्व-प्रयोगानुशीलनम् । | ३८ |
| २ | काव्यम् (गद्यम्) | गद्यकाव्यांशः | साहित्यिकस्य दशकुमारचरिताभिधेयस्य गद्यकाव्यस्य | गद्यकाव्यांशबोधः । गद्यकाव्यांशवै | गद्यस्य सरलार्थप्रकाशनम् । सन्दर्भपर्यायकोशसमा | गद्यकाव्यांशे गद्यप्रकारलक्षण गवेषणम् । | ३७ |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | | पूर्वपीठिकायाः प्रथमतश्चतुर्थोच्छ्वास पर्यन्तम् (१-४ उच्छ्वासाः) | शष्ट्य-बोधः । दण्डिनो देशकालकृत्यादि परिचयबोधः । | ससमन्विताव्याख्या । गद्यकाव्यांशस्य परिवेशविमर्शनम् । दण्डिपरिचयादिविषय ाद् प्रश्ननिर्माणमुत्तर-लेखनञ्च । | गद्यकाव्यांशस्य व्यावहारिकपद-वाक्यानां गवेषणम् । गद्यकाव्यांशस्य शैलीप्रभावाकल नम् । | |
| ३ | काव्यम् (दृश्यम्) | नाटकम् | स्वप्नवासवदत्तनाटकम् (सम्पूर्णम् ) | नाटकावबोधः । नाटकतत्वबोधः । भासपरिचायका-नुच्छेदबोधः । | नाटकस्य कथावस्तुचरित्र-परिवेशविधाना-भिव्यक्तिः । भासपरिचायकानुच्छे द-मवलम्ब्य प्रश्ननिर्माणं तत्समाधानञ्च । | नाटकस्य दृश्यकाव्यत्व-संसाधनम् । नाटकस्य आदर्शपक्षान्वेषण म् । नाटककारस्य नाट्यवैशिष्ट्यो-न्मीलनम् । | ४५ |
| सैद्धान्तिकाभ्यासः | | | | | | | १२० |
| प्रयोगात्मकाभ्यासः | | | | | | | ४० |
| योगः | | | | | | | १६० |

## ५. प्रयोगात्मककार्यं परियोजनाकार्यञ्च

| क्र.सं. | क्षेत्रम् | परीक्षणीयाः पक्षाः | अङ्कभारः | मूल्याङ्कनाधाराः |
|---|---|---|---|---|
| १. | शिक्षण-सहभागिता | (क) उपस्थितिः<br>(ख) सहभागिता | ३ | • विद्यार्थिनां दैनिकोपस्थितेरभिलेखः<br>• साहित्याभिव्यक्तिकौशलविकासाय वैयक्तिक-युगल-समूहगतादि-कक्षागतशिक्षणसहभागिता |
| २. | कक्षाकार्यं परियोजना-कार्यं वा | कक्षाकार्यं परियोजनाकार्यं वा | ^ | • श्रवण-भाषण-पठन-लेखनशिल्पविकास-सम्बद्धाः मौखिकी च प्रस्तुतिः, प्रश्नोत्तरलेखन-विमर्श-तात्पर्यस्फुटीकरणञ्च<br>• गृहकार्यं कक्षाकार्यं वा<br>• गद्यपद्यात्मककृतीनां देशकालगुणदोष-निरूपणपूर्वकं सामान्यसमीक्षाकार्यम्, कृतिकाराणां देशकालकृत्यात्मकपरिचयप्रदानञ्च<br>• साहित्याभिव्यक्तिकौशलसम्बद्ध-परियोजनाकार्यस्य प्रतिवेदनमन्तर्वार्ता च |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | (क) बोधः | % | • निर्दिष्टपद्ये वृत्तानुशीलनम्<br>• निर्दिष्टपद्यस्यान्वयप्रदर्शनम्<br>• प्रदत्ते पद्ये गुणप्रकारानुसन्धानम्<br>• प्रदत्तलक्षणस्यालङ्कारस्योदाहरणानुशीलनम्<br>• निर्दिष्टे सरसपद्ये रसप्रकारगवेषणम्<br>• दत्तलक्षणस्य दोषस्योदाहरणान्वेषणम्<br>• निर्धारिते गद्ये तत्प्रकारनिरूपणम् |

| | | | | |
|---|---|---|---|---|
| | | (ख) अभिव्यक्तिः | % | ● निर्दिष्टवृत्तस्य छन्दोलक्षणपालनपूर्वकं वाचनम्<br>● रूपकगतगद्यपद्ययोः साभिनयं वाचनम्<br>● महाकाव्यगतनिर्धारितपद्यस्य भावार्थप्रकाशनम्<br>● निर्धारितगद्यपद्यरूपककाराणां परिचयप्रदानपूर्वकं तेषां काव्यवैशिष्ट्याभिव्यञ्जनम्<br>● निर्धारितगद्यपद्यरूपकाणां चरित्रचित्रणम्<br>● गद्यपद्यरूपकाणां भाषाशैलीगतपार्थक्यविवेचनम्<br>● शब्दशक्तिषु अन्यतमायाः प्रयोगेण निर्दिष्टविषयस्य वर्णनम्<br>● गद्यपद्यनिहितयोर्दोषगुणयोः पर्यालोचनपुरस्सरं पार्थक्यप्रकाशनम् । |
| ४. | त्रैमासिक-परीक्षा | मौखिकं लिखितं वा | ६ | त्रैमासिकपरीक्षायाः प्राप्ताङ्कस्यानुपातिकप्रतिशताधारेणाङ्कनिर्धारणं कर्तव्यम् |
| योगः | | | २५ | |

## ६. शिक्षणसहजीकरणप्रक्रिया

संस्कृतसाहित्यशिक्षणोपक्रमे शिक्षकैर्वार्षिकीं दैनिकीं वा पाठयोजनां निर्माय शिक्षणसहजीकरणं कर्तव्यम् । सोद्देश्यं छात्राणां पाठश्रवणस्य पाठमननस्य पाठ्यविषयान्तर्गतानां विविधपक्षाणां नैसर्गिकप्रतिभया चिन्तनपूर्वकं प्रश्नोत्तरलेखनस्य शिल्पविकासाय शिक्षकैर्दत्तचित्तैः प्रेरणाप्रदैश्च भवितव्यम् । कक्षायां विषयानुसारेण प्रश्नोत्तर-लेखन-विमर्श-तात्पर्यस्फुटीकरणादिकार्येषु शिक्षकैरेवच्छात्राः प्रेरयितव्याः । पाठ्यविषयाणां पाठ्यवस्तूनां वा प्रकृत्यनुसारेण चिन्तन-मनन-प्रश्नोत्तरलेखनादिकार्येषु शिक्षकैरेवच्छात्राः प्रेरणीयाः । गद्यपद्यात्मककृतीनां देशकालगुणदोष-निरूपणपूर्वकं सामान्यसमीक्षाकार्ये, कृतिकाराणां देशकालकृत्यात्मकपरिचयप्रदानकार्ये च सरलसंस्कृतभाषामाध्यमेन शिक्षकैरेवच्छात्राणां सामर्थ्यमुत्पादनीयम् । रूपकाणां लक्षणग्रन्थानाञ्च पारिभाषिकशब्दप्रयोगं विधाय तेषां लाक्षणिकविषयवस्तुबोधे समन्वये च सोदाहरणं छात्राः प्रशिक्षणीयाः । शिक्षकैः शिक्षणकार्ये यथाविषयं यथावसरञ्च गद्यपद्यात्मककाव्येषु दण्डान्वय-खण्डान्वय-व्युत्पत्तिप्रयोगाऽऽगमन-निगमन-तुलनोदाहरण-कोशाऽनुवादप्रभृतयो विविधाः शिक्षण-विधयोऽवलम्बनीयाः । गद्यकाव्य-पद्यकाव्य-रूपक-लक्षणशास्त्राणां शिक्षणे शिक्षकैः प्रस्तावनारूपेण विषयवस्तूनां सामान्यपरिचयमुद्देश्यकथनं प्रस्तुतिविधिञ्च बोधयित्वाच्छात्रच्छात्राभ्यस्तत्सम्बद्धं कक्षाकार्यं गृहकार्यञ्च प्रदेयम् । अधोलिखितानाम् अभ्यासप्रधानानां सर्जनात्मकानाञ्च क्रियाकलापानां सम्पादनमावश्यकं भवति -

(क) प्रस्तुतीकरणम् (ख) अभ्यासः (ग) उत्पादनम् (घ) पठनबोधः

(ङ) प्रयोगात्मककार्यम् (च) पृष्ठपोषणम् (छ) आत्ममूल्याङ्कनम्

**शिक्षणप्रक्रियायाः सम्भाव्याः शिल्पगताः संयुक्तक्रियाकलापाः**

**(क) श्रवणशिक्षणस्य सम्भाव्याः शिल्पगताः संयुक्तक्रियाकलापाः**

- शुद्धाशुद्धगद्यपद्ययोर्वाचनं संश्राव्य शुद्धोच्चारणं निश्चेतुं विद्यार्थिभ्यो निर्देशनम्
- पद्यमुच्चार्य तस्य गण-लय-गति-यतिविषये प्रतिक्रियाप्रकटनाय विद्यार्थिभ्यः प्रेरणाप्रदानम्
- काव्यकाव्यशास्त्रसम्बद्धानां पद्यानामादर्शवाचनं संश्राव्य तदनुरूपं तेषां कण्ठस्थीकरणाय उत्साहप्रदानम्
- रूपक-संवाद-गद्य-पद्यविश्लेषणादिविषयान् श्रावयित्वा प्रतिक्रियाभिव्यक्तये प्रेरणम्
- गद्यपद्ययोः प्रेरकमंशं संश्राव्य तस्य पुनरावृत्तये उत्प्रेरणम्
- गद्यपद्यरूपकाणां विस्तृतघटनां निरूप्य तेषां मुख्यमुख्यघटनानामभिव्यक्त्यै प्रेरणम्
- कक्षायां काव्यगोष्ठीं सञ्चाल्य तस्य विवरणकथनाय प्रेरणम्

- पद्यं संश्राव्य तत्र सम्भाव्यगुण-दोषालङ्कार-रस-भावादिकाव्यतत्वकथनाय समुत्प्रेरणम्
- लक्षणपद्यं संश्राव्य तस्य लक्ष्यपद्यकथनाय निर्देशनम्
- गद्यांशं संश्राव्य तस्य मुक्तकादिगद्यप्रकारकथनायोत्प्रेरणम्

(ख) **सम्भाषणशिक्षणस्य सम्भाव्याः शिल्पगताः संयुक्तक्रियाकलापाः**

- सामूहिकरूपेण गद्यपद्यानामुच्चारणाय निर्देशनम्
- शिक्षकमनुसृत्य गणयतिगतिलयानुरूपं रूपकमहाकाव्यगतपद्यानां वाचनं कर्तुं विद्यार्थिनां प्रेरणम्
- पाठितानां गद्यपद्यरूपकगतघटनानां वर्णनाय निर्देशनम्
- काव्यकाव्यशास्त्रकारपरिचयप्रकटनाय समुत्प्रेरणम्
- साभिनयं रूपकसंवादं प्रस्तोतुं प्रेरणम्
- सूक्त्यर्थवर्णनायोत्प्रेरणम्
- श्लोकस्यान्वय-पर्याय-समासालङ्कारच्छन्दोनामकथनाय निर्देशनम्
- निर्दिष्टमहाकाव्य-गद्यकाव्यवैशिष्ट्यवर्णनायादेशप्रदानम्
- काव्यपरिभाषा-काव्यभेद-ध्वनिभेद-रसप्रकार-दोषरीतिगुणालङ्कारप्रकारकथनाय आज्ञापनम्
- काव्यशास्त्रीयोदाहरणपद्यानि संश्राव्य तेषां लक्षणकथनाय समुत्प्रेरणम्
- काव्यलक्षणानि निरूप्य तेषामुदाहरणनिर्णयार्थं निर्देशनम्

(ग) **पठनशिक्षणस्य सम्भाव्याः शिल्पगताः संयुक्तक्रियाकलापाः**

- छन्दोलक्षणोदाहरणानां सस्वरपठनाय निर्देशनम्
- गण-लय-यति-गतिनियमपालनपूर्वकं रूपक-महाकाव्यगतपद्यानां पठनाय प्रेरणम्
- गद्यवाक्यानि पठित्वा तदनुपठितुमादेशप्रदानम्
- तारमधुरस्वरेण गद्यपद्यानां पठनायादेशनम्
- मन्दगत्या द्रुतगत्या च गद्यांशानां वाचनायोत्प्रेरणम्
- काव्यशास्त्रीयकारिकोदाहरणपद्यानां पठनाय प्रेरणम्
- निर्दिष्टपाठानामादर्शवाचनायाभिप्रेरणम्
- निर्दिष्टपाठातिरिक्तोपलब्धगद्यपद्यानां पठनायाभिप्रेरणम्

(घ) **लेखनशिक्षणस्य सम्भाव्याः शिल्पगताः संयुक्तक्रियाकलापाः**

- छन्दोलक्षणोदाहरणानां शुद्धलेखनायोत्प्रेरणम्
- छन्दोलक्षणमुक्त्वा तस्योदाहरणलेखनाय निर्देशनम्
- पद्यमुक्त्वा तस्य छन्दोनामोल्लेखनपुरस्सरं गणयतिव्यवस्थालेखनाय समुत्प्रेरणम्
- रूपक-महाकाव्यगतपद्यानां शुद्धलेखनायादेशप्रदानम्
- निर्दिष्टरूपक-महाकाव्यगतपद्यानामन्वयलेखनायाभिप्रेरणम्
- निर्दिष्टपद्यानां पृथक् पृथक् प्रसङ्गान्वय-पर्याय-कोश-समासाद्रलङ्कारादिलेखनाय तेषां व्याख्यानाय चोत्प्रेरणम्
- निर्दिष्टगद्यांशस्य पृथक् पृथक् प्रसङ्ग-पर्याय-कोश-समासाद्रलङ्कारादिलेखनाय व्याख्यानाय चोत्प्रेरणम्
- गद्य-पद्य-रूपककारपरिचयतत्काव्यवैशिष्ट्यानि लेखितुमादेशनम्

- गद्य-पद्य-रूपकनिहितकथावस्तु-चरित्र-भाषासौन्दर्यादिविषयाणामन्यतमस्य लेखनायाभिप्रेरणम्
- काव्यपरिभाषा-शब्दशक्ति-ध्वनिभेद-रसप्रकाराणां लक्षणोदाहरणलेखनाय समुत्प्रेरणम्
- दोष-रीति-गुणालङ्कारभेदानां लक्षणोदाहरणलेखनाय तेषां लक्ष्य-लक्षणसङ्गमनाय चोत्प्रेरणम् ।

## ७. विद्यार्थिमूल्याङ्कनप्रक्रिया

विद्यार्थिनां शिक्षणोपलब्धिं सुनिश्चेतुं निर्माणात्मकं निर्णयात्मकञ्चोभ्यप्रकारकमेव मूल्याङ्कनं विधातव्यं भवति । विद्यार्थिनां शिक्षणोपलब्धे, सुधाराय कक्षाशिक्षणस्यैव क्रमे कक्षाकार्य-परियोजनाकार्य-प्रस्तुतीकरणोपलब्धिपरीक्षासदृशान् क्रियाकलापान् कारयित्वा सैद्धान्तिकज्ञानशिल्पयो-रवाप्तिरावश्यकी । एतत्कार्यस्य प्रभावकारिरूपेण क्रियान्वयनाय, विद्यार्थिनां शिक्षणस्तरस्य सुधाराय च सहजीकरणक्रियाकलापस्य अभिन्नाङ्गस्य रूपेण निर्माणात्मकमूल्याङ्कनमुपयोक्तव्यम् । निर्माणात्मकमूल्याङ्कनस्य शिक्षणोपलब्धेर्निश्चितभारो निर्णयात्मकमूल्याङ्कनेऽपि संयोज्यते ।

पाठ्यक्रमेण निर्धारितस्योद्देश्यस्यानुरूपं विद्यार्थिनो ज्ञान-शिल्पाभिवृत्तीः प्राप्नुवन्नवेति विषयस्यान्वेषकं महत्वपूर्णं संयन्त्रं मूल्याङ्कनं भवति । विद्यार्थिनां मूल्याङ्कनं शिक्षणोपलब्धीर्ध्यात्वा सक्षमतां शिक्षणोपलब्धीनाञ्चानुरूपं शिक्षणस्य सर्वान् स्तरान् समाविश्य विधातव्यम् । आन्तरिकबाह्यमूल्याङ्कनयोर्माध्यमेन एतस्य विषयस्य मूल्याङ्कनं विधीयते । मूल्याङ्कनस्य समग्रभारतः पञ्चविंशतिप्रतिशतमान्तरिकं पञ्चसप्ततिप्रतिशतं बाह्यञ्च मूल्याङ्कनं विधीयेते । एवमेव बाह्यमूल्याङ्कनस्यान्तर्गतं लिखितपरीक्षा सञ्चाल्यते । विद्यार्थीमूल्याङ्कनस्यान्तर्गतं निर्माणात्मकं निर्णयात्मकञ्च मूल्याङ्कनं पद्धतिद्वयेनैव क्रियते । अस्य विषयस्य पाठ्यक्रमे समाविष्टानां स्तरगतसक्षमतानाम्, कक्षागतशिक्षणेपलब्धीनाम्, तासां विषयवस्तूनाम्, तैस्सह सम्बद्धस्य शिल्पस्य, शिक्षण सहभागितायाः शिक्षणसक्रियतायाश्चाधारेषु विद्यार्थिनां शिक्षणस्य मूल्याङ्कनं विधातव्यम् ।

अस्य स्तरस्य विद्यार्थिनां मूल्याङ्कनमक्षराङ्कनपद्धत्या विधीयते । मूल्याङ्कने निर्माणात्मकी निर्णयात्मिकी च प्रक्रिया अवलम्ब्यते । छात्राणां स्तरगतसामर्थ्योपलब्धये विधातव्यैरध्ययनभ्रमण-घटनावलोकन-सर्जनकार्य-वैयक्तिकसामूहिकविमर्शन-लिखितपरीक्षा-प्रत्युत्पन्नमतिप्रदर्शन-प्रश्नोत्तरण-कक्षाकार्यपरीक्षण-भाषिकव्यवहारप्रभृति-कार्यै-निर्माणात्मकं मूल्याङ्कनं विधीयते येन अविच्छिन्नं मूल्याङ्गनं सम्पद्यते । स्तरगतसामर्थ्योपलब्धये कक्षागतसामर्थ्योपलब्धये च शैक्षिकसत्रस्यान्तेऽन्तिमपरीक्षाया माध्यमेन निर्णयात्मकमूल्याङ्कनं सम्पाद्यते । विद्यार्थिषु पाठ्यवस्तुबोधादर्शचरित्रनिर्माण-मानवीयमूल्यमान्यतावलम्बन-वाङ्मयसंरक्षण-वाङ्मयस्योपयोग-प्रभृतिविषयाणां विकासो मूल्याङ्कनस्य मूलाधारो मन्यते ।

मूल्याङ्कनप्रक्रियां विश्वसनीयां विधिसम्मताञ्च सम्पाद्य एकरूपतायामानेतुं स्थानीय-प्रादेशिक-राष्ट्रियस्तरेषु बाèसार्वजनिकपरीक्षणविधौ सर्वेषु विषयेषु आन्तरं बाè च मूल्याङ्कनं विधीयते । सार्वजनिकपरीक्षणे प्रतिविषयं प्रतिशतं पञ्चविंशत्या अङ्गानां कृते आन्तरं परीक्षणं, प्रतिशतं पञ्चसप्तत्या अङ्गानां कृते बाè परीक्षणञ्च विधीयते । आन्तरं मूल्याङ्कनं सम्बद्धविद्यालयस्य शिक्षकेण विधातव्यम् । शिक्षणप्रक्रियया सहैव विषयवस्तुसम्बद्धं मूल्याङ्कनं नैरन्तर्येण विधेयम् । तत्र शिक्षणोपलब्धिः क्रमशः औपचारिकरूपेण अनौपचारिकरूपेण च परिमापनीया । शिक्षणसहजीकरणस्य क्रमे विद्यार्थिभिरधिगतानां ज्ञानशिल्पप्रयोगोच्चदक्षतासम्बद्धपक्षाणां मूल्याङ्गनञ्च अनिवार्यतया विधेयम् ।

### (क) आन्तरं मूल्याङ्कनम्

शिक्षणसहजीकरणप्रक्रियया कक्षागतशिक्षणेन सहैव छात्राणामान्तरं निर्माणात्मकं वा मूल्याङ्कनमपि कर्तव्यम् । व्याकरणस्य शिक्षणक्रमे छात्राणां निर्माणात्मकमूल्याङ्कनाय अधोऽङ्किता विधयोऽवलम्बयितुं शक्यन्ते-

- लिखितप्रश्नोत्तरमाध्यमेन
- मौखिकप्रश्नोत्तरमाध्यमेन
- छात्राणां परस्परविचारविमर्शमाध्यमेन

अधोलिखिताधारेणान्तरमूल्याङ्कनं कर्तव्यम् :

| क्र.सं. | क्षेत्रम् | अङ्कभारः |
|---|---|---|
| १. | शिक्षणसहभागिता | ३ |
| २. | कक्षाकार्यं परियोजनाकार्यं वा | ६ |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | १० |
| ४. | त्रैमासिकपरीक्षा | ६ |
| योगः | | २५ |

(ख) **बाह्यमूल्याङ्कनम्**

निर्णयात्मके बाह्ये वा मूल्याङ्कने पाठ्यक्रमे निर्धारितोद्देश्यानुरूपं छात्रैः ज्ञानम्, शिल्पमधिगतं नवेति सम्परीक्ष्य तदनुसारेण छात्राणामुत्तीर्णत्वमनुत्तीर्णत्वं वा निर्णीयते । एतादृशं मूल्याङ्कनमावधिकं भवति । शैक्षिकसत्रस्यान्त एतद् मूल्याङ्कनं विधीयते ।

**अधोलिखिताधारेण बाह्यमूल्याङ्कनं कर्तव्यम् :**

**कक्षा ११**

| **क्र.सं** | **विषयक्षेत्रगतस्वरूपम्** | **विषयक्षेत्रम् (पठनं लेखनञ्च)** | **अङ्कभारः** |
|---|---|---|---|
| १. | प्रदत्तानां छन्दसां लक्षणोदाहरणबोधः । वार्णिकमात्रिक-वृत्तयोः पार्थक्यबोधः । गद्यबन्धबोधः । | छन्दःशास्त्रम् (छन्दः) | १+ २ |
| | प्रदत्तानां छन्दसां लक्षणोदाहरण-बोधाभिव्यक्तिः । वार्णिकमात्रिक-वृत्तयोः पार्थक्यविमर्शनम् । गद्य-प्रकार-लक्षणोदाहरणाभिव्यक्तिः । | छन्दःशास्त्रम् (छन्दः) | ४ |
| | प्रदत्तानां छन्दसां समानाक्षरयुतानां वृत्तानां वर्गीकरणम् । अधीतलक्षणानां वृत्तानाम् उदाहरणान्तराणामन्वेषणम् । गद्यबन्धानां मौलिकोदाहरणलेखनम् । | छन्दःशास्त्रम् (छन्दः) | ८ |
| २. | काव्यलक्षणानुसारिकाव्योदाहरणान्वेषणम् । काव्यलक्षणनिहिततत्वनिरूपणम् । लक्ष्यपद्येषु शब्दशक्तिगवेषणम् । लक्ष्यपद्येषु व्यङ्ग्यार्थ-प्रभावान्वेषणम् | काव्यशास्त्रम् (काव्यलक्षणं शब्दशक्तिश्च) | ८ |
| ३. | काव्यभेदविमर्शनम् । चित्रकाव्यध्वनिकाव्ययोः पार्थक्यप्रकाशनम् । उदाहरणान्तरपद्येषु लक्षणस•त्यभिव्यक्तिः<br>उदाहरणान्तरपद्येषु-ध्वनिचित्रकाव्य-गवेषणम् । उदाहरणान्तरपद्येषु रसप्रकार-गवेषणम् । | काव्यशास्त्रम् (काव्यभेदः) | १२ |
| ४. | नाट्यस्वरूपबोधः ।<br>नाट्यतत्वावबोधः ।<br>श्रव्यदृश्यकाव्ययोः भेदावबोधः । | काव्यशास्त्रम् (नाट्यतत्वानि) | १ |

| | | | |
|---|---|---|---|
| | नाटकस्य प्रकृतपक्षाभिव्यक्तिः । नाटकस्याभिनेयत्वविमर्शः । नाटके प्रेक्षालयस्य महत्वाभिव्यक्तिः । | काव्यशास्त्रम् (नाट्यतत्वानि) | २ |
| | नाटकेषु नाट्यतत्वानुसन्धानम् । नाटकेषु पञ्चसन्धि-परिशीलनम् । श्रव्यकाव्येषु सन्धिगवेषणम् । | काव्यशास्त्रम् (नाट्यतत्वानि) | ४ |
| ५. | दोषलक्षणोदाहरणबोधः । गुणस्वरूपोदाहरणबोधः । रीतिलक्षणोदाहरणबोधः । | काव्यशास्त्रम् (दोषगुणरीतयः) | २ |
| | दोषलक्षणाभिव्यक्तिः । सोदाहरणं गुणस्वरूपप्रदर्शनम् । रीतिस्वरूपाभिव्यक्तिः । | काव्यशास्त्रम् (दोषगुणरीतयः) | १ |
| | दोषपरिहारानुशीलनम् । काव्येषु गुणोदाहरणं गवेषणम् । गुणरीत्योः सम्बन्धपरिशीलनम् । | काव्यशास्त्रम् (दोषगुणरीतयः) | ४ |
| ६. | शब्दार्थालङ्कारयोरन्तरबोधः । प्रसिद्धालङ्काराणां तत्वावबोधः । | काव्यशास्त्रम् (अलङ्कारः) | १ |
| | शब्दार्थालङ्कारयोः पार्थक्याभिव्यक्तिः । प्रसिद्धालङ्काराणां सोदाहरणं तत्वविमर्शनम् । | काव्यशास्त्रम् (अलङ्कारः) | ४ |
| | उदाहरणान्तरेषु शब्दालङ्कारानुसन्धानम् उदाहरणान्तरेषु अर्थालङ्कारगवेषणम् । सङ्करसंसृष्ट्यलङ्कारयोः परिशीलनम् । | काव्यशास्त्रम् (अलङ्कारः) | ८ |
| ७. | महाकाव्यांशबोधः कालिदासपरिचयविषयकानुच्छेदबोधः रघुवंशमहाकाव्यवैशिष्ट्यबोधः । | काव्यम् (महाकाव्यांशः) | १ |
| | पद्यभावार्थप्रकाशनम्, सन्दर्भान्वयनिर्देशपूर्वकं पर्यायकोशसमासालङ्कारादियुतं व्याख्यानम् । कालिदासतत्काव्य-वैशिष्ट्य-प्रकाशनम् | काव्यम् (महाकाव्यांशः) | ४ |
| | छन्दोरसालङ्कारादिकाव्यसौन्दर्यतत्वप्रयोगानुशीलनम् | काव्यम् (महाकाव्यांशः) | ८ |
| योगः | | | ७५ |

**कक्षा १२**

| क्र.सं | विषयक्षेत्रगतस्वरूपम् | विषयक्षेत्रम् (पठनं लेखनञ्च) | अङ्कभारः |
|---|---|---|---|
| १. | महाकाव्यांशबोधः । देशकालकृत्यादियुतो भारवि-परिचय-विषयकानुच्छेदबोधः । किरातार्जुनीय-महाकाव्यवैशिष्ट्यबोधः । | काव्यम् (पद्यम्) | १+२ |
| | पद्यभावार्थप्रकाशनम्, सन्दर्भान्वयनिर्देशपूर्वकं पर्यायकोशसमासयुतं व्याख्यानम् । भारवितत्काव्यवैशिष्ट्य-प्रकाशनम् | काव्यम् (पद्यम्) | १२ |

| | | | |
|---|---|---|---|
| | अर्थगाम्भीर्यानुशीलनम् । छन्दोद्रलङ्कार-प्रयोगानुशीलनम् | काव्यम् (पद्यम्) | ८ |
| २. | गद्यकाव्यांशबोधः । गद्यकाव्यांशवैशिष्ट्य-बोधः । देशकालकृत्यादिसम्बलितो दण्डिपरिचयविषयकानुच्छेदबोधः । | काव्यम् (गद्यम्) | १ |
| | गद्यस्य सरलार्थप्रकाशनम् । सन्दर्भपर्यायकोशसमाससमन्विता व्याख्या । गद्यकाव्यांशस्य परिवेशविमर्शनम् । दण्डिनः परिचयानुच्छेदात् प्रश्ननिर्माणमुत्तरलेखनञ्च । | काव्यम् (गद्यम्) | १६ |
| | गद्यकाव्यांशे लक्षणगवेषणम् । गद्यकाव्यांशस्य व्यावहारिकपदवाक्यानां गवेषणम् । गद्यकाव्यांशस्य शैलीप्रभावाकलनम् । | काव्यम् (गद्यम्) | ८ |
| ३. | नाटकावबोधः । नाटकतत्वबोधः । भासपरिचायकानुच्छेदबोधः । | काव्यम् (नाटकम्) | ४+३ |
| | नाटकस्य कथावस्तुचरित्रपरिवेशविधाना-भिव्यक्तिः । भासपरिचायकानुच्छेद-मवलम्ब्य प्रश्ननिर्माणं तत्समाधानञ्च । | काव्यम् (नाटकम्) | १२ |
| | नाटकस्य दृश्यकाव्यत्व-संसाधनम् । नाटकस्य आदर्शपक्षान्वेषणम् । नाटककारस्य नाट्यवैशिष्ट्योन्मीलनम् । | काव्यम् (नाटकम्) | ८ |
| योगः | | | ७५ |

# माध्यमिकशिक्षापाठ्यक्रमः
## २०७६
## इतिहासपुराणम्

**कक्षा : ११ र १२** **विषयसङ्केतः** (कक्षा ११ Itp ५१९ कक्षा १२ Itp ५२०)

**पाठ्यघण्टा : ५** **वार्षिककार्यघण्टा : १६०**

## १. परिचयः

इतिहासपुराणविषयस्य पाठ्यक्रमः सनातनधर्मसंस्कृतिसम्बद्धानां सांस्कृतिक-सामाजिक-राजनीतिकविषयक्षेत्राणां सैद्धान्तिकानां व्यावहारिकाणां च पक्षाणां पठनपाठनयोरुद्देश्येन विकसितो वर्तते । एतदर्थं २०७६ विक्रमवार्षिकस्य राष्ट्रियपाठ्यक्रमप्रारूपस्य मार्गदर्शनानुसारेण विद्यालयशिक्षाया माध्यमिकस्तरे (एकादश्यां द्वादश्याञ्च कक्षयोः) इतिहासपुराणविषयके पाठ्यक्रमे कर्तव्याकर्तव्यज्ञानसम्बद्धमधीतविषयाणां बोधो ज्ञातविषयाणामभिव्यक्तिसामर्थ्यञ्च छात्रेषु स्यादिति हेतोर्बोधाभिव्यक्त्योरुल्लेखोऽपि विहितो विद्यते । एतस्माद् वर्तमानसन्दर्भे विद्यार्थिनां रुच्यकाङ्क्षे प्रपूर्य शिक्षाया राष्ट्रियोद्देश्यं प्राप्स्यते, एतस्य सान्दर्भिकतां सन्दर्श्य उपयुक्तता सुनिश्चिता च विधास्यत इत्यपेक्षितमस्ति । अनेन पाठ्यक्रमेण सम्बद्धविषये उच्चशिक्षाया आधारोऽपि निर्मात्स्यत इति चापेक्षितं वर्तते ।

पुराणानि समस्तानां विद्यानामक्षय्याः कोषाः सन्ति । सृष्टेः, प्रलयस्य, वंशस्य, मन्वन्तरस्य, वंशानुचरितस्य च आख्यानैः, उपाख्यानैः, गाथाभिः, कल्पशुद्धिभिः, बहुविधमाध्यमेन वेदप्रतिपादितविषयाणां वैशद्येन व्याख्यानं पुराणेषु प्राप्यते । पञ्चलक्षणमादाय मानवजीवनस्य चरमलक्ष्यभूतान् परमपुरुषार्थान् धर्मार्थकाममोक्षान् प्राप्तुमैतिहासिककथानामाधारेण प्रभावपूर्णपद्धतौ ज्ञानविज्ञानयोः विस्तारः पुराणेषु प्रदर्शितः । मानवजन्मनः प्रधानं लक्ष्यं भगवत्प्राप्तिः, तत्साधनानि च पुराणानि सन्ति । पुराणेषु ज्ञान-कर्म-वैराग्य-भक्ति-विश्वास-यज्ञ-दान-स्त्रीधर्म-राजधर्म-चतुर्वर्णानां धर्म-सदाचारावतारादीनां कल्याणकारिणः सदुपदेशाः प्राप्यन्ते । वेदाध्ययनरहितानामपि जनानां कृते आत्मचिन्तनोपदेशः पुराणेषु कृतो दृश्यते । पुराणानि सदाचारान् शिष्टाचारान् भक्तिमार्गाञ्च प्रदर्श्य मानवान् परोपकाराय प्रेरयन्ति । तथैव येन शास्त्रेण पूर्वकाले जातानां तथ्यपरकाणां घटनानां सम्यक् वर्णनं विधाय समाजोपकाराय प्रस्तूयते तच्छास्त्रमितिहास इति निगद्यते । महर्षिणा वेदव्यासेन तत्र मानवजीवनस्य समस्तानां व्यवहाराणामादर्शमयं चित्रमुपस्थापितमस्ति । इतिहासस्य प्रमुखे द्वे लक्ष्ये -एकं महापुरुषाणां पूर्णपरिचयम्, द्वितीयञ्च भूगोलस्य च वास्तविकं ज्ञानम् । अस्माकं सर्वेषां जनानां लक्ष्यं ज्ञानलाभम् । यतो हि ज्ञानेन विना जना न किमपि कर्तुं प्रभवन्ति । वेदार्थं ज्ञातुं इतिहास-पुराणविषयस्य आवश्यकत्वमनुभूय एष विषयः पाठ्यक्रमे समावेशितः ।

एतस्मिन् क्रमे पाठ्यक्रमलेखनस्य विकासस्य च विषयगतौचित्यम्, पाठ्यक्रमे विद्यमाना मुख्यविशेषताः, पाठ्यक्रमस्य स्वरूपञ्च संयोज्य परिचयं, विषयगतरूपेणापेक्षितं ज्ञानम्, शिल्पम्, अभिवृत्तिम्, मूल्यं, कार्यतत्परताञ्च संयोज्य एतस्याः क्रियात्मकस्वरूपे स्तरगतयोग्यता, शिक्षणस्य स्तरम्, स्तरगतयोग्यताया विशिष्टीकृतविस्तृतीकरणेन शिक्षणोपलब्धिम्, पूर्वकक्षाभिस्सह लम्बीयसन्तोलनस्याधारेण विषयवस्तुनः क्षेत्रक्रमौ, विषयगतविशिष्टतामौलिकते शिक्षणसहजीकरणस्य विधिम्, प्रक्रियाञ्च, निर्माणात्मकनिर्णयात्मकमूल्याङ्कनयोर्विधिं प्रक्रियाञ्चोल्लिख्य विद्यार्थिमूल्याङ्कनं व्यवस्थितं वर्तते ।

## २. स्तरगतयोग्यताः

**माध्यमिकस्तरे ११-१२ कक्षयोः संस्कृतव्याकरणविषयमधीत्य विद्यार्थिनो निर्दिष्टविषयेषु क्षमा भविष्यन्ति -**

१. शास्त्रीयमान्यातधारेण सद्व्यवहारकौशलप्रदर्शने

२. भक्तिमार्गमाध्यमेन सत्पात्रत्वप्रदर्शने

३. गुरोः गरिमां ज्ञात्वा मान्यजनानामादरभावप्रकटने

४. कथामाध्यमेन ज्ञानार्जनं कृत्वा समाजे ज्ञानप्रचारे

५. सदाचारादिनियमान् स्वयमनुष्ठीय अन्यानपि सदाचारयुक्तव्यवहारप्रदर्शने

६. निर्दिष्टकथामाध्यमेन पुरातनमितिहासं ज्ञात्वा सन्देशप्रसारणे

७. ईश्वरस्य महत्त्वबोधपूर्वकं तद् विषये व्याख्याने

## ३. कक्षागतशिक्षणोपलब्धिः

### कक्षा ११

**माध्यमिकस्तरीयायां ११ कक्षायामितिहासपुराणविषयमधीत्य छात्रा अधो निर्दिष्टविषयेषु क्षमा भविष्यन्ति -**

| क्र.स. | विषयः | शिक्षणोपलब्धिः |
|---|---|---|
| १. | नेपालमाहात्म्यम् | १.१. सेवा-दान-परोपकारकार्येषु संयोजने<br>१.२. स्वधर्मसंस्कृतिनिष्ठासु दृढताप्रकटने<br>१.३. नेपालस्थमठमन्दिराणां विवरणप्रकटने<br>१.४. मठमन्दिराणां वैशिष्ट्याभिबोधने<br>१.५ पाशुपतक्षेत्रस्य महत्त्वप्रकटने |
| २. | विष्णुपुराणम् | २.१. सदाचरणे तत्परताप्रदर्शने<br>२.२ पाठ्यांशाधारेण विषयाभिबोधने<br>२.३ भगवद्भक्तानां चरितविश्लेषणे च<br>२.४ सृष्टिक्रमपरिज्ञाने वर्णने च |
| ३ | वाल्मीकिरामायणम् | ३.१. मानवजीवनस्य लक्ष्यप्रकटने<br>३.२. ईश्वरस्य महिमागाने<br>३.३ भगवतः श्रीरामस्य चरित्रवर्णने<br>३.४ अयोध्याया वैशिष्ट्यवर्णने<br>३.५ यज्ञसम्पादनविषयप्रकटने |
| ४ | गण्डकीशालग्रामयोः महत्त्वदर्शकाः श्लोकाः पद्यविधा | ४.१. गण्डक्या महिमागानानां सङ्क्षेपेण पठने<br>४.२ गण्डकीशालग्रामयोः महत्त्ववर्णने<br>४.३ गण्डकीशालग्रामयोः महत्त्वविषयप्रकटने<br>४.४ तात्कालिकसंस्कृतिविषयवर्णने<br>४.५ रचनापरम्पराबोधने प्रतिपादने च |

### कक्षा १२

**माध्यमिकस्तरीयायां १२ कक्षायामितिहासपुराणविषयमधीत्य छात्रा अधो निर्दिष्टविषयेषु क्षमा भविष्यन्ति -**

| क्र.स. | विषयः | शिक्षणोपलब्धिः |
|---|---|---|
| १. | नेपालमाहात्म्यम् | १.१. पुरातनमन्दिराणां महत्त्वप्रदर्शने |

| | | |
|---|---|---|
| | | १.२. गुरोर्महत्त्वप्रकटने<br>१.३ पाशुपतक्षेत्रस्थमन्दिराणां दर्शनक्रमानुसारेण दर्शने च<br>१.४ नेपालनामकरणविषयवर्णने<br>१.५ नेमुनेः क्षमताविषयवर्णने |
| २. | विष्णुपुराणम् | २.१. सदसद्व्यवहारं परिचित्य स्वव्यवहारपरिष्करणे<br>२.२. समाजे एकता-मित्रता-सद्भावसमन्वयप्रदर्शने<br>२.३ भक्तानां चरितपरिज्ञाने प्रतिपादने च<br>२.४ सङ्क्षेपेण ब्रह्मणः सृष्टिवर्णने<br>२.५ प्रह्लादचरित्रवर्णने |
| ३ | वाल्मीकिरामायणम् | ३.१. आदर्शपारिवारिक जीवनपद्धतेर्निर्माणे<br>३.२. यज्ञादिकार्यसम्पादने क्षमताप्रदर्शने<br>३.३ 'शठे शाठ्यं समाचरेत्' इति प्रतिपादने<br>३.४ श्रीरामभरतादिनां चरितख्यापने<br>३.५ दशरथचरितविषयवर्णने |
| ४ | महाभारतम् | ४.१. महाभारतवर्णितविषयाणां सङ्क्षेपेण पठने<br>४.२ समन्तपञ्चकक्षेत्रस्य महत्त्ववर्णने<br>४.३ अक्षौहिण्याः परिमाणविषयप्रकटने<br>४.४ च्यवनमुनेः जन्मविषयवर्णने<br>४.५ निर्दिष्टसदाचारपालने प्रतिपादने च |

## ४. विषयक्षेत्रं क्रमश्च

### कक्षा ११

| क.स. | विषयः | प्रकरणम् | क्षेत्रम् | बोधः | अभिव्यक्तिः | पाठ्य-घण्टा |
|---|---|---|---|---|---|---|
| १ | नेपालमाहात्म्यम् : पद्यविधा (१-५ अध्यायाः) | प्राकट्यप्रधानप्रसङ्गः | पशुपतेः प्राकट्यम्, देवी-चण्डयोर्युद्धम्, डोलेश्वरस्य प्राकट्यम्, रचनाकालः, तात्कालिकसंस्कृतिः, रचनापरम्परा | विषयसम्बद्ध-श्लोकानां बोधः, प्रश्नोत्तरणञ्च | श्लोकानां सरलार्थकथनम्, पठितश्लोकविषयक-विमर्शनम्, पशुपतेः, देवीचण्डयोः, डोलेश्वरस्य च महत्त्वप्रकाशनम् | ३६ |
| २ | विष्णुपुराणम् : पद्यविधा (प्रथमांऽश १-१३) | सृष्टिप्रकरणम्, चरितप्रधान-प्रकरणञ्च | सृष्टेःवर्णनम्, वराहोपाख्यानम्, ध्रुवचरितम्, पृथोः चरितम्, रचनाकालः, | पठितपद्यतः प्रश्नोत्तरणम्, श्लोकानां बोधः | श्लोकानां उच्चारणज्ञानम्, सृष्टेः ज्ञानम्, वराह-ध्रुव-पृथूनां चरितज्ञानम् | ४० |

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | तात्कालिकसंस्कृतिः, रचनापरम्परा | | | |
| ३ | वाल्मीकिरामायणम् : पद्यविधा (बालकाण्डः १-११ सर्गाः) | पद्यमाध्यमेन कथाया वर्णनम् | ऋष्यश्रृङ्गेण सह शान्तायाः विवाहप्रसङ्गः, सङ्क्षिप्त-रामायणम्, रचनाकालः, तात्कालिकसंस्कृतिः, रचनापरम्परा | कथासारांशानुच्छेदबोधः, कथांशाधृत-प्रश्नोत्तरणम् | कथासारकथनम्, कथाश्रितपद्यभाव-प्रकाशनम्, कथाचरितवैशिष्ट्य-वर्णनम् | ३४ |
| ४ | गण्डकीशाल-ग्रामयोः महत्त्वदर्शकाः श्लोकाः पद्यविधा | गण्डकीशालग्रामयोः महत्त्वबोधकानि सङ्ग्रहीतानि षोडशपद्यानि | सङ्क्षिप्तरूपेण गण्डक्या महिमागानम्, रचनाकालः, तात्कालिकसंस्कृतिः, रचनापरम्परा | पद्यानां सस्वरोच्चारण-ज्ञानम् | पठितपद्यमाध्यमेन गण्डकीशालग्रामयोः महत्त्वप्रतिपादनम् | १० |
| सैद्धान्तिकाभ्यासः | | | | | | १२० |
| प्रयोगाभ्यासः | | | | | | ४० |
| योगः | | | | | | १६० |

**कक्षा १२**

| क.स. | विषयः | प्रकरणम् | क्षेत्रम् | बोधः | अभिव्यक्तिः | पाठ्य-घण्टाः |
|---|---|---|---|---|---|---|
| १. | नेपाल-माहात्म्यम् : पद्यविधा (६-१० अध्यायाः) | उत्पत्तिप्रधान-प्रकरणम् | सूर्यविनायक-स्योत्पत्ति-तिलमाधवयोत्पत्ति-अनन्तलिङ्गेश्वर-कीलेश्वर-स्वर्णश्रृङ्गेश्वराणां प्रादुर्भावप्रसङ्गः, रचनाकालः, तात्कालिकसंस्कृतिः, रचनापरम्परा | पद्यमाध्यमेन कथायाः ज्ञानम्, उत्पत्त्यादिप्रसङ्गानां विषयज्ञानम् | श्लोकानां सरलार्थकथनम्, पठितश्लोकविषयक-विमर्शनम्, विषयवस्तूनां व्याख्यानम्, भावप्रकाशनञ्च | ३० |
| २. | विष्णुपुराणम् : पद्यविधा (प्रथमोंऽश १४-२२) | चरितप्रकरणम् | प्रह्लादचरितम् मरुद्गणोत्पत्तिश्च, रचनाकालः, तात्कालिकसंस्कृतिः, रचनापरम्परा | भक्तिज्ञानम्, भक्तानां चरितज्ञानम्, मरुद्गणोत्पत्तिज्ञानम् | सदसद्व्यवहारबोधः, पद्यानामुच्चारणे सारल्यम्, प्रश्नोत्तरपरिज्ञानम्, भगवद्भक्तिविषय-परिज्ञानम् | २७ |
| ३ | वाल्मीकि-रामायणम् | यज्ञप्रसङ्गः जन्मप्रसङ्गश्च | दशरथसमायोजित पुत्रेष्टियज्ञस्यवर्णनम्, | यज्ञादिकर्म आयोजनायाविषयज्ञान | व्यवहारपरिज्ञानम्, राजकर्मिणः | २७ |

| | | | | | | |
|---|---|---|---|---|---|---|
| | : पद्यविधा (बालकाण्डः १२-१८ सर्गाः) | | श्रीरामादीनां जन्मप्रसङ्गः, रचनाकालः, तात्कालिकसंस्कृतिः, रचनापरम्परा | म्, प्रश्नोत्तरज्ञानम्, जन्मादिप्रसङ्गपरिज्ञानम् | कर्मज्ञानम्, वाक्कौशलप्रदर्शनम्, सदसद्गुणानां ज्ञानम्, यज्ञसम्पादनस्य ज्ञानम् | |
| ४ | महाभारतम् : पद्य-गद्यात्मकम् (आदिपर्वतः ३-१२) | गुरुभक्तिः, जन्मादिप्रसङ्गश्च | आरुणिकस्य गुरुभक्तिः, च्यवनजन्मवृत्तान्त-पठनम्, रुरुडुण्डुभसंवादवर्णनम्, रचनाकालः, तात्कालिकसंस्कृतिः, रचनापरम्परा | गद्यपद्यानां उच्चारणे सरलता, गुरुभक्तिविषयवर्णनम् | पठितगद्यपद्यानां माध्यमेन गुरुभक्ति विषयेज्ञानम्, च्यवनादिजन्मप्रसङ्ग-ज्ञानम्, पितृभक्तिविषये परिज्ञानम् | ३६ |
| सैद्धान्तिकाभ्यासः | | | | | | १२० |
| प्रयोगाभ्यासः | | | | | | ४० |
| योगः | | | | | | १६० |

## ५. प्रयोगात्मककार्यं परियोजनाकार्यञ्च

| कक्षा ११ | | कक्षा १२ | |
|---|---|---|---|
| विषयक्षेत्राणि | शिक्षण घण्टा | विषयक्षेत्राणि | शिक्षण घण्टा |
| - पशुपतेः, देवीचण्डयोः, डोलेश्वरस्य च महत्त्वप्रकाशनसम्बद्ध-परियोजनाकार्यस्य प्रतिवेदनमन्तर्वार्ता च | १० | विषयवस्तूनां व्याख्यानम्, भावप्रकाशनञ्च । पुराणवाचनादिकार्येषु विषयवस्तूनां सन्दर्भानाञ्च समुचितप्रयोगः । | १० |
| - वराह-ध्रुव-पृथूनां चरितवर्णनम् सम्पादितानां कार्याणां प्रतिवेदनानामभिलेखस्य संरक्षणञ्च | १० | पुराणवाचनादिकार्येषु विषयवस्तूनां सन्दर्भानाञ्च समुचितप्रयोगः । सम्पादितानां कार्याणां प्रतिवेदनानामभिलेखस्य संरक्षणञ्च | १० |
| कथाचरितवैशिष्ट्यवर्णनम् पुराणवाचनादिकार्येषु विषयवस्तूनां सन्दर्भानाञ्च समुचितप्रयोगः । | १० | यज्ञसम्पादनादिकार्येषु ज्ञेयविषयवस्तूनां सन्दर्भानाञ्च समुचितप्रयोगः । सम्पादितानां कार्याणां प्रतिवेदनानामभिलेखस्य संरक्षणञ्च | १० |
| - गण्डकीशालग्रामयोः महत्त्वप्रतिपादनसम्बद्ध-परियोजनाकार्यस्य प्रतिवेदनमन्तर्वार्ता च | १० | च्यवनादिजन्मप्रसङ्गवर्णनम् सम्पादितानां कार्याणां प्रतिवेदनानामभिलेखस्य संरक्षणञ्च | १० |
| योगः | ४० | योगः | ४० |

### ६. शिक्षणसहजीकरणप्रक्रिया

नैपालकमूल्यमान्यताऽऽदर्शानामध्ययनस्य माध्यमेन विद्यार्थिनां मौलिकसंस्कृतिसभ्यतयोर्विविधपक्षाणां ज्ञानेन सह सच्चरित्रवतां नैतिकतायुतानां च नागरिकाणां निर्माणमस्य विषयस्योद्देश्यं विद्यते । एतस्मिन् सन्दर्भे नेपालस्य सभ्यता-संस्कृति-मर्यादाऽऽदर्शमौलिकपरम्पराप्रभृतिनैतिकसांस्कृतिकवैभवौस्सह सम्बद्धानि विविधक्षेत्राणि समाविश्य अयं पाठ्यक्रमो निर्मितोऽस्ति । एतस्मिन् समाविष्टानां विषयवस्तूनामध्यापनक्रमे सर्वेभ्यः क्षेत्रभ्यः समानं महत्त्वं प्रदातव्यं भवति । सम्बद्धविषयवस्तुनः सहजीकरणपूवर्कं ज्ञानशिल्पधारणानां विकासनमावश्यकम् । विद्यार्थिषु सैद्धान्तिकपक्षेण सह व्यावहारिकपक्षञ्च विकासस्यानुकूलचिन्तनव्यवहारयोः समुन्नयनमेतस्य विषयस्य मुख्योद्देश्यं निर्धारितं वर्तते ।

इतिहासपुराणशिक्षकेण सदैवादर्शवता सदाचारवता च भूत्वा शिक्षणं विधेयम् । इतिहासपुराणविषये छात्राणां शिक्षणसहजीकरणाय शिक्षकेण वक्ष्यमाणविषयाः स्वीकरणीयाः-

**पाठयोजनया शिक्षणम्**

निर्धारितश्लोकानां कथानाञ्च रटनमात्रेण विद्यार्थिषु सदाचारत्वं सद्व्यवहारत्वं परिष्कृतगुणवत्वञ्च नैवायान्तीति निश्चित्य शिक्षकेण व्यवहारपरां पाठयोजनां निर्माय शिक्षणं विधातव्यम् । दैनिकी त्रैमासिकी वार्षिकी च पाठयोजना निर्धारितशिक्षणोपलब्धिप्राप्तये शिक्षणसहजीकरणाय च उपयोगिन्यः सिद्ध्यन्ति ।

**छात्रेषु पठनौत्सुक्यप्रवर्धनम्**

इतिहासपुराणविषयस्य कतिपयविषयान् प्रतिछात्राः प्रायेण स्वयमेव परिचिता अभ्यस्ताश्च भवन्ति । अतः शिक्षकेण कक्षारम्भे सम्बद्धपाठ्यवस्तुसम्बन्धिनः पूर्वज्ञानस्य स्वजीवने तस्य व्यावहारिकप्रयोगस्य चाभिव्यक्तये विद्यार्थिभ्यो यथेष्टावसरः प्रदातव्यः । कक्षायां वार्ता-घटना-कविता-लघुकथाश्रावणादिध्यानाकर्षककार्यकलापैश्छात्रान् अध्ययनाय सज्जान् समुत्सुकान् च कारयित्वैव पाठारम्भः कार्यः । शिक्षणक्रमेऽनुभवकथन-प्रश्नोत्तरण-विमर्शनादिमाध्यमेन पाठ्यवस्तु प्रति छात्राणां रुचिः प्रवर्द्धनीया ।

**कक्षाव्यवस्थापनम्**

कक्षाप्रकोष्ठस्य वातावरणं शिक्षणमैत्रि निर्मातव्यम् । एतस्य कृते शिक्षकस्य विद्यालयस्य च महती भूमिका भवति । कक्षाप्रकोष्ठस्य विद्यालयक्षेत्रस्य च पठनानुकूला भौतिकी सज्जा पाठं प्रति छत्राणां रुचिवर्धने बहूपयोगिनी भवति । अतो नीतिवाक्य-सूक्ति-पर्यावरणसम्बद्धचित्रादिसामग्रीभिः कक्षाप्रकोष्ठं विद्यालयभवनञ्चालङ्कर्तव्यम् ।

**छात्रकेन्द्रितशिक्षणविधेरवलम्बनम्**

पाठ्यवस्तुनः शिक्षणक्रमे प्रवचनस्यापेक्षया समूहविमर्शन-प्रश्नोत्तरादिच्छात्रकेन्द्रित-शिक्षणविधयोऽवलम्बनीयाः । कक्षायां शिक्षकः केवलं प्रवाचको न, नैव च ज्ञाननिधिरेव अपि तु छात्रान्तर्निहितक्षमताप्रस्फोटनाय सहजकर्ता भवेत् । छात्राणां क्रियाशीलतावर्द्धकशिक्षणकार्यकलापाः सञ्चालनीयाः । विद्यार्थिसङ्ख्यानुसारेण समूहेषु छात्रान् विभज्य अन्तःक्रिया सञ्चालनीया । वैयक्तिकेन सामूहिकेन वा प्रयत्नेन विषयवस्तु प्रति स्वमतप्रकटनाय वादविवादसाधनाय च छात्रेभ्यः पर्याप्तावसरः प्रदातव्यः ।

**शिक्षणसामग्रीणां वैविध्येन प्रयोगः**

यस्य कस्यापि पाठ्यवस्तुनः शिक्षणक्रमे विषयसम्बद्धशिक्षणसामग्रीणां प्रयोगो वैविध्येन करणीयः । न केवलं पाठ्यपुस्तक-श्वेतपट्ट-शब्दपत्रिकादीनामेव अपि तु श्रव्यदृश्यादीनामाधुनिकीनां शिक्षणसामग्रीणा-मपि सान्दर्भिकं प्रयोगं विधाय नीतिविषयानुशीलने छात्राणां साहाय्यं विधेयम् ।

**अभिप्रेरणं पृष्ठपोषणञ्च**

पाठस्य मनन-चिन्तन-प्रश्नोत्तरलेखनादिषु पठितानामितिहासपुराणसम्बद्धविषयाणां व्यावहारिकप्रयोगेषु च शिक्षकेण नैरन्तर्येण छात्राणां प्रेरणं कार्यम् । छात्रैरधीतानां विषयाणामनुसरणं दैनन्दिनव्यवहारे कृतं न वेति सूक्ष्मतयावलोक्य शिक्षकेण यथोचितं पृष्ठपोषणं कर्तव्यम् । निर्धारितश्लोकाधारितविषयवस्तूनां व्यवहारानुशीलने छात्रेषु न्यूनता दृश्यते चेन्निदानात्मकशिक्षणमाध्यमेन समस्या निराकर्तव्या । पुराणवाचनादिकार्येषु यथोचितमवसरं प्रदातत्यम् ।

## ७. विद्यार्थिमूल्याङ्कनप्रक्रिया

विद्यार्थिनां शिक्षणोपलब्धिं सुनिश्चेतुं निर्माणात्मकं निर्णयात्मकञ्चोभयप्रकारकमेव मूल्याङ्कनं विधातव्यं भवति । विद्यार्थिनां शिक्षणोपलब्धे, सुधाराय कक्षाशिक्षणस्यैव क्रमे कक्षाकार्य-परियोजनाकार्य-प्रस्तुतीकरणोपलब्धिपरीक्षासदृशान् क्रियाकलपान् कारयित्वा सैद्धान्तिकज्ञानशिल्पयो-रवाप्तिरावश्यकी । एतत्कार्यस्य प्रभावकारिरूपेण क्रियान्वयनाय, विद्यार्थिनां शिक्षणस्तरस्य सुधाराय च सहजीकरणक्रियाकलापस्य अभिन्नाङ्गस्य रूपेण निर्माणात्मकमूल्याङ्कनमुपयोक्तव्यम् । निर्माणात्मकमूल्याङ्कनस्य शिक्षणोपलब्धेर्निश्चितभारो निर्णयात्मकमूल्याङ्कनेऽपि संयोज्यते ।

पाठ्यक्रमेण निर्धारितस्योद्देश्यस्यानुरूपं विद्यार्थिनो ज्ञान-शिल्पाभिवृत्तीः प्राप्नुवन्नवेति विषयस्यान्वेषकं महत्त्वपूर्णं संयन्त्रं मूल्याङ्कनं भवति । विद्यार्थिनां मूल्याङ्कनं शिक्षणोपलब्धीर्ध्यात्वा सक्षमतां शिक्षणोपलब्धीनाञ्चानुरूपं शिक्षणस्य सर्वान् स्तरान् समाविश्य विधातव्यम् । आन्तरिकबाह्यमूल्याङ्कनयोर्माध्यमेन एतस्य विषयस्य मूल्याङ्कनं विधीयते । मूल्याङ्कनस्य समग्रभारतः पञ्चविंशतिप्रतिशतमान्तरिकं पञ्चसप्ततिप्रतिशतं बाह्यञ्च मूल्याङ्कनं विधीयेते । एवमेव बाह्यमूल्याङ्कनस्यान्तर्गतं लिखितपरीक्षा सञ्चाल्यते । विद्यार्थीमूल्याङ्कनस्यान्तर्गतं निर्माणात्मकं निर्णयात्मकञ्च मूल्याङ्कनं पद्धतिद्वयेनैव क्रियते । अस्य विषयस्य पाठ्यक्रमे समाविष्टानां स्तरगतसक्षमतानाम्, कक्षागतशिक्षणेपलब्धीनाम्, तासां विषयवस्तूनाम्, तैस्सह सम्बद्धस्य शिल्पस्य, शिक्षण सहभागितायाः शिक्षणसक्रियतायाश्चाधारेषु विद्यार्थिनां शिक्षणस्य मूल्याङ्कनं विधातव्यम् ।

इतिहासपुराणस्य अधिकतरविषया व्यवहाराश्रिताः प्रयोगपरकाश्च सन्ति । अत एव अस्य शिक्षणोपलब्धेर्मापनमपि तथाविधामेव मूल्याङ्कनपद्धतिमवलम्ब्य नैरन्तर्येण करणीयम् । शिक्षकेण विद्यार्थिनामाचारव्यवहारादीनामवलोकनेन अनेकविधपरीक्षामाध्यमेन च मूल्याङ्कनं विधातव्यम् । व्यवहाराध्ययनक्रमे विद्यार्थिषु पुराणवाचनाभ्यासे च यत्र न्यूनता दृश्यते तत्र शिक्षकेण तेषां पृष्ठपोषणं कार्यम् । सातत्यमूल्याङ्कनविधीनामवलम्बनेन विद्यार्थिषु विकसितानां गुणानां परीक्षणं विधेयम् । तस्य कृते आचारव्यवहारावलोकन-कक्षाकार्य-गृहकार्य-प्रश्नोत्तर-समूहकार्य-विमर्शन-प्रवचन-खण्डपरीक्षाप्रभृतिकार्यकलापाः सञ्चालनीयाः । मूल्याङ्कनस्य एषा निर्माणात्मिकी प्रक्रिया इतिहासपुराणविषये प्रामुख्येण स्वीकरणीया । अनयैव प्रक्रियया अविच्छिन्नमूल्याङ्कनं सम्पद्यते ।

कक्षागत-स्तरगतशिक्षणोपलब्धेर्मापनाय शैक्षिकवर्षस्यान्तेऽन्तिमपरीक्षारूपा मूल्याङ्कनस्य निर्णयात्मिकी प्रक्रिया अवलम्बनीया । अस्य स्तरस्य विद्यार्थिनां मूल्याङ्कनं अक्षराङ्कनपद्धत्या विधातव्यम् । विद्यार्थिषु पाठ्यवस्तुबोधादर्शचरित्रविकास-मानवीयमूल्यमान्यतावलम्बन-नीत्यनुकूलव्यवहारप्रभृतिविषया मूल्याङ्कनस्य मूलाधारत्वेन स्वीकरणीयाः । मूल्याङ्कनप्रक्रियां विश्वसनीयां विधिसम्मताञ्च सम्पाद्य एकरूपतायामानेतुं स्थानीय-प्रादेशिक-राष्ट्रियस्तरेषु बाह्यसार्वजनिकपरीक्षणविधौ सर्वेषु विषयेषु आन्तरं बाह्यं च मूल्याङ्कनं विधीयते । सार्वजनिकपरीक्षणे प्रतिविषयं प्रतिशतं पञ्चविंशत्याः अङ्कानां कृते आन्तरं परीक्षणं, प्रतिशतं पञ्चसप्तत्याः अङ्कानां कृते बाह्यं परीक्षणञ्च विधीयते ।

आन्तरं मूल्याङ्कनं सम्बद्धविद्यालयस्य शिक्षकेण विधातव्यम् । शिक्षणप्रक्रियया सहैव विषयवस्तुसम्बद्धं मूल्याङ्कनं नैरन्तर्येण विधेयम् । तत्र शिक्षणोपलब्धिः क्रमशः औपचारिकरूपेण अनौपचारिकरूपेण च परिमापनीया । शिक्षणसहजीकरणस्य क्रमे विद्यार्थिभिरधिगतानां ज्ञानशिल्पप्रयोगोच्चदक्षतासम्बद्धपक्षाणां मूल्याङ्कनञ्च अनिवार्यतया विधेयम् ।

### (क) आन्तरं मूल्याङ्कनम्

शिक्षणसहजीकरणप्रक्रियया कक्षागतशिक्षणेन सहैव छात्राणामान्तरं निर्माणात्मकं वा मूल्याङ्कनमपि कर्तव्यम् । नीतिशास्त्रविषयस्य शिक्षणक्रमे छात्राणां निर्माणात्मकमूल्याङ्कनाय अधोऽङ्किता विधयोऽवलम्बयितुं शक्यन्ते-

- लिखितप्रश्नोत्तरमाध्यमेन
- मौखिकप्रश्नोत्तरमाध्यमेन
- छात्राणां परस्परविचारविमर्शमाध्यमेन
- कार्याभ्यासेन

अधोलिखिताधारेणान्तरमूल्याङ्कनं कर्तव्यम् :

| क्र.सं. | क्षेत्रम् | अङ्कभारः |
|---|---|---|
| १. | शिक्षणसहभागिता | ३ |
| २. | कक्षाकार्यं परियोजनाकार्यं वा | ६ |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | १० |
| ४. | त्रैमासिकपरीक्षा | ६ |
| योगः | | २५ |

**(ख) बाह्यमूल्याङ्कनम्**

निर्णयात्मके बाह्ये वा मूल्याङ्कने पाठ्यक्रमे निर्धारितोद्देश्यानुरूपं छात्रैः ज्ञानम्, शिल्पमधिगतं नवेति सम्परीक्ष्य तदनुसारेण छात्राणामुत्तीर्णत्वमनुत्तीर्णत्वं वा निर्णीयते । एतादृशं मूल्याङ्कनमावधिकं भवति । शैक्षिकसत्रस्यान्त एतद् मूल्याङ्कनं विधीयते ।

अधोलिखिताधारेण बाह्यमूल्याङ्कनं कर्तव्यम् :

**कक्षा ११**

| क्र.सं | विषयक्षेत्रगतस्वरूपम् | विषयक्षेत्रम् (पठनं लेखनञ्च) | अङ्कभारः |
|---|---|---|---|
| १. | विषयसम्बद्धानुच्छेदबोधः, प्रश्नोत्तरणञ्च | पद्यम् (नेपालमहात्म्यम्) | २+२ |
| | सरलार्थकथनम्, पठितश्लोकविषयकविमर्शनम्, सन्मित्रगुणकथनम् । | पद्यम् (नेपालमहात्म्यम्) | ८ |
| | निर्धारित विषयवस्तूनां महत्त्वप्रकाशनम् । | पद्यम् (नेपालमहात्म्यम्) | ८ |
| २. | विषयसम्बद्धानुच्छेदबोधः, प्रश्नोत्तरणञ्च | पद्यम् (विष्णुपुराणम्) | १ |
| | सुभाषितसरलार्थकथनम्, सुभाषितप्रेरकपक्षकथनम्, सूक्त्यर्थप्रकाशनम्, सूक्तिसारलेखनम् । | पद्यम् (विष्णुपुराणम्) | १६ |
| | निर्धारित विषयवस्तूनां महत्त्वप्रकाशनम् । | पद्यम् (विष्णुपुराणम्) | ८ |
| ३. | कथासारांशानुच्छेदबोधः, कथाश्रितनीतिसम्बद्धानुच्छेदबोधः, कथांशाधृतप्रश्नोत्तरणम् । | पद्यम् (वाल्मीकिरामायणम्) | १६ |
| | विषयवस्तूनां शिल्पाधृतं विश्लेषणम्, उपयोगविधिः, विस्तरणम्, कथाचरितवैशिष्ट्यवर्णनम्, कथाश्रितपद्यभावप्रकाशनम् । | पद्यम् (वाल्मीकिरामायणम्) | ८ |

| | | | |
|---|---|---|---|
| ४. | सन्देशबोधः, सारांशबोधः, प्रश्नोत्तरणम् । | पद्यम् (गण्डकीशाल-ग्रामयोः महत्त्वदर्शकाः श्लोकाः) | ३+३ |
| योगः | | | ७५ |

**कक्षा १२**

| क्र.सं | विषयक्षेत्रगतस्वरूपम् | विषयक्षेत्रम् (पठनं लेखनञ्च) | अङ्कभारः |
|---|---|---|---|
| १. | विषयसम्बद्धानुच्छेदबोधः, प्रश्नोत्तरणञ्च | पद्यम् (नेपालमहात्म्यम्) | २+२ |
| | सरलार्थकथनम्, पठितश्लोकविषयकविमर्शनम्, सन्मित्रगुणकथनम् । | पद्यम् (नेपालमहात्म्यम्) | ८ |
| | निर्धारित विषयवस्तूनां महत्त्वप्रकाशनम् । | पद्यम् (नेपालमहात्म्यम्) | ८ |
| २. | विषयसम्बद्धानुच्छेदबोधः, प्रश्नोत्तरणञ्च | पद्यम् (विष्णुपुराणम्) | १+१ |
| | सुभाषितसरलार्थकथनम्, सुभाषितप्रेरकपक्षकथनम्, सूक्त्यर्थप्रकाशनम्, सूक्तिसारलेखनम् । | पद्यम् (विष्णुपुराणम्) | १२ |
| | निर्धारित विषयवस्तूनां महत्त्वप्रकाशनम् । | पद्यम् (विष्णुपुराणम्) | ८ |
| ३. | कथासारांशानुच्छेदबोधः, कथाश्रितनीतिसम्बद्धानुच्छेदबोधः, कथांशाधृतप्रश्नोत्तरणम् । | पद्यम् (वाल्मीकिरामायणम्) | १ |
| | विषयवस्तूनां शिल्पाधृतं विश्लेषणम्, उपयोगविधिः, विस्तरणम्, कथाचरितवैशिष्ट्यवर्णनम्, कथाश्रितपद्यभावप्रकाशनम् । | पद्यम् (वाल्मीकिरामायणम्) | १२ |
| ४. | विषयसम्बद्धानुच्छेदबोधः, प्रश्नोत्तरणञ्च | पद्यम् (महाभारतम्) | २+२ |
| | विषयवस्तूनां शिल्पाधृतं विश्लेषणम्, उपयोगविधिः, विस्तरणम्, कथाचरितवैशिष्ट्यवर्णनम्, कथाश्रितपद्यभावप्रकाशनम् । | पद्यम् (महाभारतम्) | ८ |
| | सन्देशबोधः, सारांशबोधः, प्रश्नोत्तरणम् । | पद्यम् (महाभारतम्) | ८ |
| योगः | | | ७५ |

# नीतिशास्त्रम्

**कक्षा** : ११ र १२ **विषय सङ्केत** : [NIS. 521] (**कक्षा** ११), [NIS. 522] (**कक्षा** १२)

**पाठ्यघण्टा** : ५ **वार्षिक कार्यघण्टा** : १६०

## १. परिचयः

नीतिशास्त्रविषयस्य पाठ्यक्रमः नीतिसम्बद्धानां विषयक्षेत्राणां सैद्धान्तिकानां व्यावहारिकाणां च पक्षाणां पठनपाठनयोरुद्देश्येन विकसितो वर्तते । एतदर्थं २०७६ विक्रमवर्षीयस्य राष्ट्रियपाठ्यक्रमप्रारूपस्य मार्गदर्शनानुसारेण विद्यालयशिक्षाया माध्यमिकरस्तरे (एकादश्यां द्वादश्याञ्च कक्षयोः) नीतिशास्त्रविषयस्य एतस्मिन् पाठ्यक्रमे सदाचारपालने व्यवहारकौशलप्रदर्शने च प्रेरकविषयाणां बोधो बुद्धविषयाणामभिव्यक्तिसामर्थ्यञ्च छात्रेषु स्यादिति हेतोर्बोधाभिव्यक्त्योरुल्लेखोऽपि विहितो विद्यते । एतस्माद् वर्तमानसन्दर्भे संस्कृतमितोऽपि व्यावहारिकं निर्माय विद्यार्थिनां रुच्यकाङ्क्षे प्रपूर्य शिक्षाया राष्ट्रियोद्देश्यं प्राप्स्यते, एतस्य सान्दर्भिकतां विस्तार्य विधाय उपयुक्तता सुनिश्चिता च विधास्यते इत्यपेक्षितमस्ति । अनेन पाठ्यक्रमेण सम्बद्धविषये उच्चशिक्षाया आधारोऽपि निर्मात्स्यते इति चापेक्षितं वर्तते ।

नीतिशास्त्रं मानवस्य सर्वोन्नतिकारकं शास्त्रं वर्तते । नीतिशास्त्रं परपीडनेन विना सदाचारसरणिमनुसृत्य लक्ष्यमधिगन्तुं सर्वान् प्रेरयति । नीतिशास्त्रं बहुषु क्षेत्रेषु उपयोगि वर्तते । नीतिशास्त्राध्ययनेनैव जना अर्थनीति-राजनीति-कूटनीति-व्यवहारनीतिषु निपुणा भवन्ति । योग्यानां निष्ठावतां राष्ट्रवादिनां व्यवहारकुशलानाञ्च नागरिकाणामुत्पादनाय नीतिशास्त्रस्य भूमिका अप्रतिमा एवास्ति । संस्कृतवाङ्मये बहुषु विषयेषु नीतिशास्त्रस्य व्यापकप्रयोगो दृश्यते । केवलं नीतिशास्त्रोपदेशस्यापेक्षया कथानां सुभाषितानाञ्च माध्यमेन बालमैत्रीशिक्षणकौशलेन वयोऽभिरुच्यनुकूलतया च प्रत्यक्षतः परोक्षतश्च चरित्रनिर्माणाय समुत्प्रेरणं संस्कृतस्य नीतिशास्त्रस्य नैसर्गिकी विशेषता वर्तते । नीतिशास्त्रेतरासु विधास्वपि नैकविधानां नीतीनां परिज्ञानानुशीलनं संस्कृतवाङ्मयस्यापरं वैशिष्ट्यं विद्यते । राष्ट्रेणापेक्षितायाः चरित्रवत्या जनशक्तेरुत्पादनाय नीतिशास्त्रज्ञानमपरिहार्यमस्ति । विद्यालयस्तरीयायां शिक्षायां नीतिशास्त्रस्याभिन्नाङ्गत्वेन स्वीकरणं समावेशनञ्च शिक्षाया राष्ट्रियोद्देश्यस्य प्राप्तये आधारशिला सेत्स्यति । संस्कृतवाङ्मयराशौ नीतिशास्त्रं शिक्षयितुं नीतिशास्त्र-पद्य-वचोभिः सहिताः प्रभूतसामग्र्यः सन्ति । ताभ्यो नीतिशास्त्राणि तदनुपोषिणीः कथाश्च प्रचित्य पाठ्यक्रमोऽयं निर्मितोऽस्ति ।

परिचयम्, स्तरगतसक्षमताम्, कक्षागतशिक्षणोपलब्धिम्, विषयवस्तुनः क्षेत्रक्रमौ, शिक्षणसहजीकरणप्रक्रियाम्, विद्यार्थिमूल्याङ्कनञ्च समाविश्य पाठ्यक्रमोऽसौ विकासं नीतः । एतस्मिन् क्रमे पाठ्यक्रमलेखनस्य विकासस्य च विषयगतौचित्यम्, पाठ्यक्रमे विद्यमाना मुख्यविशेषताः, पाठ्यक्रमस्य स्वरूपञ्च संयोज्य परिचयं, विषयगतरूपेणापेक्षितं ज्ञानम्, शिल्पम्, अभिवृत्तिम्, मूल्यञ्च, कार्यतत्परतां संयोज्य एतस्याः क्रियात्मकस्वरूपे सक्षमताम्, शिक्षणस्य स्तरम्, सक्षमताया विशिष्टीकृतविस्तृतीकरणेन शिक्षणोपलब्धिम्, सक्षमताम्, पूर्वकक्षाभिस्सह लम्बीयसन्तुलनस्याधारे विषयवस्तुनो क्षेत्रक्रमौ च, विषयगतविशिष्टतामौलिकते संयोज्य शिक्षणसहजीकरणस्य विधिम्, प्रक्रियाञ्च, निर्माणात्मकनिर्णयात्मकमूल्याङ्कनयोर्विधिं प्रक्रियाञ्चोल्लिख्य विद्यार्थिमूल्याङ्कनं व्यवस्थितं वर्तते ।

## २. स्तरगतयोग्यताः

**माध्यमिकस्तरे ११-१२ कक्षयोः नीतिशास्त्रविषयमधीत्य विद्यार्थिनो निर्दिष्टविषयेषु क्षमा भविष्यन्ति –**

१. परिवारे समाजे च व्यवहारकौशलप्रदर्शनम्, परम्परागतानां विशिष्टानां परिष्कृतानाञ्च मूल्यमान्यतानामनुसरणञ्च

२. सदसद्विवेकं प्रदर्श्यानुकरणीयजीवनयापनम्, न्यायनीत्योर्मार्गस्यावलम्बनाय अन्येषामभिप्रेरणञ्च

३. राष्ट्रनिष्ठपूरितया भावनया आदर्शराजनीतिकसंस्कारप्रदर्शनम्

४. सर्वविधानां समस्यानां समुचितसमाधानेन जीवने साफल्याधिगमनम्, पर्यावरणसंरक्षणे योगदानञ्च

५. स्वस्थाऽऽहारविहारयोर्जागरणम्, स्वधर्मसंस्कृतिनिष्ठासु दृढताप्रकटनम्, लौकतन्त्रिकाधिकाराणामभ्यसनञ्च

## ३. कक्षागतशिक्षणोपलब्धिः

**कक्षा ११**

**माध्यमिकस्तरीयायां ११ कक्षायां नीतिशास्त्रविषयमधीत्य छात्रा अधो निर्दिष्टविषयेषु क्षमा भविष्यन्ति –**

१. स्वप्रयत्नेन विद्यार्जनेऽभिप्रेरणम्

२. सेवा-दान-परोपकारकार्येषु संयोजनम्

३. समाजे एकता-मित्रता-सद्भावसमन्वयप्रदर्शनम्

४. आदर्शपारिवारिकजीवनपद्धतेर्निर्माणम्

५. बुद्धिविवेकसंयमैर्निर्णयकौशलार्जनम्

६. प्राणिनां रक्षणेन पर्यावरणसन्तुलनाय प्रयतनम्

७. सदाचरणे तत्परताप्रदर्शनम्

**कक्षा १२**

**माध्यमिकस्तरीयायां १२ कक्षायां संस्कृतव्याकरणविषयमधीत्य छात्रा अधो निर्दिष्टविषयेषु क्षमा भविष्यन्ति –**

१. सदसद्व्यवहारं परिचित्य स्वव्यवहारपरिष्करणम्

२. इन्द्रियनिग्रहणपूर्वकं धैर्य-क्षमा-शान्ति-सत्यशीलानां विकासनम्

३. स्वपरिचय-राष्ट्रगौरव-राष्ट्रोन्नयनकर्मसु सङ्घटितरूपेणाग्रे प्रवर्धनम्

४. विधिं परिपाल्य लौकतन्त्रिकाधिकाराणामभ्यासे जागरणम्

५. नीतिसम्मतोपायेनैवार्थोपार्जने संलग्नता

६. आहारविहारसन्तुलनेन स्वास्थ्यरक्षणे प्रवृत्तिः

७. अशक्तातिथि-बालबालिका-ज्येष्ठनागरिकासहायवर्गाणां सेवा-सम्मान-सहयोगेषु तत्परताप्रदर्शनम्

## ४. विषयक्षेत्रं क्रमश्च

**कक्षा ११**

| क्र.सं. | विषयः | प्रकरणम् | क्षेत्रम् | बोधः | अभिव्यक्तिः | पाठ्य-घण्टाः |
|---|---|---|---|---|---|---|
| १ | चाणक्य-नीतिः (पद्यविधा) | व्यवहारप्रधान-चाणक्यनीतिः | अधोऽङ्कितविषयसम्बद्धाः षष्टिः श्लोकाः-विद्या, दानम्, मित्रम्, परिवारः । | विषयसम्बद्धानुच्छेद बोधः, पठितानुच्छेदप्रश्नोत्तरणम् । | श्लोकानां सरलार्थकथनम्, पठितश्लोकविषयकविमर्शनम्, सन्मित्रगुणकथनम्, विद्या-दान-मित्र-परिवार-महत्त्वप्रकाशनम् । | २२ |
| २ | चाणक्य-नीतिः (पद्यविधा) | सुभाषितप्रधान-चाणक्यनीतिः | सूक्तिसुभाषितप्रधानाः षष्टिः श्लोकाः । | सुभाषितवैशिष्ट्यानुच्छेदबोध, सूक्तिपद्यतः प्रश्नोत्तरणम् । | सुभाषितसरलार्थकथनम्, सुभाषितप्रेरकपक्षकथनम्, सूक्त्यर्थप्रकाशनम्, सूक्तिसारलेखनम् । | २२ |

| | | | | | | |
|---|---|---|---|---|---|---|
| ३ | पञ्चतन्त्रम् ( गद्यविधा) | लघ्वाकार-नीतिकथाः | धर्मबुद्धि-पापबुद्धिकथा, सर्प-पिपीलिकाकथा, चौर-राक्षसकथा, तीक्ष्णनखसिंह-दधिपुच्छशृगालकथा, शुद्धपट-रजककथा, एकबुद्धि-शतबुद्धि-सहस्रबुद्धिकथा । | कथासारांशानुच्छेद बोधः, कथाश्रितनीतिसम्बद्धा-नुच्छेदबोधः, कथांशाधृतप्रश्नोत्तरणम् । | कथासारकथनम्, कथाचरितवैशिष्ट्यवर्णनम्, कथाश्रितपद्यभावप्रकाशनम् , कथाश्रितसुभाषितव्याख्यानम्, सूत्राण्यनुसृत्य सशीर्षकं कथालेखनम् । | ३८ |
| ४ | पञ्चतन्त्रम् ( गद्यविधा) | मध्यमाकार-नीतिकथा | उष्ट्र-काककथा, लुब्धशृगालकथा, चटक-शशककथा, गङ्गदत्तमण्डूककथा, अतिलुब्धककथा, चन्द्रराज-वानरकथा । | कथासन्देशबोधः, कथासारांशानुच्छेद बोधः, कथाश्रितनीतिसम्बद्धा-नुच्छेदबोधः, कथांशाधृतप्रश्नोत्तरणम् । | कथागतघटनानां क्रमबद्धकथनम्, कथासारकथनम्, कथाचरितवैशिष्ट्यवर्णनम्, कथाश्रितपद्यभावप्रकाशनम् , कथाश्रितसुभाषितव्याख्यानम्, कथाया मुख्यविषयाणां घटनानां वा सूत्रीकरणम् । | ३८ |
| सैद्धान्तिकाभ्यासः | | | | | | १२० |
| प्रयोगाभ्यासः | | | | | | ४० |
| योगः | | | | | | १६० |

**कक्षा १२**

| क्र.सं. | विषयः | प्रकरणम् | क्षेत्रम् | बोधः | अभिव्यक्तिः | पाठ्य-घण्टाः |
|---|---|---|---|---|---|---|
| १ | विदुरनीतिः (पद्यविधा) | ज्ञानप्रधान-विदुरनीतिः | अधोऽङ्कितविषयसम्बद्धाः षष्टिः श्लोकाः- पण्डितलक्षणम्, मूर्खलक्षणम्, इन्द्रिय-चिन्तनम्, त्याज्यग्राह्यमनुष्यस्वरूपम्, त्याज्यग्राह्यगुणाः, शरीरचिन्तनम्, अधममध्यमोत्तमपुरुषलक्षणम्, धर्ममार्गान्वेषणम्, प्रज्ञागौरवम्, सङ्घशक्तिज्ञानम्, त्यागमहत्त्वम्, संसिद्धिप्राप्त्युपायः, आशक्तेर्हानिः, पुरुषार्थचतुष्टयम्, यशोवर्द्धनोपायः, वीरपुरुषलक्षणम्, विद्यार्थिगुणदोष-परिज्ञानम्, सुखलक्षणम्, सन्तोषमहत्त्वम्, अज्ञानान्मुक्तिः । | विषयसम्बद्धानुच्छेद-बोधः, नीतिपरकानुच्छेदादुद्धृतप्रश्नोत्तरणम्, स्वशरीरे इन्द्रियादीनां कार्यबोधः, धर्माधर्मप्रज्ञाविषय-सम्बद्धानुच्छेदाद् विषयवस्तुनो बोधः । | सरलार्थकथनम्, पठितश्लोकविषयक-विमर्शनम्, वैशिष्ट्यप्रकाशनम्, विषयवस्तूनां व्याख्यानं विस्तरणं वा, भावप्रकाशनम्, व्यवहारानुशीलनम् | २२ |
| २ | विदुरनीतिः ( पद्यविधा) | व्यवहारप्रधान-विदुरनीतिः | अधोऽङ्कितविषयसम्बद्धाः षष्टिः श्लोकाः- सद्गुणविकासनम्, | सदसद्व्यवहार बोधः, सदाचारबोधः, पर्यावरणविषय | नीतिपद्यस्य सरलार्थकथनम्, अर्थार्जनोपायकथनम्, पर्यावरणसुरक्षायै विद्यार्थिभूमिकाकथनम्, | २२ |

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | शत्रुमित्रव्यवहारनैपुण्यम्, अर्थार्जनप्रयोगकौशलम्, पर्यावरणसुरक्षणम्, विनय-शील-सहनशीलता-क्षमा-निर्भय-प्रेमप्रदर्शनम्, कुलमर्यादारक्षणम्, सदसद्विवेकप्रदर्शनम्, स्वस्थाहारविहार-स्नानाचरणम्, वाक्कौशलम्, सत्कर्मानुष्ठानम्, अतिथिसेवा, चित्तपरिशोधनम्, बलप्रयोगः, सङ्गतिः, नारीरक्षणम्, क्रोधशमनम्, परपीडननिषेधनम्, शास्त्ररक्षणम्, सद्गुणैर्दुर्गुणनिवारणम्, धर्ममार्गानुसरणम् । | कानुच्छेदात् प्रश्नोत्तरणम्, सद्गुणदुर्गुणयोः पार्थक्यबोधकानुच्छेदबोधः, नीतिपद्यतो निःसृतस्योपदेशस्य बोधः । | वाक्कौशलप्रदर्शनम्, सदसद्गुणानां सूचीकरणम्, क्रोधशमनोपायवर्णनम् । | |
| ३ | शुक्रनीतिः (पद्यविधा) | राजनीतिप्रधान-शुक्रनीतिः | अधोऽङ्कितविषयसम्बद्धाः षष्टिः श्लोकाः-प्रधानशासक-लक्षणम्, मन्त्रिलक्षणम्, प्रशासककर्मकरलक्षणम्, दूतलक्षणम्, सेनापति-कर्तव्यनिरूपणम्, वेतन-व्यवस्थापनम्, निवृत्तभरण-स्यापरिहार्यता, सेवकावकाशव्यवस्था, निर्णयक्षमता, दण्डव्यवस्था, कोषनिरूपणम्, राजधर्मनिरूपणम्, कूटनीतिज्ञलक्षणम्, आततायिलक्षणम्, करव्यवस्था, न्यायनिरूपणम्, स्वातन्त्र्यसुखम् । | राजनीतिसम्बद्धानुच्छेदबोधः, शासकप्रशासककर्मचारिलक्षणबोधः, निर्धारितविषयसम्बद्धानुच्छेदतो विषयवस्तुनो बोधः, राजनीतिकपद्याशयावबोधः । | राजनीतिकपद्यसरलार्थ-कथनम्, शासकप्रशासककर्मचारि-लक्षणानां सूचीकरणम्, निवृत्तिभरणस्य महत्त्वकथनम्, राजधर्मप्रकाशनम्, स्वातन्त्र्यमहत्त्वकथनम्, न्याय-दण्ड-करव्यवस्थाया आवश्यकताप्रकाशनम्, आततायिगतिविधेः सर्वनाशकत्वप्रकाशनम् । | ३८ |
| ४ | शुक्रनीतिः (पद्यविधा) | व्यवहार-प्रधान-शुक्रनीतिः | अधोऽङ्कितविषयसम्बद्धाः षष्टिः श्लोकाः- विषाक्तान्नपरीक्षणम्, सर्वोत्तमभोजनम्, निषिद्धाचरणम्, आलस्यनिवारणम्, सुविचारेण कार्यसम्पादनम्, विद्वज्जनमैत्री, वरकन्ययोः परीक्षणम्, विद्याधनयोरुपार्जनम्, पितृपुत्रयोर्लक्षणम्, आपत्कालिकव्यवहरणम्, सन्मित्रलक्षणम्, धूर्तसज्जनयोः स्वरूपम्, धर्माधर्मभेदः । | स्वस्थभोजनस्वीकरणबोधः, त्याज्यग्राह्याचरणबोधः, सज्जन-दुर्जनयोः पार्थक्यबोधः, सदसद्व्यवहारबोधः, सदाचारबोधः, निर्धारितविषयसम्बद्धानुच्छेदतः प्रश्नोत्तरणम्, पठितनीतिपद्यतो निःसृतस्य तात्पर्यस्यावबोधः । | पठितव्यावहारिकनीतिपद्यानां सरलार्थकथनम्, स्वस्थाहार-सदाचरण-विद्यामहत्त्वविषयेषु सम्भाषणम्, धूर्तसज्जनयो-र्धर्माधर्मयोश्च पार्थक्यकथनम्, आलस्य-निषिद्धाचरण-दुर्जनसंगतिपरित्यागविषये विमर्शनम्, व्यावहारनीतीनां सूत्ररूपेण सूचीकरणं व्याख्यानञ्च । | ३८ |

| | |
|---|---|
| **सैद्धान्तिकाभ्यासः** | १२० |
| **प्रयोगाभ्यासः** | ४० |
| **योगः** | १६० |

## ५. प्रयोगात्मककार्यं परियोजनाकार्यञ्च

| क्र.सं. | क्षेत्रम् | परीक्षणीयाः पक्षाः | अङ्क भारः | मूल्याङ्कनाधाराः |
|---|---|---|---|---|
| १. | शिक्षण-सहभागिता | (क) उपस्थितिः<br>(ख) सहभागिता | ३ | ● विद्यार्थिनां दैनिकोपस्थितेरभिलेखः<br>● नीतीनां व्यवहारानुशीलनसम्बद्धविषये मनन-चिन्तन-प्रश्नोत्तर-समूहविमर्शनादि-कक्षागतशिक्षणसहभागिता |
| २. | कक्षाकार्यं परियोजना-कार्यं वा | कक्षाकार्यं परियोजनाकार्यं वा | ६ | ● नीतिविषय-सम्बद्धाः मौखिकी च प्रस्तुतिः, प्रश्नोत्तरलेखन-विमर्श-तात्पर्यस्फुटीकरणञ्च<br>● गृहकार्यं कक्षाकार्यं वा<br>● अधीतानां विषयाणामनुसरणं दैनन्दिनव्यवहारे प्रदर्शनम्<br>● नीतिविषयकप्रवचन-हितोपदेश-सिद्धपुरुषजीवनचरित-सम्बद्ध-परियोजनाकार्यस्य प्रतिवेदनमन्तर्वार्ता च |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | (क) बोधः | ५ | ● सदाचारविषयकविषयवस्तुबोधः<br>● व्यवहारानुशीलनाय कार्यबोधः |
| | | (ख) अभिव्यक्तिः | ५ | गुणकथनम्, सरलार्थकथनम्, अर्थार्जनोपायकथनम्, विद्यार्थिभूमिकाकथनम्, वाक्कौशलप्रदर्शनम्, सदसद्गुणानां सूचीकरणम्, क्रोधशमनोपायवर्णनम्, महत्त्वकथनम्, व्यवहारनीतीनां सूत्ररूपेण सूचीकरणं व्याख्यानं व्यवहारे उपयोगश्च |
| ४. | त्रैमासिक-परीक्षा | मौखिकं लिखितं वा | ६ | त्रैमासिकपरीक्षायाः प्राप्ताङ्कस्यानुपातिकप्रतिशताधारेणाङ्कनिर्धारणं कर्तव्यम् |
| योगः | | | २५ | |

## ६. शिक्षणसहजीकरणप्रक्रिया

नैपालकमूल्यमान्यताऽऽदर्शानामध्ययनस्य माध्यमेन विद्यार्थिनां मौलिकसंस्कृतिसभ्यतयोर्विविधपक्षाणां ज्ञानेन सह सच्चरित्रवतां नैतिकतायुतानां च नागरिकाणां निर्माणमस्य विषयस्योद्देश्यं विद्यते । एतस्मिन् सन्दर्भे नेपालस्य सभ्यता-संस्कृति-मर्यादाऽऽदर्शमौलिकपरम्पराप्रभृतिनैतिकसांस्कृतिकवैभवौस्सह सम्बद्धानि विविधक्षेत्राणि समाविश्य अयं पाठ्यक्रमो निर्मितोऽस्ति । एतस्मिन् समाविष्टानां विषयवस्तुनामध्यापनक्रमे सर्वेभ्यः क्षेत्रभ्यः समानं महत्त्वं प्रदातव्यं भवति । सम्बद्धविषयवस्तुनः सहजीकरणपूवर्कं ज्ञानशिल्पधारणानां विकासनमावश्यकम् । विद्यार्थिषु सैद्धान्तिकपक्षेण सह व्यावहारिकपक्षञ्च विकासस्यानुकूलचिन्तनव्यवहारयोः समुन्नयनमेतस्य विषयस्य मुख्योद्देश्यं निर्धारितं वर्तते ।

नीतिशास्त्रशिक्षकेण सदैवादर्शवता सदाचारवता च भूत्वा शिक्षणं विधेयम् । नीतिशास्त्रविषये छात्राणां शिक्षणसहजीकरणाय शिक्षकेण वक्ष्यमाणविषयाः स्वीकरणीयाः-

**पाठयोजनया शिक्षणम्**

नीतिश्लोकानां कथानाञ्च रटनमात्रेण विद्यार्थिषु सदाचारत्वं सद्व्यवहारत्वं परिष्कृतगुणवत्वञ्च नैवायान्तीति निश्चित्य शिक्षकेण व्यवहारपरां पाठयोजनां निर्माय शिक्षणं विधातव्यम् । दैनिकी त्रैमासिकी वार्षिकी च पाठयोजना निर्धारितशिक्षणोपलब्धिप्राप्तये शिक्षणसहजीकरणाय च उपयोगिन्यः सिद्ध्यन्ति ।

**छात्रेषु पठनौत्सुक्यप्रवर्धनम्**

नीतिशास्त्रस्य कतिपयविषयान् प्रति छात्राः प्रायेण स्वयमेव परिचिता अभ्यस्ताश्च भवन्ति । अतः शिक्षकेण कक्षारम्भे सम्बद्धपाठ्यवस्तुसम्बन्धिनः पूर्वज्ञानस्य स्वजीवने तस्य व्यावहारिकप्रयोगस्य चाभिव्यक्तये विद्यार्थिभ्यो यथेष्टावसरः प्रदातव्यः । कक्षायां वार्ता-घटना-कविता-लघुकथाश्रावणादिध्यानाकर्षककार्यकलापैश्छात्रान् अध्ययनाय सज्जान् समुत्सुकान् च कारयित्वैव पाठारम्भः कार्यः । शिक्षणक्रमेऽनुभवकथन-प्रश्नोत्तरण-विमर्शनादिमाध्यमेन पाठ्यवस्तु प्रति छात्राणां रुचिः प्रवर्द्धनीया ।

**कक्षाव्यवस्थापनम्**

कक्षाप्रकोष्ठस्य वातावरणं शिक्षणमैत्रि निर्मातव्यम् । एतस्य कृते शिक्षकस्य विद्यालयस्य च महती भूमिका भवति । कक्षाप्रकोष्ठस्य विद्यालयक्षेत्रस्य च पठनानुकूला भौतिकी सज्जा पाठं प्रति छत्राणां रुचिवर्धने बहूपयोगिनी भवति । अतो नीतिवाक्य-सूक्ति-पर्यावरणसम्बद्धचित्रादिसामग्रीभिः कक्षाप्रकोष्ठं विद्यालयभवनञ्चालङ्कर्तव्यम् ।

**छात्रकेन्द्रितशिक्षणविधेरवलम्बनम्**

पाठ्यवस्तुनः शिक्षणक्रमे प्रवचनस्यापेक्षया समूहविमर्शन-प्रश्नोत्तरादिच्छात्रकेन्द्रित-शिक्षणविधयोऽवलम्बनीयाः । कक्षायां शिक्षकः केवलं प्रवाचको न, नैव च ज्ञाननिधिरेव अपि तु छात्रान्तर्निहितक्षमताप्रस्फोटनाय सहजकर्ता भवेत् । छात्राणां क्रियाशीलतावर्द्धकशिक्षणकार्यकलापाः सञ्चालनीयाः । विद्यार्थिसङ्ख्यानुसारेण समूहेषु छात्रान् विभज्य अन्तःक्रिया सञ्चालनीया । वैयक्तिकेन सामूहिकेन वा प्रयत्नेन विषयवस्तु प्रति स्वमतप्रकटनाय वादविवादसाधनाय च छात्रेभ्यः पर्याप्तावसरः प्रदातव्यः ।

**शिक्षणसामग्रीणां वैविध्येन प्रयोगः**

यस्य कस्यापि पाठ्यवस्तुनः शिक्षणक्रमे विषयसम्बद्धशिक्षणसामग्रीणां प्रयोगो वैविध्येन करणीयः । न केवलं पाठ्यपुस्तक-श्वेतपट्ट-शब्दपत्रिकादीनामेव अपि तु श्रव्यदृश्यादीनामाधुनिकीनां शिक्षणसामग्रीणा-मपि सान्दर्भिकं प्रयोगं विधाय नीतिविषयानुशीलने छात्राणां साहाय्यं विधेयम् ।

**अभिप्रेरणं पृष्ठपोषणञ्च**

पाठस्य मनन-चिन्तन-प्रश्नोत्तरलेखनादिषु पठितानां नीतिविषयाणां व्यावहारिकप्रयोगेषु च शिक्षकेण नैरन्तर्येण छात्राणां प्रेरणं कार्यम् । छात्रैरधीतानां विषयाणामनुसरणं दैनन्दिनव्यवहारे कृतं न वेति सूक्ष्मतयावलोक्य शिक्षकेण यथोचितं पृष्ठपोषणं कर्तव्यम् । नीतीनां व्यवहारानुशीलने छात्रेषु न्यूनता दृश्यते चेन्निदानात्मकशिक्षणमाध्यमेन समस्या निराकर्तव्या । नीत्यनुकूलव्यवहाराय सदाचरणाय स्वस्थायाः सरलायाश्च जीवनपद्धतेरवलम्बनाय परोपकाराय च छात्राः भूयो भूयः प्रेरयितव्याः ।

**प्रेरकपक्षेषु योजनम्**

सत्सङ्गतेः सम्बद्धविषयेषु साधुमहात्मनां प्रवचनोपदेशादिश्रवणस्यापि यथोचितमवसरश्छात्रेभ्यः प्रदातव्यः । छात्रान् सज्जनानां समीपं नीत्वा तेषामनुकरणीयजीवनपद्धतेरवलोकनं कारयित्वा नीतिविषयकप्रवचनञ्च संश्राव्य तदनुरूपव्यवहरणाय छात्रा उत्प्रेरणीयाः । अन्तर्जालसङ्गणकादिप्रविधीनां सहयोगेन नीतिविषयकप्रवचन-हितोपदेश-सिद्धपुरुषजीवनचरितादि-श्रव्यदृश्यशिक्षणसामग्रीः प्रदर्श्यापि सद्गुणविकासाय छात्राणामभिप्रेरणं कार्यम् ।

**अभ्यासात्मककार्यकलापाः**

नीतिशास्त्रविषयशिक्षणक्रमे अभ्यासप्रधानानां कार्यकलापानां सञ्चालनमपरिहार्यत्वेन स्वीकरणीयम् । अनेकविधप्रयोगात्मककार्यकलापेषु छात्रान् संलग्नान् कारयित्वा पठितविषयाणां व्यावहारिकपरीक्षणं विधातव्यम् । परिवारे समाजे च प्रचलतीः परम्परा अन्यान् संस्कृतिसम्बद्धविषयान् च सङ्कलय्य तेषां नीत्यनुकूलतायाः परीक्षणाय छात्रा उत्प्रेरणीयाः । आत्ममूल्यांकन-प्रस्तुतीकरण-प्रवचन-नीत्युपदेशनादिप्रयोगात्मकविषयाणामभ्यसनाय छात्राणां

मार्गदर्शनं कार्यम् । न्याय-नीति-सदाचार-स्वस्थाहारविहार-परोपकार-पर्यावरणसंरक्षण-सद्व्यवहार-स्वसंस्कृतिसंरक्षणादिविषयेषु प्रवचनादि-माध्यमेन स्वसमुदाये जनजागरणाभियानसञ्चालनाय छात्रान् समर्थान् कारयितुं नेतृत्वक्षमता-विकाससम्बन्धिनः प्रयोगात्मककार्यकलापा अङ्गीकरणीयाः ।

## ७. विद्यार्थिमूल्याङ्कनप्रक्रिया

विद्यार्थिनां शिक्षणोपलब्धिं सुनिश्चेतुं निर्माणात्मकं निर्णयात्मकञ्चोभयप्रकारकमेव मूल्याङ्कनं विधातव्यं भवति । विद्यार्थिनां शिक्षणोपलब्धे, सुधाराय कक्षाशिक्षणस्यैव क्रमे कक्षाकार्य-परियोजनाकार्य-प्रस्तुतीकरणोपलब्धिपरीक्षासदृशान् क्रियाकलापान् कारयित्वा सैद्धान्तिकज्ञानशिल्पयो-रवाप्तिरावश्यकी । एतत्कार्यस्य प्रभावकारिरूपेण क्रियान्वयनाय, विद्यार्थिनां शिक्षणस्तरस्य सुधाराय च सहजीकरणक्रियाकलापस्य अभिन्नाङ्गस्य रूपेण निर्माणात्मकमूल्याङ्कनमुपयोक्तव्यम् । निर्माणात्मकमूल्याङ्कनस्य शिक्षणोपलब्धेर्निश्चितभारो निर्णयात्मकमूल्याङ्कनेऽपि संयोज्यते ।

पाठ्यक्रमेण निर्धारितस्योद्देश्यस्यानुरूपं विद्यार्थिनो ज्ञान-शिल्पाभिवृत्तीः प्राप्नुवन्नवेति विषयस्यान्वेषकं महत्त्वपूर्णं संयन्त्रं मूल्याङ्कनं भवति । विद्यार्थिनां मूल्याङ्कनं शिक्षणोपलब्धीर्ध्यात्वा सक्षमतां शिक्षणोपलब्धीनाञ्चानुरूपं शिक्षणस्य सर्वान् स्तरान् समाविश्य विधातव्यम् । आन्तरिकबाह्यमूल्याङ्कनयोर्माध्यमेन एतस्य विषयस्य मूल्याङ्कनं विधीयते । मूल्याङ्कनस्य समग्रभारतः पञ्चविंशतिप्रतिशतमान्तरिकं पञ्चसप्ततिप्रतिशतं बाह्यञ्च मूल्याङ्कनं विधीयेते । एवमेव बाह्यमूल्याङ्कनस्यान्तर्गतं लिखितपरीक्षा सञ्चाल्यते । विद्यार्थीमूल्याङ्कनस्यान्तर्गतं निर्माणात्मकं निर्णयात्मकञ्च मूल्याङ्कनं पद्धतिद्वयेनैव क्रियते । अस्य विषयस्य पाठ्यक्रमे समाविष्टानां स्तरगतसक्षमतानाम्, कक्षागतशिक्षणेपलब्धीनाम्, तासां विषयवस्तूनाम्, तैस्सह सम्बद्धस्य शिल्पस्य, शिक्षण सहभागितायाः शिक्षणसक्रियतायाश्चाधारेषु विद्यार्थिनां शिक्षणस्य मूल्याङ्कनं विधातव्यम् ।

नीतिशास्त्रस्य अधिकतरविषया व्यवहाराश्रिताः प्रयोगपरकाश्च सन्ति । अत एव अस्य शिक्षणोपलब्धेर्मापनमपि तथाविधामेव मूल्यांकनपद्धतिमवलम्ब्य नैरन्तर्येण करणीयम् । शिक्षकेण विद्यार्थिनामाचारव्यवहारादीनामवलोकनेन अनेकविधपरीक्षामाध्यमेन च मूल्याङ्कनं विधातव्यम् । व्यवहाराध्ययनक्रमे विद्यार्थिषु सदाचरणे नैतिकव्यवहारे च यत्र न्यूनता दृश्यते तत्र शिक्षकेण तेषां पृष्ठपोषणं कार्यम् । सातत्यमूल्यांकनविधीनामवलम्बनेन विद्यार्थिषु विकसितानां नीतिवतां गुणानां नीत्यनुकूलव्यवहाराणाञ्च परीक्षणं विधेयम् । तस्य कृते आचारव्यवहारावलोकन-कक्षाकार्य-गृहकार्य-प्रश्नोत्तर-समूहकार्य-विमर्शन-प्रवचन-खण्डपरीक्षाप्रभृतिकार्यकलापाः सञ्चालनीयाः । मूल्याङ्कनस्य एषा निर्माणात्मिकी प्रक्रिया नीतिशास्त्रविषये प्रामुख्येण स्वीकरणीया । अनयैव प्रक्रियया अविच्छिन्नमूल्यांकनं सम्पद्यते ।

कक्षागत-स्तरगतशिक्षणोपलब्धेर्मापनाय शैक्षिकवर्षस्यान्तेऽन्तिमपरीक्षारूपा मूल्याङ्कनस्य निर्णयात्मिकी प्रक्रिया अवलम्बनीया । अस्य स्तरस्य विद्यार्थिनां मूल्याङ्कनं अक्षराङ्कनपद्धत्या विधातव्यम् । विद्यार्थिषु पाठ्यवस्तुबोधादर्शचरित्रविकास-मानवीयमूल्यमान्यतावलम्बन-नीत्यनुकूलव्यवहारप्रभृतिविषया मूल्याङ्कनस्य मूलाधारत्वेन स्वीकरणीयाः । मूल्याङ्कनप्रक्रियां विश्वसनीयां विधिसम्मताञ्च सम्पाद्य एकरूपतायामानेतुं स्थानीय-प्रादेशिक-राष्ट्रियस्तरेषु बाह्यसार्वजनिकपरीक्षणविधौ सर्वेषु विषयेषु आन्तरं बाह्यं च मूल्याङ्कनं विधीयते । सार्वजनिकपरीक्षणे प्रतिविषयं प्रतिशतं पञ्चविंशत्याः अङ्कानां कृते आन्तरं परीक्षणं, प्रतिशतं पञ्चसप्तत्याः अङ्कानां कृते बाह्यं परीक्षणञ्च विधीयते ।

आन्तरं मूल्याङ्कनं सम्बद्धविद्यालयस्य शिक्षकेण विधातव्यम् । शिक्षणप्रक्रियया सहैव विषयवस्तुसम्बद्धं मूल्याङ्कनं नैरन्तर्येण विधेयम् । तत्र शिक्षणोपलब्धिः क्रमशः औपचारिकरूपेण अनौपचारिकरूपेण च परिमापनीया । शिक्षणसहजीकरणस्य क्रमे विद्यार्थिभिरधिगतानां ज्ञानशिल्पप्रयोगोच्चदक्षतासम्बद्धपक्षाणां मूल्याङ्कनञ्च अनिवार्यतया विधेयम् ।

### (क) आन्तरं मूल्याङ्कनम्

शिक्षणसहजीकरणप्रक्रियया कक्षागतशिक्षणेन सहैव छात्राणामान्तरं निर्माणात्मकं वा मूल्याङ्कनमपि कर्तव्यम् । नीतिशास्त्रविषयस्य शिक्षणक्रमे छात्राणां निर्माणात्मकमूल्याङ्कनाय अधोऽङ्किता विधयोऽवलम्बयितुं शक्यन्ते-

- लिखितप्रश्नोत्तरमाध्यमेन
- मौखिकप्रश्नोत्तरमाध्यमेन
- छात्राणां परस्परविचारविमर्शमाध्यमेन

- कार्याभ्यासेन

**अधोलिखिताधारेणान्तरमूल्याङ्कनं कर्तव्यम् :**

| **क्र.सं.** | **क्षेत्रम्** | **अङ्कभारः** |
|---|---|---|
| १. | शिक्षणसहभागिता | ३ |
| २. | कक्षाकार्यं परियोजनाकार्यं वा | ६ |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | १० |
| ४. | त्रैमासिकपरीक्षा | ६ |
| योगः | | २५ |

(ख) **बाह्यमूल्याङ्कनम्**

निर्णयात्मके बाह्ये वा मूल्याङ्कने पाठ्यक्रमे निर्धारितोद्देश्यानुरूपं छात्रैः ज्ञानम्, शिल्पमधिगतं नवेति सम्परीक्ष्य तदनुसारेण छात्राणामुत्तीर्णत्वमनुत्तीर्णत्वं वा निर्णीयते । एतादृशं मूल्याङ्कनमावधिकं भवति । शैक्षिकसत्रस्यान्त एतद् मूल्याङ्कनं विधीयते ।

अधोलिखिताधारेण बाह्यमूल्याङ्कनं कर्तव्यम् :

**कक्षा ११**

| **क्र.सं** | **विषयक्षेत्रगतस्वरूपम्** | **विषयक्षेत्रम् (पठनं लेखनञ्च)** | **अङ्कभारः** |
|---|---|---|---|
| १. | विषयसम्बद्धानुच्छेदबोधः, पठितानुच्छेदप्रश्नोत्तरणम् । | पद्यम् (व्यवहारप्रधान-चाणक्यनीतिः) | १+२ |
| | सरलार्थकथनम्, पठितश्लोकविषयकविमर्शनम्, सन्मित्रगुणकथनम् । | पद्यम् (व्यवहारप्रधान-चाणक्यनीतिः) | ४ |
| | विद्या-दान-मित्र-परिवार-महत्त्वप्रकाशनम् । | पद्यम् (व्यवहारप्रधान-चाणक्यनीतिः) | ८ |
| २. | सुभाषितवैशिष्ट्यानुच्छेदबोधः, सूक्तिपद्यतः प्रश्नोत्तरणम् । | पद्यम् (सुभाषितप्रधान-चाणक्यनीतिः) | १+२ |
| | सुभाषितसरलार्थकथनम्, सुभाषितप्रेरकपक्षकथनम्, सूक्त्यर्थप्रकाशनम्, सूक्तिसारलेखनम् । | पद्यम् (सुभाषितप्रधान-चाणक्यनीतिः) | १२ |
| ३. | कथासारांशानुच्छेदबोधः, कथाश्रितनीतिसम्बद्धानुच्छेदबोधः, कथांशाधृतप्रश्नोत्तरणम् । | गद्यम् (लघ्वाकार-नीतिकथाः) | २+२ |
| | विषयवस्तूनां शिल्पाधृतं विश्लेषणम्, उपयोगविधिः, विस्तरणम्, कथाचरितवैशिष्ट्यवर्णनम्, कथाश्रितपद्यभावप्रकाशनम् । | गद्यम् (लघ्वाकार-नीतिकथाः) | १२ |
| | कथाश्रितसुभाषितव्याख्यानम्, सूत्राण्यनुसृत्य सशीर्षकं कथालेखनम् । | गद्यम् (लघ्वाकार-नीतिकथाः) | ८ |

| | | | |
|---|---|---|---|
| ४. | कथासन्देशबोधः, कथासारांशानुच्छेदबोधः, कथाश्रित-नीतिसम्बद्धानुच्छेदबोधः, कथांशाधृतप्रश्नोत्तरणम् । | गद्यम् (मध्यमाकार-नीतिकथाः) | १ |
| | कथागतघटनानां क्रमबद्धकथनम्, कथाश्रित-पद्यभावप्रकाशनम्, कथाश्रितसुभाषितव्याख्यानम्, कथाया मुख्यविषयाणां घटनानां वा सूत्रीकरणम् । | गद्यम् (मध्यमाकार-नीतिकथाः) | १२ |
| | कथासारकथनम्, कथाचरितवैशिष्ट्यवर्णनम्, | गद्यम् (मध्यमाकार-नीतिकथाः) | ८ |
| **योगः** | | | **७५** |

**कक्षा १२**

| **क्र.सं** | **विषयक्षेत्रगतस्वरूपम्** | **विषयक्षेत्रम् (पठनं लेखनञ्च)** | **अङ्कभारः** |
|---|---|---|---|
| १. | विषयसम्बद्धानुच्छेदबोधः, पठितानुच्छेदप्रश्नोत्तरणम् । | पद्यम् (ज्ञानप्रधान-विदुरनीतिः) | १+२ |
| | सरलार्थकथनम्, पठितश्लोकविषयकविमर्शनम्, वैशिष्ट्यप्रकाशनम् । | पद्यम् (ज्ञानप्रधान-विदुरनीतिः) | ४ |
| | विषयवस्तूनां व्याख्यानं विस्तरणं वा, भावप्रकाशनम्, व्यवहारानुशीलनोपायकथनम् । | पद्यम् (ज्ञानप्रधान-विदुरनीतिः) | ८ |
| २. | सदसद्व्यवहारबोधः, सदाचारबोधः, पर्यावरण-विषयकानुच्छेदात् प्रश्नोत्तरणम्, सद्गुणदुर्गुणयोः पार्थक्यबोधकानुच्छेदबोधः, नीतिपद्यतः प्रश्नोत्तरणम् । | पद्यम् (व्यवहारप्रधान-विदुरनीतिः) | १+२ |
| | नीतिपद्यस्य सरलार्थकथनम्, अर्थार्जनोपायकथनम्, पर्यावरणसुरक्षायै विद्यार्थिभूमिकाकथनम्, वाक्कौशलप्रदर्शनम्, सदसद्गुणानां सूचीकरणम्, क्रोधशमनोपायवर्णनम् । | पद्यम् (व्यवहारप्रधान-विदुरनीतिः) | १२ |
| ३. | राजनीतिसम्बद्धानुच्छेदबोधः, शासकप्रशासककर्मकारलक्षणबोधः, निर्धारितविषयसम्बद्धानुच्छेदतः प्रश्नोत्तरणम्, राजनीतिकपद्यतः प्रश्नोत्तरणम् । | पद्यम् (राजनीतिप्रधान-शुक्रनीतिः) | २+२ |
| | विषयवस्तूनां शिल्पाधृतं विश्लेषणम्, उपयोगविधिः, विस्तरणम्, शासक-प्रशासक-कर्मकार-लक्षणानां सूचीकरणम्, निवृत्तिभरणस्य महत्त्वलेखनम् । | पद्यम् (राजनीतिप्रधान-शुक्रनीतिः) | १२ |
| | राजधर्मप्रकाशनम्, स्वातन्त्र्यमहत्त्वलेखनम्, न्याय-दण्ड-करव्यवस्थाया आवश्यकत्वप्रकाशनम्, आततायि-गतिविधेः सर्वनाशकत्वप्रकाशनम् । | पद्यम् (राजनीतिप्रधान-शुक्रनीतिः) | ८ |
| ४. | स्वस्थभोजनस्वीकरणबोधः, त्याज्यग्राह्याचरणबोधः, सज्जनदुर्जनयोः पार्थक्यबोधः, सदसद्व्यवहारबोधः, सदाचारबोधः, निर्धारितविषयसम्बद्धानुच्छेदतः प्रश्नोत्तरणम्, | पद्यम् (व्यवहारप्रधान-शुक्रनीतिः) | १ |

| | | | |
|---|---|---|---|
| | पठितनीतिपद्यतः प्रश्नोत्तरणम् । | | |
| | पठितव्यावहारिकनीतिपद्यानां सरलार्थलेखनम्, स्वस्थाहार-सदाचरण-विद्यामहत्त्वविषयेषु सम्भाषणम्, धूर्तसज्जनयोर्धर्माधर्मयोश्चपार्थक्यलेखनम्, आलस्य-निषिद्धाचरण-दुर्जनसंगतिपरित्यागविषये विमर्शनम्, व्यावहारनीतीनां सूत्ररूपेण सूचीकरणं व्याख्यानञ्च । | पद्यम् (व्यवहारप्रधान-शुक्रनीतिः) | १२ |
| | विषयवस्तूनां व्याख्यानं विस्तरणं वा, भावप्रकाशनम्, व्यवहारानुशीलनोपायकथनम् । | पद्यम् (व्यवहारप्रधान-शुक्रनीतिः) | ८ |
| **योगः** | | | **७५** |

# कर्मकाण्डः

**कक्षा** : ११ र १२ **विषय सङ्केत** : Karmakanda [KAR. 531] (**कक्षा** ११), Karmakanda [KAR. 532] (**कक्षा** १२)

**पाठ्यघण्टा** : ५ **वार्षिक कार्यघण्टा** : १६०

## १. परिचय

सनातन-संस्कृतेर्निरन्तरता सुदीर्घकालं यावत् प्रसरेदिति धिया एकादश-द्वादश-कक्षास्तरीय-कर्मकाण्डशिक्षायाः पाठ्यक्रमो निर्धारितः ॥ एतदर्थं २०७६ विक्रमवर्षीयस्य राष्ट्रियपाठ्यक्रमप्रारूपस्य मार्गदर्शनानुसारेण विद्यालयशिक्षाया माध्यमिकरस्तरे (एकादश्यां द्वादश्याञ्च कक्षयोः) कर्मकाण्डविषयस्य एतस्मिन् पाठ्यक्रमे सविधिमण्डपपूजा-वास्तुपूजा-रङ्गरञ्जित-मण्डल-अन्त्यकर्म-देवप्रतिष्ठा-विविध-शान्तिकप्रकार-मुहूर्तज्ञान-आचारादिविषयाणां सन्निवेशो विहितः । कर्मकाण्डशिक्षायाः माध्यमेन एतस्मिँश्च पूर्वकक्षासु पठितानां कर्मकाण्डविषयाणां क्रममालोच्य तदनुकूलतया शास्त्रीयविषया व्यावहारिकरीत्या सन्निवेशिताः । शास्त्रिस्तरीय-कर्मकाण्डविषयाध्ययनाय आधारभूतः कर्मकाण्डीय-पाठ्यक्रमोऽयं सैद्धान्तिकं प्रायोगिकञ्च ज्ञानं प्रदातुं सक्षमोऽस्ति । अनेन पाठ्यक्रमेण सम्बद्धविषये उच्चशिक्षाया आधारोऽपि निर्मात्स्यते इति चापेक्षितं वर्तते ।

वेदसंरक्षणाय प्रथितेषु शिक्षादि-षडङ्गेषु हस्तस्थानीयं कल्पशास्त्रम् । तस्य कल्पशास्त्रस्य श्रौतसूत्र-गृह्यसूत्र-धर्मसूत्रभेदेन भेदत्रयमस्ति । अस्माकं नेपालीपरम्परायां शुक्लयजुर्वेदीय-माध्यन्दिन-वाजसनेय-शाखानुयायिनां बाहुल्यात् सर्वाणि नित्य-नैमित्तिक-काम्यकर्माणि शुक्लयजुर्वेदपरम्परामाश्रित्यैव सम्पाद्यन्ते । महर्षेः याज्ञवल्क्यस्य शिष्यपरम्परायां कात्यायननामा प्रसिद्धो महामुनिरभूत् । तेन शुक्लयजुर्वेदीय-श्रौतस्मार्त-कर्मसम्पादक-पद्धतिद्योतकानि सूत्राणि परिशिष्टसूत्राणि च निर्मितानि । तेन श्रौतसूत्रे प्रत्यक्षश्रुत्युपदिष्टानां कर्मणां प्रयोगविधिरूपदिष्टः । परिशिष्टग्रन्थेषु स्वशाखासम्बद्धानां कर्मणामनुष्ठानपद्धतिरूपदिष्टा । पारस्करमुनिविरचिते प्रसिद्धे स्मार्तकर्मसम्पादके गृह्यसूत्रे शुक्लयजुर्वेदीय-श्रुत्यनुमतानां संस्काराणां, नित्य-नैमित्तिक-काम्यकर्मणां च प्रयोगवर्णनं विहितम् । तथा धर्मसूत्रेषु अखिलैराचरणीयानाम् अभ्युदयनिःश्रेयसापादकानां नित्य-नैमित्तिक-काम्यभेदभिन्नानां सार्ववर्णिकधर्माणां निर्देशः प्राप्यते । स्वशाखीयपरम्परानुकूलतया अनुष्ठानक्रमप्राप्तः समाजप्रयुक्तः कर्मकाण्ड आचारव्यवहारमूल-सनातन-संस्कृतेराधारः । आचारमूलासंस्कृतिरियं विश्वशान्तेर्विश्वबन्धुत्वस्य, राष्ट्रियस्वाभिमानस्य च मूलं स्रोतः । ऋषिभिरुद्घाटितं पौरस्त्यजीवनपद्धतेस्तथ्यपरकमनुभवसिद्धं विज्ञानरहस्यं हि विश्वसभ्यतां पोषयति, सनातनधर्मस्य जीवनोपयोगित्वञ्च ख्यापयति । एतदर्थं कर्मकाण्डविषयस्य पाठ्यक्रमे स्तरानुसारेण छात्राणां योग्यताव्युत्पत्तिप्रवर्द्धनाय क्षमं रुचिकरं निर्दिष्टोद्देश्यपूरकञ्च विषयवस्तु, शिक्षणसहजीकरणोपायाः मूल्याङ्कनपद्धतिश्चेत्यादयो विषयाः सङ्कलय्य च स्थापिताः सन्ति ।

परिचयम्, स्तरगतसक्षमताम्, कक्षागतशिक्षणोपलब्धिम्, विषयवस्तुनः क्षेत्रक्रमौ, शिक्षणसहजीकरणप्रक्रियाम्, विद्यार्थिमूल्याङ्कनञ्च समाविश्य पाठ्यक्रमोऽसौ विकासं नीतः । एतस्मिन् क्रमे पाठ्यक्रमलेखनस्य विकासस्य च विषयगतौचित्यम्, पाठ्यक्रमे विद्यमाना मुख्यविशेषताः, पाठ्यक्रमस्य स्वरूपञ्च संयोज्य परिचयं, विषयगतरूपेणापेक्षितं ज्ञानम्, शिल्पम्, अभिवृत्तिम्, मूल्यञ्च, कार्यतत्परतां संयोज्य एतस्याः क्रियात्मकस्वरूपे सक्षमताम्, शिक्षणस्य स्तरम्, सक्षमताया विशिष्टीकृतविस्तृतीकरणेन शिक्षणोपलब्धिम्, सक्षमताम्, पूर्वकक्षाभिस्सह लम्बीयसन्तुलनस्याधारे विषयवस्तुनो क्षेत्रक्रमौ च, विषयगतविशिष्टतामौलिकते संयोज्य शिक्षणसहजीकरणस्य विधिम्, प्रक्रियाञ्च, निर्माणात्मकनिर्णयात्मकमूल्याङ्कनयोर्विधिं प्रक्रियाञ्चोल्लिख्य विद्यार्थिमूल्याङ्कनं व्यवस्थितं वर्तते ।

## २. स्तरगतयोग्यताः

**माध्यमिकस्तरे ११-१२ कक्षयोः कर्मकाण्डविषयमधीत्य विद्यार्थिनो निर्दिष्टविषयेषु क्षमा भविष्यन्ति -**

१. निर्धारित-कर्मकाण्डीयविषयाणां सिद्धान्तविश्लेषणे

२. नित्य-नैमित्तिक-काम्यकर्ममूलकानां कतिपयपारिभाषिकशब्दानामर्थप्रकाशने

३. कर्मकाण्डपरम्परायाः शास्त्रीयताप्रतिपादने वेदमूलकत्वेन विषयप्रतिपादने वा
४. रङ्गवल्लीरचनासहित-मण्डपपूजावास्तुपूजाप्रयोगे
५. कर्मकाण्डीयलग्नमुहूर्तानां शास्त्रानुरूपनिर्णयप्रदाने
६. शास्त्रीयरीत्या अन्त्यकर्मविधि-प्रयोगप्रतिपादने
७. कर्मकाण्डप्रयोगगतमन्त्राणां शुद्धोच्चारणे
८. निर्धारितकर्मकाण्डविषयाध्ययनाद् विशिष्ट-पौरोहित्यकर्म-सम्पादनयोग्यतार्जने
९. शान्तिक-पौष्टिक-शालाप्रतिष्ठा-मूर्तिप्रतिष्ठादिपूजा-सम्पादनकार्येषु योग्यताधाने
१०. सनातनसंस्कार-संस्कृतिस्वरूपानुकूल-लेखनकौशलप्रवर्द्धने
११. सनातनजीवनपद्धतेराचरणीयगुणाभिव्यक्तौ
१२. आचारव्यवहारादिमानवीयगुणानां सार्वकालिकत्वप्रतिपादने
१३. विश्लेषण-समस्यासमाधानमूलक-विचारशक्तिवर्धने
१४. दृष्ट-श्रुत-पठित-अनुभूत-कर्मकाण्डीयप्रयोगपरकविषयाणां प्रवचन-लेखनमाध्यमेन प्रकाशने
१५. सनातनधर्मसंस्कृतिव्याख्याने

**३. कक्षागतशिक्षणोपलब्धयः**

**कक्षा ११**

**माध्यमिकस्तरीयायां ११ कक्षायां कर्मकाण्डविषयमधीत्य छात्रा अधो निर्दिष्टविषयेषु क्षमा भविष्यन्ति -**

**(क) श्रवण-भाषणशिल्पम्**

१. प्रयोगमूलक-कर्मकाण्डीयविधीनां श्रवणं शुद्धोच्चारणञ्च
२. कर्मसु विनियुक्तानां मन्त्राणां गुरुमुखानुरूपं श्रवणं शुद्धोच्चारणञ्च
३. निर्दिष्टपद्धतिषु प्रयुक्तश्लोकानां गुरुमुखानुरूपं श्रवणं प्रस्तुतीकरणञ्च
४. प्रयोगबहुलांशस्य विधेः हस्तक्रियया स्वरूपप्रकटनम्
५. आधुनिक-सञ्चारोपकरणमाध्यमेन श्रुतानां दृष्टानाञ्च प्रायोगिक-कर्मकाण्डपद्धतीनां मुख्यांशप्रकटनम्
६. गुरुमुखेन श्रुतानां मन्त्र-श्लोक-विधीनां क्रमेण प्रयोगनिर्देशभाषणम्
७. मन्त्रगतानां ब-व, य-य़, स-श-ष, ऋ, इत्याद्यक्षराणां स्पष्टतया उच्चारणम्

**(ख) पठनशिल्पम्**

१. पाठ्यविषयसम्बद्धविधिमन्त्रश्लोकादीनां गुरुमुखोच्चारणानुरूपं पठनम्
२. मन्त्रगतानां ह्रस्व-दीर्घ-प्लुत-रङ्ग-अवग्रहादीनां यथास्थानम् उपयुज्य पठनम्
३. श्रौत-स्मार्तयज्ञस्वरूपबोधपूर्वकं पठनम्
४. विषयसम्बद्धपाठस्य बोधपूर्वकं पठनम्
५. उदात्तानुदात्तस्वरितस्वराणां नियमान् परिपाल्य पठनम्

**(ग) लेखनशिल्पम्**

१. मन्त्रगतान् हल्वर्ण-अच्वर्ण-ह्रस्व-दीर्घ-प्लुत-सन्धि-विवृत्यादीन् निश्चित्य लेखनम्
२. निर्दिष्टप्रयोगमूलकविधीनां सारांशलेखनम्

३. सिद्धान्तपरक-विषयाणाम् अनुच्छेदलेखनम्

४. प्रयोगमूलकानां रङ्गवल्लीनां चित्राङ्कनम्

५. मण्डपनिर्माणविधेः चित्राङ्कनम्

६. पाठसम्बद्धानां प्रश्नानाम् उत्तरलेखनम्

७. कर्मसु विनियुक्तानि वेदमन्त्रे प्रयुक्तानि विशिष्टचिह्नानि (अवग्रह-प्लुतादीनि) उपयुज्य मन्त्रलेखनम्

८. कतिपयपूजापद्धतेः मुख्यांशलेखनम्

९. कतिपयप्रयोगांशस्य व्याख्या-लेखनम्

१०. विषयसम्बद्धेषु शीर्षकेषु टिप्पणीलेखनम्

**कक्षा १२**

**माध्यमिकस्तरीयायां १२ कक्षायां कर्मकाण्डविषयमधीत्य छात्रा अधो निर्दिष्टविषयेषु क्षमा भविष्यन्ति –**

**(क) श्रवण-भाषणशिल्पम्**

१. गुरुमुखोच्चारितमन्त्राणां सावधानतया श्रवणपुरःसरं शुद्धोच्चारणम्

२. कर्मसु विनियुक्तानां श्लोकानां गुरुमुखानुरूपं शुद्धोच्चारणम्

३. निर्दिष्टपद्धतिषु प्रयुक्तविधीनां प्रायोगिकरूपेण प्रस्तुतीकरणम्

४. आवश्यकमुहूर्तविषये मौखिकनिर्णयप्रकटनम्

५. आधुनिक-सञ्चारोपकरणमाध्यमेन श्रुतानां दृष्टानाञ्च प्रायोगिक-कर्मकाण्डपद्धतीनां मुख्यांशप्रकटनम्

६. निर्दिष्टकर्मकाण्डीयविषयाणां सारांशप्रकटनम्

७. मन्त्रगतानां ब-व, य-य, स-श-ष, ऋ, इत्याद्यक्षराणां स्पष्टतया उच्चारणम्

**(ख) पठनशिल्पम्**

१. पाठ्यविषयसम्बद्धविधिमन्त्रश्लोकादीनां गुरुमुखोच्चारणानुरूपं पठनम्

२. मन्त्रगतयोः र्-ल्-वर्णयोः यथास्थानं बोधपूर्वकपठनम्

३. यज्ञस्वरूपम् अवगम्य व्याख्यानम्

४. कर्मकाण्डीयश्लोकभागानां पौनःपुन्येन शुद्धतया पठनम्

५. उदात्तानुदात्तस्वरितस्वराणां नियमान् परिपाल्य मन्त्रपठनम्

६. स्मृति-पुराणादिश्लोकानां शुद्धतया पठनम्

**(ग) लेखनशिल्पम्**

१. मन्त्रगतान् हल्वर्ण-अच्वर्ण-ह्रस्व-दीर्घ-प्लुत-सन्धि-विवृत्यादीन् निश्चित्य लेखनम्

२. निर्दिष्टप्रयोगमूलकविधीनां सारांशलेखनम्

३. सिद्धान्तपरक-विषयाणाम् अनुच्छेदलेखनम्

४. प्रयोगमूलकानां रङ्गवल्लीनां चित्राङ्कनम्

५. मण्डपनिर्माणविधेः चित्राङ्कनम्

६. पाठसम्बद्धानां प्रश्नानाम् उत्तरलेखनम्

७. आचारपक्षीयविषयाणां सारांशलेखनम्

८. कतिपयपूजापद्धतेः मुख्यांशलेखनम्

९. कतिपयप्रयोगांशस्य व्याख्यानरूपेण लेखनम्

१०. विषयसम्बद्धेषु शीर्षकेषु टिप्पणीलेखनम्

## ४. **विषयक्षेत्रं क्रमशच**

**कक्षा ११**

| क्र.सं. | विषयः | प्रकरणम् | **बोधः** | **अभिव्यक्तिः** | **पाठ्य घण्टाः** |
|---|---|---|---|---|---|
| १. | कर्मकाण्डः | कर्मकाण्डपरम्परावबोधनम् | • कर्मकाण्डपरम्पराबोधकांशस्य पठनबोधः | • कर्मकाण्डपरम्पराबोधकांशस्य प्रकाशनम् ।<br>• प्रश्नोद्भावनपुरःसरम् उत्तरलेखनञ्च । | १२ |
| २. | कर्मकाण्डः | रङ्गरञ्जितमण्डलानि | • मण्डलरचनायाः सिद्धान्तबोधः<br>• मण्डलरचनासम्बद्धश्लोकानां पठनबोधः | • मण्डलानाम् आदर्शचित्राङ्कनम् ।<br>• रङ्गरञ्जितमण्डलानां प्रयोगप्रदर्शनम् ।<br>• प्रश्नोद्भावनपुरःसरम् उत्तरलेखनञ्च । | १२ |
| ३. | कर्मकाण्डः | साङ्गमण्डपपूजाविधिः, वास्तुपूजाविधिश्च | • मण्डपपूजाकर्मणः पठनबोधः<br>• मण्डपस्थ-अङ्गकर्मणां पठनबोधः<br>• सर्वतोभद्रादीनां पठनबोधः<br>• वास्तुपूजाकर्मणः पठनबोधः<br>• सम्बद्धकर्मणः प्रयोगस्थल-दर्शनबोधः | • मण्डपपूजाविधेः प्रकटनम् ।<br>• कर्मगतमन्त्राणां गुरुमुखानुरूपं सस्वरमुच्चारणम् ।<br>• सङ्कल्पवाक्यानां कर्मानुरूपं रूपान्तरणम् ।<br>• रङ्गरञ्जित-मण्डलानां निर्माणद्वारा प्रयोगप्रदर्शनम् ।<br>• प्रश्नोद्भावनपुरःसरम् उत्तरलेखनञ्च । | २३ |
| ४. | कर्मकाण्डः | मुहूर्तचिन्तामणिः<br>(नक्षत्रसंस्कारप्रकरणे) | • मुहूर्तानां सिद्धान्तबोधः, सम्बद्धश्लोकानां पठनबोधः<br>• सम्बद्धश्लोकानाम् आदर्शवाचनबोधः<br>• तिथीनां नक्षत्राणाञ्च विशेषसंज्ञाबोधः | • प्रकरणसम्बद्धानां पद्यानाम् आदर्शपठनम् ।<br>• विशेषसंज्ञानां विश्लेषणम् ।<br>• सम्बद्धपद्यानां सन्देशविमर्शनम् ।<br>• सम्बद्धप्रश्नानाम् उत्तरलेखनञ्च । | १७ |
| ५. | कर्मकाण्डः | अन्त्यपद्धतिः<br>(दाहसंस्कारादि-दशगात्रविधिः) | • दाहसंस्कारकर्मणः पठनबोधः<br>• दाहसंस्कारकर्मणः प्रयोगबोधः | • प्रकरणसम्बद्धकर्मणः आदर्शपठनम् ।<br>• प्रकरणसम्बद्धपद्यानाम् | १७ |

| | | | | | |
|---|---|---|---|---|---|
| | | | ● दशगात्रकर्मणः पठनबोधः<br>● दशगात्रकर्मणः प्रयोगबोधः | आदर्शवाचनम् ।<br>● मन्त्राणां परम्परानुरूपं शुद्धोच्चारणम् ।<br>● गद्यभागानां सङ्कल्पादीनां पठनम् ।<br>● पुटक-त्रिकाष्ठादीनां निर्माणद्वारा प्रयोगप्रदर्शनम् ।<br>● सम्बद्धप्रश्नानाम् उत्तरलेखनञ्च । | |
| ६. | कर्मकाण्डः | अन्त्यपद्धतिप्रयोगविधिः | ● सम्बद्धकर्मणः पठनबोधः<br>● अन्त्येष्टिकर्मणः प्रयोगबोधः<br>● श्लोकानां लयात्मकरूपेण पठनबोधः<br>● | ● प्रयोगदर्शनपूर्वकं सम्बद्धविधेः प्रकटनम् ।<br>● विधिसम्बद्धभागस्य प्रश्नानुसारेण उत्तरलेखनम्,<br>● गद्यभागानां आदर्शपठनम् ।<br>● मन्त्राणां गुरुमुखानुरूपं सस्वरमुच्चारणम् । | ३९ |
| सैद्धान्तिकाभ्यासः | | | | | १२० |
| प्रयोगाभ्यासः | | | | | ४० |
| योगः | | | | | १६० |

**पाठ्यवस्तुविवरणम्**

१. **प्रकरणे**

**कर्मकाण्डपरम्परावबोधनम्**

वैदिकवाङ्मयपरिचयः, षडङ्गानां परिचयः, स्वशाखीय-वेदपरम्पराज्ञानम्, श्रौतसूत्रपरिचयः, गृह्यसूत्रपरिचयः, धर्मसूत्रपरिचयः, यज्ञशब्दस्य भावार्थबोधः, यज्ञियदेशज्ञानम्, यागहोमयोः स्वरूपम्, स्वाहा-स्वधा-वौषट्शब्दानां प्रयोगस्थलज्ञानम्, श्रौतयज्ञाः, स्मार्तयज्ञाः, श्रौतस्मार्तपौराणागमकर्मणां संक्षिप्तेतिवृत्तज्ञानम्, श्रौतयागस्मार्तयागयोः पार्थक्यज्ञानम्, स्मार्तकर्मणि श्रौतकर्मणः प्रभावः, मन्त्राणां स्वरूपाणि, नित्यनैमित्तिककाम्यकर्मणां स्वरूपाणि, पञ्चमहायज्ञाः तेषां परिचयः, अरणिपरिचयः, पादकृच्छ्रलक्षणम् ।

२. **प्रकरणे**

**र□रञ्जितमण्डलानि**

सर्वतोभद्र-एकलिङ्गतोभद्र-चतुर्लिङ्गतोभद्र-अष्टलिङ्गतोभद्र-द्वादशलिङ्गतोभद्राणां निर्माणप्रकारबोधनम्, योगिनी-गृहवास्तु-प्रतिष्ठावास्तु-भद्रासनमण्डलानां निर्माणज्ञानम्, स्मार्ताग्निहोमकुण्डनिर्माणज्ञानम् ।

३. **प्रकरणे**

**साËमण्डपपूजाविधिः, वास्तुपूजाविधिश्च,**

मण्डपपरिमाणम्, ध्वजापताकादिसहित-मण्डपरचना, पूर्वाङ्गकर्मज्ञानम्, मण्डपस्थ-वास्तु-योगिनी-क्षेत्रपाल-ग्रहाणां पूजाविधिज्ञानम्, मण्डपपूजाविधिः, षोडशस्तम्भपूजा, तोरणपूजा, कलशस्थापन-ध्वजापताकादिपूजनविधिज्ञानम्, प्रतिद्वारं कर्मानुरूपम् आयुधन्यासज्ञानम्, द्वारपूजा, द्वारपालपूजा, महाध्वजोच्छ्रयणादिपूजान्तो विधिः, सर्वतोभद्र-लिङ्गतोभद्रयोः

पूजाविधिज्ञानञ्चेति विषयाः । वास्तुचक्रज्ञानम्, वास्तुपुरूषशिरोज्ञानम्, शिख्यादिदेवतास्थापन-पूजनप्रकारज्ञानम्, शिलान्यासविधिज्ञानम्, साङ्गं गृहप्रवेशविधिज्ञानम् ।

**४. प्रकरणे**

**मुहूर्तचिन्तामणिः (नक्षत्रसंस्कारप्रकरणे)**

**नक्षत्रप्रकरणे-** (क) तिथीशज्ञानम्, (ख) तिथीनां नन्दादिसंज्ञाः, (ग) नक्षत्रस्वामिनः, (घ) नक्षत्रवासराणां ध्रुवादिसंज्ञाः ।

**संस्कारप्रकरणे-** प्रथमरजोदर्शने शुभाशुभविचारः, रजस्वलास्नानमुहूर्तः, गर्भाधानपुंसवनसीमन्तोन्नयनमुहूर्ताः, जातकर्मनामकरणमुहूर्तौ, प्रथमदन्तोद्गमफलम्, अन्नप्राशनमुहूर्तः, तल्लग्नशुद्धिश्च, अन्नप्राशने शुभाशुभफलम्, कर्णवेधमुहूर्तः, तल्लग्नशुद्धिश्च, गुरुशुक्रबाल्यास्तवार्धक्यकृत्यविवेकः, चूडाकर्ममुहूर्तः, अक्षरारम्भादिकेशान्तसंस्कारमुहूर्ताः ।

**५. प्रकरणे**

**अन्त्यपद्धतिः, (दाहसंस्कारादि-दशगात्रविधिः)**

चितानिर्माणादि-अस्थिप्रक्षेपान्तो विधिः, पञ्चकमरणविधिः, सूतिकामरणे विशेषः, चितापिण्डदानम्, दशगात्रविधिः ( प्रथमदिनादि-दशमदिनान्तो विधिः), अस्थिसंञ्चयनश्राद्धविधिः, पाथेयश्राद्धविधिज्ञानम्, अष्टमहादानानि ।

**६. प्रकरणे**

**अन्त्यपद्धतिप्रयोगविधिः**

एकादशाहे इतिकर्तव्यताज्ञानम्, वृषोत्सर्गविधिज्ञानम्, एकादशाहे आद्यमासिकश्राद्धप्रयोगज्ञानम्, आद्याब्दिकश्राद्धम्, उदककुम्भदानम्, ऊनमासिकादिपञ्चदशश्राद्धानि, तन्त्रेणोनादिपञ्चदशमासिकश्राद्ध-प्रयोगः, सपिण्डीकरणप्रयोगज्ञानम्, गणेशपूजा, सपिण्डोत्तरपाथेयश्राद्धम्, पञ्चकमरणविधिः, मासिकश्राद्धविधिः, अस्थिक्षेपविधिः ।

**कक्षा १२**

| क्र.सं. | विषयः | प्रकरणम् | बोधः | अभिव्यक्तिः | पाठ्य घण्टाः |
|---|---|---|---|---|---|
| १. | कर्मकाण्डः | कर्मकाण्ड-सिद्धान्तज्ञानम् | • शास्त्रसिद्धान्त-पठनबोधः<br>• कर्मसिद्धान्तपठनबोधः<br>• | • सिद्धान्तसम्बद्धांशस्य प्रकटनम् ।<br>• कर्मकाण्डपरम्पराबोधकांशस्य प्रकाशनम् ।<br>• प्रश्नोद्भावनपुरःसरम् उत्तरलेखनञ्च । | १२ |
| २. | कर्मकाण्डः | मूर्तिप्रतिष्ठाविधिः | • प्राणप्रतिष्ठाविधेः स्वरूपांश-प्रकटनम्<br>• सम्बद्धश्लोकानां पठनबोधः<br>• मन्त्राणां पठनबोधः<br>• विधीनां पठनबोधः | • प्राणप्रतिष्ठाविधेः आदर्शपठनम् ।<br>• प्राणप्रतिष्ठाविधेः प्रयोगप्रदर्शनम् ।<br>• सङ्कल्पवाक्यानां कर्मानुरूपं रूपान्तरणम् ।<br>• कर्मगतमन्त्राणां गुरुमुखानुरूपं सस्वरमुच्चारणम् ।<br>• प्रश्नोद्भावनपुरःसरम् उत्तरलेखनञ्च । | २३ |
| ३. | कर्मकाण्डः | प्रचलित-शान्तिककर्म | • शान्तिककर्मविधेः पठनबोधः | • शान्तिककर्मविधेः सारांशप्रकटनम् । | १२ |

| | | | | | |
|---|---|---|---|---|---|
| | | | ● सम्बद्धश्लोकानां पठनबोधः<br>● मन्त्राणां पठनबोधः<br>● विधीनां पठनबोधः<br>● | ● कर्मगतमन्त्राणां गुरुमुखानुरूपं सस्वरमुच्चारणम् ।<br>● सङ्कल्पवाक्यानां मुख्यांश-रूपान्तरणम् ।<br>● वस्तुनिर्माणद्वारा प्रयोगप्रदर्शनम् ।<br>● प्रश्नोद्भावनपुरःसरम् उत्तरलेखनञ्च । | |
| ४. | कर्मकाण्डः | मुहूर्तचिन्तामणिः (विवाहलग्नादिकम्) | ● मुहूर्तानां सिद्धान्तबोधः, सम्बद्धश्लोकानां पठनबोधः<br>● सम्बद्धश्लोकानाम् आदर्शवाचनबोधः<br>● श्लोकानां भावार्थबोधः | ● प्रकरणसम्बद्धानां पद्यानाम् आदर्शपठनम् ।<br>● दोषादीनां स्वरूपकथनम् ।<br>● सम्बद्धपद्यानां सारांशप्रकटनम् ।<br>● सम्बद्धप्रश्नानाम् उत्तरलेखनञ्च । | १७ |
| ५. | कर्मकाण्डः | यज्ञवल्क्यस्मृतिः (आचाराध्यायः) | ● पद्यानां पठनबोधः<br>● पद्यानां भावार्थबोधः<br>● पद्यानाम् आचरणबोधः | ● प्रकरणसम्बद्धश्लोकानां मुख्यांशप्रकाशनम्,<br>● प्रकरणसम्बद्धपद्यानाम् लयात्मकवाचनम् ।<br>● सम्बद्धप्रश्नानाम् उत्तरलेखनञ्च । | ५६ |
| सैद्धान्तिकाभ्यासः | | | | | १२० |
| प्रयोगाभ्यासः | | | | | ४० |
| योगः | | | | | १६० |

**पाठ्यवस्तुविवरणम्**

१. **प्रकरणे**

**कर्मकाण्डसिद्धान्तज्ञानम्**

स्वशाखीय-परिशिष्टग्रन्थानां परिचयः, कर्मसु दिङ्नियमः, मन्त्राणां ऋषिछन्दोदेवतादिविचारः, कर्मणि प्रतिनिधिविचारः, कर्मसु वर्ज्यवस्त्राणि, समिल्लक्षणम्, उपांशुलक्षणम्, दर्भलक्षणम्, सङ्कल्पोहविचारः, ऋत्विजां नियमाः, यजमानस्य नियमाः, हवनीयद्रव्यज्ञानम्, व्रतविचारः, मलमास-क्षयमासयोः परिचयः, तिथीनां पूर्वापरविचारः, हेमादिपवित्रप्रमाणविचारः, यज्ञियवृक्षाः, श्राद्धभेदाः, श्राद्धाधिकारिणः, श्राद्धेषु प्रशस्यानि वस्तूनि, देवप्रतिमा-प्रतिष्ठाविचारः, गृहे देवताप्रतिमाविचारः, गृहे देवमन्दिरविचारः ।

२. **प्रकरणे**

**मूर्तिप्रतिष्ठाविधिः**

ध्वजापताकादिसहित-मण्डपनिर्माणम्, पूर्वाङ्गविधिज्ञानम्, प्रतिष्ठासामग्रीज्ञानम्, मण्डपपूजाविधिज्ञानम्, सर्वतोभद्रपूजाप्रयोगज्ञानम्, कलशस्थापनक्रमज्ञानम्, देवस्नपनविधिज्ञानम्, अधिवासकार्याणि, न्यासविधिः, प्राणप्रतिष्ठा, पूजाविधिः, प्रतिष्ठोत्तरहोमादिसाङ्गप्रतिष्ठा-कर्मप्रयोगज्ञानम्, वसोर्धाराज्ञानम्, चलप्रतिष्ठा, जीर्णोद्धारविधिः ।

३. **प्रकरणे**

**प्रचलितशान्तिककर्म**

मूलशान्तिः, अश्लेषाशान्तिः, कृष्णचतुर्दशीजननशान्तिः, काकविष्टापतनशान्तिः, सहजननशान्तिः, गोमुखप्रसवविधिः, अर्कविवाहप्रयोगः, कुम्भविवाहः, विष्णुप्रतिमाविवाहः ।

४. **प्रकरणे**

**मुहूर्तचिन्तामणिः, (विवाहलग्नादिकम्)**

वैधव्ययोगः, प्रथमापत्यविषयकविचारः, प्रश्न-लग्नक्षणविचारः, कन्यावरणमुहूर्तः, विवाहे वरवध्वोर्जन्मराशितो ग्रहशुद्धिप्रकारः, विवाहमासादिकम्, विवाहनक्षत्राणि, आद्यगर्भे द्विज्येष्ठ-त्रिज्येष्ठ-सहजादिविवाहे विशेषज्ञानम्, चूडाविवाहादौ पौर्वापर्यविचारः, मूलादिनक्षत्रजातयोर्वरवध्वोः श्वश्र्वादिपीडाविचारः, लताकर्तरीदोषौ तत्परिहारश्चेति ।

५. **प्रकरणे**

**यज्ञवल्क्यस्मृतिः, (आचाराध्यायः)**

याज्ञवल्क्यस्मृत्यन्तर्गत आचाराध्यायः- (उपोद्घातप्रकरणम्, ब्रह्मचारिप्रकरणम्, विवाहप्रकरणम्, वर्णजातिविवेकप्रकरणम्, गृहस्थधर्मप्रकरणम्, भक्ष्याभक्ष्यप्रकरणम्, द्रव्यशुद्धिप्रकरणम्, दानप्रकरणम्, श्राद्धप्रकरणम्, ग्रहशान्तिप्रकरणम्) ।

५. **प्रयोगात्मककार्य परियोजनाकार्यञ्च**

| क्र.सं. | क्षेत्रम् | परीक्षणीयाः पक्षाः | अक्तभारः | मूल्याक्तनाधाराः |
|---|---|---|---|---|
| १. | शिक्षण-सहभागिता | (क) उपस्थितिः<br>(ख) सहभागिता | ३ | • विद्यार्थिनां दैनिकोपस्थितेरभिलेखः<br>• कर्मकाण्डीय-प्रयोगपरकविषयेषु हस्तक्रियाप्रदर्शन-प्रश्नोत्तर-समूहविमर्शनादि-कक्षागतशिक्षणसहभागिता । |
| २. | कक्षाकार्यं परियोजनाकार्यं वा | कक्षाकार्यं परियोजनाकार्यं वा | ६ | • कर्मकाण्डसम्बद्धविषयाणां मौखिकी प्रस्तुतिः ।<br>• कर्मणां शुष्कप्रयोगप्रदर्शनम् ।<br>• रङ्गरञ्जितमण्डलनिर्माणपुरःसरं प्रदर्शनं च ।<br>• कुश-काष्ठ-सूत्रादिभिः प्रयोगपरकवस्तुनिर्माणं प्रदर्शनं च ।<br>• सम्पादितानां कार्याणां प्रतिवेदनानामभिलेखस्य संरक्षणञ्च |
| २. | विषयवस्तुगतं मूल्याङ्कनम् | (क) बोधः | ५ | • निर्धारितविषयाणां प्रयोगानुशीलनम् ।<br>• सम्बद्धमन्त्राणां प्रयोगस्थलानुसन्धानम् ।<br>• कर्मसम्बद्धसङ्कल्पवाक्यानां समुचितप्रयोगानुशीलनम् ।<br>• निर्धारित-कर्मकाण्डीयविषयवस्तुबोधः । |
| | | (ख) अभिव्यक्तिः | ५ | • निर्धारितविषयाणां हस्तक्रियया प्रकाशनम् ।<br>• सम्बद्धमन्त्राणां शुद्धतया वाचनम् ।<br>• निर्धारितकर्मकाण्डविषयाणां परिचयप्रदानपुरःसरं औचित्याभिव्यञ्जनम् ।<br>• निर्धारितकर्मकाण्डप्रयोगेषु कर्मगत-पार्थक्यविवेचनम् |

| | | | | |
|---|---|---|---|---|
| | | | | ।<br>● निर्धारितमुहूर्तानां व्याख्यानं व्यवहारे उपयोगश्च ।<br>● आचाराणां महत्त्वकथनम्/व्यावहारिकप्रयोगश्च । |
| ३. | त्रैमासिकपरीक्षा | मौखिकं लिखितं वा | ६ | त्रैमासिकपरीक्षायाः प्राप्ताङ्कस्यानुपातिकप्रतिशताधारेणाङ्कनिर्धारणं कर्तव्यम् |
| योगः | | | २५ | |

### ६. शिक्षणसहजीकरणप्रक्रिया

नैपालकमूल्यमान्यताऽऽदर्शानामध्ययनस्य माध्यमेन विद्यार्थिनां मौलिकसंस्कृतिसभ्यतयोर्विविधपक्षाणां ज्ञानेन सह सच्चरित्रवतां नैतिकतायुतानां च नागरिकाणां निर्माणमस्य विषयस्योद्देश्यं विद्यते । एतस्मिन् सन्दर्भे नेपालस्य सभ्यता-संस्कृति-मर्यादाऽऽदर्शमौलिकपरम्पराप्रभृतिनैतिकसांस्कृतिकवैभवैस्सह सम्बद्धानि विविधक्षेत्राणि समाविश्य अयं पाठ्यक्रमो निर्मितोऽस्ति । एतस्मिन् समाविष्टानां विषयवस्तुनामध्यापनक्रमे सर्वेभ्यः क्षेत्रभ्यः समानं महत्त्वं प्रदातव्यं भवति । सम्बद्धविषयवस्तुनः सहजीकरणपूर्वकं ज्ञानशिल्पधारणानां विकासनमावश्यकम् । विद्यार्थिषु सैद्धान्तिकपक्षेण सह व्यावहारिकपक्षञ्च विकासस्यानुकूलचिन्तनव्यवहारयोः समुन्नयनमेतस्य विषयस्य मुख्योद्देश्यं निर्धारितं वर्तते ।

कर्मकाण्डविषयस्य शिक्षणोपक्रमे शिक्षकैर्वार्षिकीं दैनिकीं वा पाठयोजनाञ्च निर्माय शिक्षणसहजीकरणं कर्तव्यम् । सोद्देश्यं छात्राणां पाठश्रवणस्य पाठमननस्य पाठ्यविषयान्तर्गतानां विविधपक्षाणां नैसर्गिकप्रतिभया चिन्तनपूर्वकं प्रश्नोत्तरलेखनस्य शिल्पविकासाय शिक्षकैर्दत्तचित्तैः प्रेरणादश्च भवितव्यम् । कक्षायां विषयानुसारेण प्रश्नोत्तर-लेखन-प्रयोगाभ्यास-विमर्शादिकार्ये शिक्षकैरेवच्छात्राः प्रेरयिताव्याः । पाठ्यविषयाणां पाठ्यवस्तूनां वा प्रकृत्यनुसारमेव चिन्तन-मनन-अभ्यास-प्रश्नोत्तरलेखनादिकार्ये शिक्षककैरेवच्छात्राः प्रेरणीयाः ।

शिक्षणसहजीकरणप्रक्रियां पाठ्यवस्तूनां प्रकृत्यनुसारेण चिन्तन-मनन-प्रश्नोत्तरलेखनादिकार्येषु शिक्षकैरेवच्छात्राः प्रेरणीयाः । प्रकरणनिर्दिष्टग्रन्थान्तर्गतानां पद्य-गद्य-निबद्धविषयाणां, वैदिकमन्त्राणां च यथानियमं शिक्षकैरादर्शपाठपुरःसरं तदनुकूलपठनाय छात्राः प्रेरयितव्याः । अनन्तरमुक्तविषयाणां सामूहिकरूपेण पृथक्-पृथग्रूपेण चोच्चारणाय शिक्षकैश्छात्रा निर्देष्टव्याः । ततः पाठ्यविषयाणां प्रकृत्यनुसारं गुरु-शिष्यैः परस्परं प्रश्न-प्रतिप्रश्नकरणेन, मन्त्राणां वारंवारं गुरुशिष्यैः सामूहिकाभ्यासेन, श्याम/श्वेतपट्टिकायां वर्णाक्षरचित्रादीनां समुल्लेखनेन, श्रव्यदृश्योपकरणप्रयोगेण, हस्तस्वरप्रदर्शनेन, मुखाकृतिप्रदर्शनेन, शब्द-वाक्यादीनामर्थकरणेन, व्याख्यानेन, शब्दानामन्वयकरणेन, पर्यायार्थनिर्देशेन, भावार्थप्रकाशनेन, उदाहरण-प्रत्युदाहरणनिर्देशेन, सन्दर्भग्रन्थाध्ययनाय प्रेरणाप्रदानेन, आख्यायिकाश्रावणेन च पाठ्यविषयाणां शिक्षणं कर्तव्यम् । शिक्षणकार्ये शिक्षकैः विषयवस्तूनां सामान्यपरिचयमुद्देश्यकथनं प्रस्तुतिविधिञ्च बोधयित्वाच्छात्रछात्राभ्यस्तत्सम्बद्धं कक्षाकार्य गृहकार्यञ्च प्रदेयम् । अधोलिखितानामभ्यासप्रधानानां सर्जनात्मकानाञ्च कलापानां सम्पादनमावश्यकं भवति-

(क) प्रस्तुतीकरणम्　　(ख) अभ्यासः　　(ग) उत्पादनम्

(घ) पठनबोधः　　(ङ) प्रयोगात्मककार्यम्　　(च) पृष्ठपोषणम्

(छ) आत्ममूल्याङ्कनम्

### ७. विद्यार्थिमूल्याङ्कनप्रक्रिया

विद्यार्थिनां शिक्षणोपलब्धिं सुनिश्चेतुं निर्माणात्मकं निर्णयात्मकञ्चोभ्यप्रकारकमेव मूल्याङ्कनं विधातव्यं भवति । विद्यार्थिनां शिक्षणोपलब्धे, सुधाराय कक्षाशिक्षणस्यैव क्रमे कक्षाकार्य-परियोजनाकार्य-प्रस्तुतीकरणोपलब्धिपरीक्षासदृशान् क्रियाकलापान् कारयित्वा सैद्धान्तिकज्ञानशिल्पयो-रवाप्तिरावश्यकी । एतत्कार्यस्य प्रभावकारिरूपेण क्रियान्वयनाय, विद्यार्थिनां शिक्षणस्तरस्य सुधाराय च सहजीकरणक्रियाकलापस्य अभिन्नाङ्गस्य रूपेण निर्माणात्मकमूल्याङ्कनमुपयोक्तव्यम् । निर्माणात्मकमूल्याङ्कनस्य शिक्षणोपलब्धेर्निश्चितभारो निर्णयात्मकमूल्याङ्कनेऽपि संयोज्यते ।

पाठ्यक्रमेण निर्धारितस्योद्देश्यस्यानुरूपं विद्यार्थिनो ज्ञान-शिल्पाभिवृत्तीः प्राप्नुवन्नवेति विषयस्यान्वेषकं महत्त्वपूर्णं संयन्त्रं मूल्याङ्कनं भवति । विद्यार्थिनां मूल्याङ्कनं शिक्षणोपलब्धीर्ध्यात्वा सक्षमतां शिक्षणोपलब्धीनाञ्चानुरूपं शिक्षणस्य सर्वान्

स्तरान् समाविश्य विधातव्यम् । आन्तरिकबाह्यमूल्याङ्कनयोर्माध्यमेन एतस्य विषयस्य मूल्याङ्कनं विधीयते । मूल्याङ्कनस्य समग्रभारतः पञ्चविंशतिप्रतिशतमान्तरिकं पञ्चसप्ततिप्रतिशतं बाह्यञ्च मूल्याङ्कनं विधीयेते । एवमेव बाह्यमूल्याङ्कनस्यान्तर्गतं लिखितपरीक्षा सञ्चाल्यते । विद्यार्थीमूल्याङ्कनस्यान्तर्गतं निर्माणात्मकं निर्णयात्मकञ्च मूल्याङ्कनं पद्धतिद्वयेनैव क्रियते । अस्य विषयस्य पाठ्यक्रमे समाविष्टानां स्तरगतसक्षमतानाम्, कक्षागतशिक्षणेपलब्धीनाम्, तासां विषयवस्तूनाम्, तैस्सह सम्बद्धस्य शिल्पस्य, शिक्षण सहभागितायाः शिक्षणसक्रियतायाश्चाधारेषु विद्यार्थिनां शिक्षणस्य मूल्याङ्कनं विधातव्यम् ।

अस्य स्तरस्य विद्यार्थिनां मूल्याङ्कनम् अक्षराङ्कनपद्धत्या विधीयते । मूल्याङ्कने निर्माणात्मकी निर्णयात्मिकी च प्रक्रिया अवलम्ब्यते । छात्राणां स्तरगतसामर्थ्योपलब्धये विधातव्यैरध्ययनभ्रमण-घटनावलोकन-सर्जनकार्य-वैयक्तिकसामूहिकविमर्शन-लिखितपरीक्षा-प्रत्युत्पन्नमतिप्रदर्शन-प्रश्नोत्तरण-कक्षाकार्यपरीक्षण-व्यवहारप्रभृति-कार्यैर्निर्माणात्मकं मूल्याङ्कनं विधीयते येन अविच्छिन्नं मूल्याङ्कनं सम्पद्यते । स्तरगतसामर्थ्योपलब्धये कक्षागतसामर्थ्योपलब्धे च शैक्षिकसत्रस्यान्तेऽन्तिमपरीक्षाया माध्यमेन निर्णयात्मकमूल्याङ्कनं सम्पाद्यते । विद्यार्थिषु पाठ्यवस्तुबोधादर्शचरित्रनिर्माण-मानवीयमूल्यमान्यतावलम्बन-संस्कारसंरक्षण-प्रयोगाभ्यास-प्रभृतिविषयाणां विकासो मूल्याङ्कनस्य मूलाधारो मन्यते ।

मूल्याङ्कनप्रक्रियां विश्वसनीयां विधिसम्मताञ्च सम्पाद्य एकरूपतायामानेतुं स्थानीय-प्रादेशिक-राष्ट्रियस्तरेषु बाह्यसार्वजनिकपरीक्षणविधौ सर्वेषु विषयेषु आन्तरं बाह्यं च मूल्याङ्कनं विधीयते । सार्वजनिकपरीक्षणे प्रतिविषयं प्रतिशतं पञ्चविंशत्याः अङ्कानां कृते आन्तरं परीक्षणं, प्रतिशतं पञ्चसप्तत्याः अङ्कानां कृते बाह्यं परीक्षणञ्च विधीयते । आन्तरं मूल्याङ्कनं सम्बद्धविद्यालयस्य शिक्षकेण विधातव्यम् । शिक्षणप्रक्रियया सहैव विषयवस्तुसम्बद्धं मूल्याङ्कनं नैरन्तर्येण विधेयम् । तत्र शिक्षणोपलब्धिः क्रमशः औपचारिकरूपेण अनौपचारिकरूपेण च परिमापनीया । शिक्षणसहजीकरणस्य क्रमे विद्यार्थिभिरधिगतानां ज्ञानशिल्पप्रयोगोच्चदक्षतासम्बद्धपक्षाणां मूल्याङ्कनञ्च अनिवार्यतया विधेयम् ।

### (क) आन्तरं मूल्याङ्कनम्

शिक्षणसहजीकरणप्रक्रियया कक्षागतशिक्षणेन सहैव छात्राणामान्तरं निर्माणात्मकं वा मूल्याङ्कनमपि कर्तव्यम् । कर्मकाण्डस्य शिक्षणक्रमे छात्राणां निर्माणात्मकमूल्याङ्कनाय अधोऽङ्किता विधयोऽवलम्बयितुं शक्यन्ते-

- लिखितप्रश्नोत्तरमाध्यमेन
- मौखिकप्रश्नोत्तरमाध्यमेन
- छात्राणां परस्परविचारविमर्शमाध्यमेन
- कार्याभ्यासेन

अधोलिखिताधारेणान्तरमूल्याङ्कनं कर्तव्यम् :

| क्र.सं. | क्षेत्रम् | अङ्कभारः |
|---|---|---|
| १. | शिक्षणसहभागिता | ३ |
| २. | कक्षाकार्यं परियोजनाकार्यं वा | ६ |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | १० |
| ४. | त्रैमासिकपरीक्षा | ६ |
| योगः | | २५ |

### (ख) बाह्यमूल्याङ्कनम्

निर्णयात्मके बाह्ये वा मूल्याङ्कने पाठ्यक्रमे निर्धारितोद्देश्यानुरूपं छात्रैः ज्ञानम्, शिल्पमधिगतं नवेति सम्परीक्ष्य

तदनुसारेण छात्राणामुत्तीर्णत्वमनुत्तीर्णत्वं वा निर्णीयते । एतादृशं मूल्याङ्कनमावधिकं भवति । शैक्षिकसत्रस्यान्त एतद् मूल्याङ्कनं विधीयते ।

अधोलिखिताधारेण बाह्यमूल्याङ्कनं कर्तव्यम् :

**कक्षा ११**

| **क्र.सं.** | **विषयक्षेत्रगतस्वरूपम्** | **विषयक्षेत्रम्** | **अङ्कभारः** |
|---|---|---|---|
| १. | वैदिकवाङ्मयपरिचयादि-श्रौतयज्ञान्तनिर्धारितविषयाणां बोधः । | कर्मकाण्डपरम्परावबोधनम् । | २+२ |
| | स्मार्तयज्ञादि-पादकृच्छ्रान्त-निर्धारितविषयाणां बोधः । | कर्मकाण्डपरम्परावबोधनम् । | ४ |
| २. | योगिनीवेदिनिर्माणादि-स्मार्ताग्निहोमकुण्डनिर्माणान्तविषयाणां बोधाभिव्यक्तिः, हस्तक्रियया वेदिप्रदर्शनम् । | रङ्गरञ्जितमण्डलानि । | १+२ |
| | सर्वतोभद्रादि-निर्धारितचक्राणां निर्माणाभिव्यक्तिः, निर्धारितचक्राणां चित्रांकनेनाभिव्यक्तिः । | रङ्गरञ्जितमण्डलानि । | ४ |
| ३. | निर्धारितसाङ्गमण्डपपूजाविधिबोधः, स्वस्वरं मन्त्राभिव्यक्तिः, ध्वजापताकादीनां रंगबोधः, देवतावाहनबोधः, शिलान्यास-विधिबोधः । | साङ्गमण्डपपूजाविधिः, वास्तुपूजाविधिश्च । | १+२ |
| | निर्धारितवास्तुपूजाविधिबोधः, सस्वरं मन्त्राभिव्यक्तिः, गृहप्रवेशविधिबोधः । | साङ्गमण्डपपूजाविधिः, वास्तुपूजाविधिश्च । | ४ |
| | निर्धारितपूजाविधिषु निर्दिष्टमन्त्राणां प्रयोगस्थलज्ञानम्, कर्मानुरूपसङ्कल्पवाक्याभिव्यक्तिः, कर्मणः क्रमबोधः । | साङ्गमण्डपपूजाविधिः, वास्तुपूजाविधिश्च । | ८ |
| ४. | नक्षत्रप्रकरणे निर्धारितविषयाणाम् उपयोगाभिव्यक्तिः ।<br>संस्कारप्रकरणे प्रथमरजोदर्शनादि-नामकरणान्तानां विषयाणां तत्त्वावबोधः । प्रथमदन्तोद्गमफलादि-केशान्तसंस्कारान्तानां मुहूर्तानां ज्ञानम् अभिव्यक्तिश्च । | मुहूर्तचिन्तामणिः (नक्षत्रसंस्कारप्रकरणे) । | ८ |
| ५. | चितानिर्माणादि-शवसंस्कारान्त-विधिबोधः ।<br>अस्थिसंचयन-पाथेयश्राद्धयोः स्वरूपबोधः, सम्बद्धकर्मणः परापरकर्मबोधः, कर्मसम्बद्ध-मन्त्र-सङ्कल्पवाक्य-विशेषवाक्याना-मभिव्यक्तिः । | अन्त्यपद्धतिः (दाहसंस्कारादि-दशगात्रविधिः) । | ८ |

| | | | |
|---|---|---|---|
| | प्रथमदिनादि-दशमदिनान्त-कर्तव्यकर्मणां स्वरूपबोधः । | अन्त्यपद्धतिः (दाहसंस्कारादि-दशगात्रविधिः) । | ८ |
| ६. | एकादशाहकृत्येषु आद्यादि-कपिलादानान्तकर्मणः स्वरूपबोधः, सम्बद्धकर्मणः परापरकर्मबोधः, कर्मसम्बद्ध-मन्त्र-सङ्कल्पवाक्य-विशेषवाक्यानामभिव्यक्तिः । | अन्त्यपद्धतिप्रयोगविधिः । | १ |
| | आद्यमासिकश्राद्धप्रयोगादि-उदककुम्भदान-उनमासिकादि-पञ्चदशश्राद्धान्तकर्मणां विधिबोधः, सम्बद्धकर्मणः परापरकर्मबोधः, कर्मसम्बद्ध-मन्त्र-सङ्कल्पवाक्य-विशेषवाक्यानामभिव्यक्तिः । | अन्त्यपद्धतिप्रयोगविधिः । | १२ |
| | सपिण्डीकरणश्राद्ध-मासिकश्राद्ध-पञ्चकमरणकर्म-अस्थिक्षेपकर्मान्त-विधिबोधः, सम्बद्धकर्मणः परापरकर्मबोधः, कर्मसम्बद्ध-मन्त्र-सङ्कल्पवाक्य-विशेषवाक्याना-मभिव्यक्तिः । | अन्त्यपद्धतिप्रयोगविधिः । | ८ |
| **योगः** | | | **७५** |

**कक्षा १२**

| **क्र.सं.** | **विषयक्षेत्रगतस्वरूपम्** | **विषयक्षेत्रम्** | **अङ्कभारः** |
|---|---|---|---|
| १. | स्वशाखीयपरिशिष्टग्रन्थानां परिचयादि-सङ्कल्पोहविचारान्त-निर्धारितविषायाणां सिद्धान्तबोधाभिव्यक्तिः, विषयसम्बद्ध-प्रकरणतः प्रश्नोत्तरणम्, निर्दिष्टविषयव्याख्यानम् । | कर्मकाण्डसिद्धान्तज्ञानम् । | २+२ |
| | ऋत्विजां नियमादि-देवमन्दिरविचारान्तानां विषयाणां सिद्धान्तबोधाभिव्यक्तिः, स्वशाखीयपरम्परामहत्त्वप्रकाशनम्, विषयसम्बद्ध-प्रकरणतः प्रश्नोत्तरणम् । | कर्मकाण्डसिद्धान्तज्ञानम् । | ४ |
| २. | ध्वजापताकासहितमण्डपनिर्माणादि-पूर्वांगविधिज्ञानाभिव्यक्तिः, कर्मसम्बद्धमन्त्राणाम् अभिव्यक्तिः, विशेषसङ्कल्पवाक्यबोधः, हस्तक्रियाभिव्यक्तिः । | मूर्तिप्रतिष्ठाविधिः । | १+२ |
| | प्रतिष्ठासामग्रीज्ञानादि-कलशस्थापनक्रमान्तविधिबोधः, कर्मसम्बद्धमन्त्रप्रयोगज्ञानम्, ध्वजापताकासन्निवेशादि-वाहनस्थापनबोधः । | मूर्तिप्रतिष्ठाविधिः । | ४ |

| | | | |
|---|---|---|---|
| | देवस्नपनविधिज्ञानादि-जीर्णोद्धारविधिज्ञानान्तो विषयबोधः, सम्बद्धमन्त्रप्रयोगबोधः, कर्मणः परापरक्रमबोधः, सांगप्रतिष्ठाविधिबोधः । | मूर्तिप्रतिष्ठाविधिः । | ८ |
| ३. | अधोनिर्दिष्टशान्तिककर्म-प्रयोगविधिबोधः, कर्मसम्बद्ध-मन्त्रप्रयोगबोधः, कर्तृबोधः । मूलशान्तिः, अश्लेषाशान्तिः, कृष्णचतुर्दशीजननशान्तिः, काकविष्टापतनशान्तिः, | प्रचलितशान्तिककर्म । | ८ |
| | अधोनिर्दिष्टशान्तिककर्म-प्रयोगविधिबोधः, कर्मसम्बद्ध-मन्त्रप्रयोगबोधः, कर्तृबोधः । सहजननशान्तिः, गोमुखप्रसवविधिः, अर्कविवाहप्रयोगः, कुम्भविवाहः, विष्णुप्रतिमाविवाहः । | | |
| ४. | मुहूर्तचिन्तामणिगत-निर्धारितविषयाणां प्रयोगबोधः ।<br>वैधव्ययोगः, प्रथमापत्यविषयकविचारः, प्रश्न-लग्नक्षणविचारः, कन्यावरणमुहूर्तः, विवाहे वरवध्वोर्जन्मराशितो ग्रहशुद्धिप्रकारः, विवाहमासादिकम् ।<br>विवाहनक्षत्राणि, आद्यगर्भे द्विज्येष्ठ-त्रिज्येष्ठ-सहजादिविवाहे विशेषज्ञानम्, चूडाविवाहादौ पौर्वापर्यविचारः, मूलादिनक्षत्रजातयोर्वरवध्वोः श्वश्र्वादिपीडाविचारः, लताकर्तरीदोषौ तत्परिहारश्चेति । | मुहूर्तचिन्तामणिः<br>(विवाहलग्नादिकम्) । | १२ |
| ५. | निर्दिष्टप्रकरणबोधः, उपोद्घातप्रकरणम्, ब्रह्मचारिप्रकरणम्, विवाहप्रकरणम् । (तेषु प्रश्नोत्तरणम्, धर्मविषये महत्त्वकथनम्, ब्रह्मचारिधर्मविषये व्याख्यानम्, महत्त्वप्रकाशनम्, विवाहकर्मणः महत्त्वख्यापनम्, विवाहविषयकशास्त्रीयस्वरूपाभिव्यक्तिः) । | याज्ञवल्क्यस्मृतिः<br>(आचाराध्यायः) । | २+२ |
| | निर्दिष्टप्रकरणबोधः, वर्णजाति-गृहस्थधर्म-स्नातकधर्म-भक्ष्याभक्ष्यप्रकरणानि । (तेषु सम्बद्धविषयवस्तूनां विश्लेषणम्, व्यावहारिकप्रयोगविधिबोधः, गृहस्थधर्मविषयक-कर्तव्याकर्तव्यबोधः, स्नातकधर्मविषयक-व्याख्यानम् उपयोगश्च, भक्ष्याभक्ष्यप्रकरणव्याख्यानम्, जीवनोपयोगित्व-प्रकाशनम्) । | याज्ञवल्क्यस्मृतिः<br>(आचाराध्यायः) । | १२ |

| | | | |
|---|---|---|---|
| | द्रव्यशुद्धि-दान-श्राद्ध-ग्रहशान्तिप्रकरणानि । ( तेषु सम्बद्धविषयवस्तूनां विश्लेषणम्, सरलार्थप्रकाशनम्, व्यावहारिकप्रयोगविधिबोधः, द्रव्यशुद्धिदानविषयक-कर्तव्याकर्तव्यबोधः, श्राद्धविषयक-व्याख्यानम् उपयोगश्च, ग्रहशान्ति-प्रकरणव्याख्यानम्, प्रश्नोत्तरणञ्च) । | याज्ञवल्क्यस्मृतिः (आचाराध्यायः) । | १६ |
| **योगः** | | | **७५** |

# फलितज्योतिषम्

**कक्षा :** ११ र १२ **विषय सङ्केत :** [FAJ. 533] (**कक्षा** ११), [FAJ. 534] (**कक्षा** १२)

**पाठ्यघण्टा :** ५ **वार्षिक कार्यघण्टा :** १६०

१. **परिचयः**

फलितज्योतिषविषयस्य पाठ्यक्रमः फलग्रन्थाधारितविषयक्षेत्राणां सैद्धान्तिकानां व्यावहारिकाणां च पक्षाणां पठनपाठनयोरुद्देश्येन विकसितो वर्तते । एतदर्थं २०७६ विक्रमवर्षीयस्य राष्ट्रियपाठ्यक्रमप्रारूपस्य मार्गदर्शनानुसारेण विद्यालयशिक्षाया माध्यमिकरस्तरे (एकादश्यां द्वादश्याञ्च कक्षयोः) फलितज्योतिषविषयस्य एतस्मिन् पाठ्यक्रमे संहिता-जातक-प्रश्न-ताजिक-रमल-सामुद्रिक-शकुनादीनां शास्त्राणामाधारेण विषयवस्तूनां बोधो बुद्धविषयाणामभिव्यक्तिसामर्थ्यञ्च छात्रेषु स्यादिति हेतोर्बोधाभिव्यक्त्योरुल्लेखोऽपि विहितो विद्यते । एतस्माद् वर्तमानसन्दर्भे फलितज्योतिषमितोऽपि व्यावहारिकं निर्माय विद्यार्थिनां रुच्यकाङ्क्षे प्रपूर्य शिक्षाया राष्ट्रियोद्देश्यं प्राप्स्यते, एतस्य सान्दर्भिकतां विस्तार्य विधाय उपयुक्तता सुनिश्चिता च विधास्यते इत्यपेक्षितमस्ति । अनेन पाठ्यक्रमेण सम्बद्धविषये उच्चशिक्षाया आधारोऽपि निर्मास्यते इति चापेक्षितं वर्तते ।

मुहूर्त-जातक-शकुन-स्वप्न-विषयाणां समावेशः, विषयवस्तूनां बोधस्तद्विश्लेषणञ्च, सम्बद्धविषयवस्तूनां व्यावहारिकः प्रयोगः, निर्दिष्टसामुद्रिकविषयाणामाधारेण फलादेशः, ग्रहस्पष्टीकरण-पञ्चाङ्गनिर्माण ग्रहणगणनादिविषयाणां विमर्शः, स्तरानुरूपं पाठ्यवस्तूनां चयनम्, परम्परासम्बद्धधार्मिक-सांस्कृतिक-व्यावहारिकविषयाणां विमर्शनम्, निर्दिष्टज्योतिषसम्बद्धविषयाणां बोध-व्यावहारिकसामर्थ्यपरीक्षणपरं मूल्याङ्कनं चास्य पाठ्यक्रमस्य वैशिष्ट्यानि सन्ति । अतः सर्वलोकोपकारात् फलितज्योतिषात् फलादेशकरणे करणग्रन्थानां जातकग्रन्थानां संहिताशास्त्राणां सामुद्रिकशास्त्राणां ताजिकशास्त्राणाञ्चाध्ययनमपि परमावश्यकमिति-फलितज्योतिषाध्ययने समुत्सुकानां सर्वेषां छात्राणां कृत एष पाठ्यक्रमो महानुपयोगी भविष्यतीति आशास्यते ।

परिचयम्, स्तरगतसक्षमताम्, कक्षागतशिक्षणोपलब्धिम्, विषयवस्तुनः क्षेत्रक्रमौ, शिक्षणसहजीकरणप्रक्रियाम्, विद्यार्थिमूल्याङ्कनञ्च समाविश्य पाठ्यक्रमोऽसौ विकासं नीतः । एतस्मिन् क्रमे पाठ्यक्रमलेखनस्य विकासस्य च विषयगतौचित्यम्, पाठ्यक्रमे विद्यमाना मुख्यविशेषताः, पाठ्यक्रमस्य स्वरूपञ्च संयोज्य परिचयं, विषयगतरूपेणापेक्षितं ज्ञानम्, शिल्पम्, अभिवृत्तिम्, मूल्यञ्च, कार्यतत्परतां संयोज्य एतस्याः क्रियात्मकस्वरूपे सक्षमताम्, शिक्षणस्य स्तरम्, सक्षमताया विशिष्टीकृतविस्तृतीकरणेन शिक्षणोपलब्धिम्, सक्षमताम्, पूर्वकक्षाभिस्सह लम्बीयसन्तुलनस्याधारे विषयवस्तुनो क्षेत्रक्रमौ च, विषयगतविशिष्टतामौलिकते संयोज्य शिक्षणसहजीकरणस्य विधिम्, प्रक्रियाञ्च, निर्माणात्मकनिर्णयात्मकमूल्याङ्कनयोर्विधिं प्रक्रियाञ्चोल्लिख्य विद्यार्थिमूल्याङ्कनं व्यवस्थितं वर्तते ।

२. **स्तरगतयोग्यताः**

**माध्यमिकस्तरे ११-१२ कक्षयोः फलितज्योतिषविषयमधीत्य विद्यार्थिनो निर्दिष्टविषयेषु क्षमा भविष्यन्ति-**

१. सामान्यव्यवहारे प्रयोज्यमानानां कर्मणां शुभमुहूर्तनिर्धारणे

२. गणितागतानां सूर्यादिग्रहाणां वेधप्राप्तग्रहस्थित्याधारेण विश्लेषणे तदाधारे फलादेशे च

३. स्तरीयजन्मपत्रिकां निर्माय जातकशास्त्रोक्तविधिना तस्य शुभाशुभफलविवेचने

४. निर्दिष्टशुभाशुभशकुनेन स्वप्नाधारेण च फलकथने

५. ग्रहस्पष्टीकरणे पञ्चाङ्गनिर्माणे दिग्देशकालसाधने चन्द्रसूर्यग्रहणानयने ग्रहाणामुदयास्तसाधने

६. होराशास्त्रप्रतिपादितसिद्धान्तानुसारेण जातकफलाभिव्यक्तीकरणे

७. विशेषरूपेण सन्दर्भविषयाणामवबोधने निर्दिष्टविषयाणामभिव्यक्तीकरणे च

३. **कक्षागतशिक्षणोपलब्धयः**

**कक्षा ११**

**माध्यमिकस्तरीयायां ११ कक्षायां फलितज्योतिषविषयमधीत्य छात्रा अधो निर्दिष्टविषयेषु क्षमा भविष्यन्ति –**

१. शुभाशुभमुहूर्तज्ञाने, व्यावहारिकप्रयोगे, ग्राह्याग्राह्यसमयसमीक्षणे च

२. व्यावहारिकविषयाणां मुहूर्तनिर्धारणे तत्प्रयोगे

३. विशिष्टजन्मपत्रिकानिर्माणे

४. शकुनाधारेण शुभाशुभफलवर्णने

५. स्वप्नशास्त्रनिर्दिष्टविधिना शुभाशुभस्वप्नाधारेण शुभाशुभफलवर्णने

६. जन्मपत्रिकाधारेण जातकस्य शुभाशुभफलकथने

७. जन्मपत्रिकाधारेण भावफल-दशाफल-गोचरफलवर्णने

८. ग्रहयोगानुरूपफलवर्णने अशुभफलशान्त्यर्थं ग्रहशान्तिविधिकथने

**कक्षा १२**

**माध्यमिकस्तरीयायां १२ कक्षायां फलितज्योतिषविषयमधीत्य छात्रा अधो निर्दिष्टविषयेषु क्षमा भविष्यन्ति –**

१. कलेर्गताब्दानयनेऽहर्गणानयने

२. ग्रहाणां ध्रुव-क्षेपसाधने

३. अहर्गणोत्पन्नमध्यमग्रहसाधने

४. ग्रहाणां मध्यमगतिज्ञाने मध्यमस्पष्टग्रहसाधने च

५. देशान्तरसंस्कारविधाने

६. ताराग्रहाणां वक्रमार्गोदयास्तसाधने

७. दिग्देशकालसाधने, चन्द्रसूर्यग्रहणपरिज्ञाने, तत्परीक्षणे च

८. होराशास्त्रोक्तविधिना जातकस्य शुभाशुभफलकथने

९. सामुद्रिकशास्त्रोक्तविधिना अङ्गलक्षणाधारेण कररेखाभिश्च शुभाशुभफलवर्णने

४. **विषयक्षेत्रं क्रमश्च**

**कक्षा ११**

| **क्र.सं.** | **विषयक्षेत्राणि वा प्रकरणानि** | **विषयवस्तूनि** | **बोधः** | **प्रयोगः** | **पाठ्य घण्टाः** |
|---|---|---|---|---|---|
| १ | मुहूर्तपरक-व्यावहारिक-विषयाः | तिथिस्वामिनः<br>तिथीनां नन्दादिसंज्ञा, शुभाशुभत्वं सिद्धियोगश्च<br>आनन्दादियोगगणनाप्रकारस्तत् प्रयोगश्च<br>रवियोगः<br>सर्वार्थसिद्धियोगः<br>ग्रहणनक्षत्रफलम्<br>कुलिक-कालवेला-यमघण्ट-कण्टकयोगाः | पञ्चाङ्गज्ञानं तन्निर्देशश्च<br>मुहूर्तसम्बद्ध-तथ्यादिनिर्धारणम्<br>त्याज्यात्याज्यविषय-विश्लेषणम् | प्रचलितपञ्चाङ्गाधारेण ग्राह्यतिथिनक्षत्रादि-चयनम्<br>सम्बद्धमुहूर्तनिर्धारणम्<br>निर्धारितमुहूर्तस्य ग्रहस्थितिविश्लेषम्<br>लग्ननवमांशाभ्यां समयनिर्धारणं तदुल्लेखश्च | २५ |

| | | | | | |
|---|---|---|---|---|---|
| | | भद्राज्ञानम्, तद्वासविचारः परिहारश्च<br>कालाशुद्धौ वर्ज्यकर्माणि<br>प्रयोजनसहिता कालहोरा<br>मन्वादि-युगादितिथयः<br>रत्नधारणमुहूर्तः<br>क्रयविक्रयमुहूर्तः<br>अग्निवासविचारः<br>द्विपुष्कर-त्रिपुष्करयोगलक्षणं तत्फलञ्च<br>सन्तानोत्पत्तावशुभसमयाः<br>राश्यनुसारेण ग्रहणफलम्<br>तारानामानि फलानि च<br>गृहारम्भे पञ्चाङ्गशुद्धिः<br>राहुमुखज्ञानं तत्फलञ्च<br>मुख्यगृहात् स्नानादीनां व्यवस्था<br>गृहारम्भे लग्नस्थग्रहस्थितिवशात् फलानि<br>गृहप्रवेशमुहूर्तः<br>वास्तुशान्तिविधिस्तथा तल्लग्नशुद्धिश्च<br>ग्रामरविविचारः | | | |
| २ | गोचरफला-देशो गोचरानु-सारेणाशुभ-ग्रहाणां शान्तिविधिश्च | गोचरफलादेशपद्धतिः<br>गोचरपद्धतौ ग्रहवेधस्थानानि<br>गोचरानुसारेण सूर्यादिग्रहाणां शुभाशुभस्थानानि<br>जन्मराशितो लग्नादिद्वादशस्थानस्थितानां सूर्य-चन्द्र-भौम-बुध-गुरु-शुक्र-शनि-राहु-केतूनां फलानि<br>सूर्यादिग्रहाणां गन्तव्यराशेः प्राक्फलदानकालः<br>गोचरजनितफलदानकालदर्शनं तथा प्रतिमासं वारभेदेन जन्मनक्षत्रजन्यफलञ्च<br>गोचरानुसारेणाशुभग्रहाणां शान्तिकर्माणि<br>ग्रहाणां स्तोत्रपाठः<br>ग्रहाणां मन्त्रजपः<br>ग्रहाणां द्रव्यहोमः | गोचरपद्धतिज्ञानम्<br>ग्रहवेधज्ञानम्<br>सूर्यादिग्रहाणां शुभस्थान-वेधस्थानज्ञानम्<br>सूर्यादिग्रहाणां गोचरफलज्ञानम्<br>सूर्यादिग्रहाणां गन्तव्यराशेः प्राक्फलदानकाल-ज्ञानम्<br>द्वादशराशिषु गोचरजनितफल-दानकालदर्शनं तथा प्रतिमासवारभेदेन जन्मनक्षत्रजन्य-फलज्ञानम्<br>गोचरानुसारेणाशुभ-ग्रहाणां शान्ति-कर्मज्ञानम्<br>ग्रहसम्बद्धस्तोत्र-मन्त्र-हवनीयद्रव्य-रत्नानां ज्ञानम्<br>– ग्रहाणां सम्बद्धरत्नधारणेऽशक्तजनानां | गोचरपद्धतिकथनम्<br>ग्रहवेधविवेचनम्<br>सूर्यादिग्रहाणां शुभस्थान-वेधस्थानविश्लेषणम्<br>सूर्यादिग्रहाणां गोचरफलवर्णनम्<br>सूर्यादिग्रहाणां गन्तव्यराशेः प्राक्फल-दानकालनिरूपणम्<br>द्वादशराशिषु गोचर-जनितफलकालदर्शनं तथा प्रतिमासवारभेदेन जन्मनक्षत्रजन्यफल-वर्णनम्<br>गोचरानुसारेणाशुभग्रहाणां शान्तिविधिवर्णनम्<br>ग्रहसम्बद्धस्तोत्र-मन्त्र-हवनीयद्रव्य-रत्नकथनम्<br>ग्रहाणां सम्बद्धरत्न-धारणेऽशक्तजनानां कृते वैकल्पिकव्यवस्थावर्णनम् | ३० |

| | | | | | |
|---|---|---|---|---|---|
| | | ग्रहाणां रत्नधारणम्<br>ग्रहाणां पृथग्रत्नानि<br>ग्रहाणां सम्बद्धरत्नधारणेऽशक्तजनानां कृतेऽल्पमूल्यानि रत्नानि औषधयः ग्रहौषधिस्नानविधिश्च | कृते वैकल्पिकव्यवस्था परिज्ञानम् | | |
| ३ | विशेषजन्म-पत्रिका तदनुरूप-फलादेशश्च | चरबेलान्तरकिरणवक्रीभवनप्रामाणिक- समयान्तर-संस्कारसहितयो नेपालदेशान्यदेशयो-र्विविधस्थानानाञ्च सूर्योदयः<br>स्वदेशीयमन्यदेशीयञ्च पञ्चाङ्गम्<br>क्षत्रनामसाधनम्<br>स्वदेशान्यदेशयोस्तात्कालिकग्रहाः<br>विविधस्थानस्य कृते लग्नम्<br>ग्रहाणां स्थितिवशाद् तेषां बाल्याद्यवस्था<br>राशिस्थितिवशाद् ग्रहाणामुच्चनीचवक्रमार्गावस्थाः<br>शमलग्नं ससन्धिद्वादशभावाश्च<br>भुक्तोन-विंशोत्तरी-त्रिभागी-योगिनीदशाः<br>न्मपत्रिकां निर्माय तदाधारे<br>ामान्यफलादेशश्च<br>सूर्यादिग्रहाणां लग्नादिद्वादशभावफलम्<br>षड्वर्गभावकुण्डलीषु ग्रहस्थितिवशात्<br>वशेषफलवर्णनम्<br>विंशोत्तरी-योगिनी-दशाधारेण फलादेशः<br>अश्लेषावृक्षस्य शाखा तज्जन्मफलञ्च<br>व्रतपत्रिका विवाहपत्रिका च | प्रामाणिक-स्थानीय-समयान्तरज्ञानम्<br>पञ्चाङ्गपरिवर्तन-ज्ञानम्<br>नक्षत्रनामाद्याक्षरज्ञानम्<br>स्पष्टग्रहसाधनप्रक्रिया-ज्ञानम्<br>लग्नसाधनप्रक्रिया-ज्ञानम्<br>ग्रहाणां बाल्याद्यावस्था-ज्ञानम्<br>नक्षत्रदशासाधनप्रक्रिया-ज्ञानम्<br>जन्मपत्रिकानिर्माण-ज्ञानम्<br>गण्डनक्षत्रज्ञानम्<br>व्रतबन्ध-विवाहलग्नानां ग्रहस्थित्यनुरूपफलवर्णन परिज्ञानम्, अश्लेषावृक्षस्य स्वरूपादीनां क्षेत्राणां च ज्ञानम् | प्रामाणिक-स्थानीय-समयान्तरसाधनम्<br>पञ्चाङ्गपरिवर्तनम्<br>नक्षत्रनामाद्याक्षर-साधनम्<br>स्पष्टग्रहसाधनम्<br>लग्नसाधनम्<br>ग्रहाणां बाल्याद्या-वस्थाकथनम्<br>नक्षत्रदशासाधनम्<br>जन्मपत्रिकानिर्माणम्<br>गण्डनक्षत्रजन्मफल-कथनम्<br>व्रतबन्ध-विवाहयोर्लग्न-पत्रिकालेखनम् | २५ |
| ४ | जातक-फलादेशः | वराहप्रणीतलघुजातकस्य वैशिष्ट्यम्<br>कालपुरुषस्याङ्गविभागः<br>राशीनां वर्णाः, पुरुषादिसंज्ञाः, द्विपदादिसंज्ञाश्च<br>राशिबलम्<br>द्वादशभावानां संज्ञाः, | लघुजातकस्य वैशिष्ट्यज्ञानम्<br>कालपुरुषस्याङ्ग-विभागज्ञानम्<br>राशीनां वर्णपुरुष-द्विपदादिसंज्ञाज्ञानम्<br>राशिबलज्ञानम्<br>द्वादशभावानां | लघुजातकस्य वैशिष्ट्यवर्णनम्<br>कालपुरुषस्याङ्गविभाग-कथनम्<br>राशीनां वर्णपुरुष-द्विपदादिसंज्ञाकथनम्<br>राशिबलकथनम्<br>द्वादशभावानां तन्वादिविविधसंज्ञा-कथनम् | २५ |

| | | | | | |
|---|---|---|---|---|---|
| | | संज्ञान्तराणि च<br>राशीनां शीर्षोदयादिसंज्ञाः, दिन-रात्रिबलञ्च<br>कालपुरुषस्यात्मादिविभागस्तेषां शुभाशुभत्वञ्च<br>ग्रहाणां राजत्वाद्यधिकारः, दिशः, पुरुषादिसंज्ञाः, वर्णाधिपत्यम्, षड्बलानि, दृष्टिः, तात्कालिकनैसर्गिक-मित्रामित्राणि, अधिमित्रादिविचारः, स्वरूपञ्च<br>९. ग्रहस्वरूपप्रयोजनम् | तन्वादिविविधसंज्ञा-ज्ञानम्<br>राशीनां शीर्षो-दयादिसंज्ञाज्ञानम्<br>ग्रहस्वरूपप्रयोजन-परिज्ञानम् | राशीनां शीर्षो-दयादिसंज्ञाकथनम्<br>ग्रहस्वरूपप्रयोजनकथनम् | |
| ५ | शकुनशास्त्रं स्वप्नशास्त्रञ्च | शकुनशास्त्रपरिचयः<br>शकुनप्रयोजनम्<br>शकुनभेदाः<br>शकुनविचारे प्रमुखकेन्द्रम्<br>शुभशकुनानि<br>अशुभशकुनानि<br>यात्रायामशुभशकुने दृष्टे सतीतिकर्तव्यता<br>स्वप्नशास्त्रस्य परिचयः<br>शुभस्वप्नानि<br>अशुभस्वप्नानि<br>अशुभस्वप्ने दृष्टे सतीतिकर्तव्यता | शकुनशास्त्र-परम्पराज्ञानम्<br>शकुनशास्त्रस्य प्रयोजनज्ञानम्<br>शकुनभेदज्ञानम्<br>शकुनविचारे अवस्थानुसारेण प्रमुखकेन्द्रज्ञानम्<br>शुभशकुनज्ञानम्<br>अशुभशकुनज्ञानम्<br>यात्रायामशुभशकुने दृष्टे सतीतिकर्तव्य-ज्ञानम्<br>स्वप्नशास्त्रज्ञानम्<br>शुभस्वप्नज्ञानम्<br>अशुभस्वप्नज्ञानम्<br>अशुभस्वप्ने दृष्टे सतीतिकर्तव्यज्ञानम् | शकुनशास्त्रपरम्परा-निदर्शनम्<br>शकुनशास्त्रस्य प्रयोजनकथनम्<br>शकुनभेदविवेचनम्<br>शकुनविचारे अवस्थानुसारेण प्रमुखकेन्द्रकथनम्<br>शुभशकुनवर्णनम्<br>अशुभशकुनवर्णनम्<br>यात्रायामशुभशकुने दृष्टे सतीतिकर्तव्यकथनम्<br>शुभाशुभस्वप्न-विश्लेषणम्<br>अशुभस्वप्नादौ शान्तिविधिकथनम् | १५ |
| सैद्धान्तिकाभ्यासः | | | | | १२० |
| प्रयोगात्मकाभ्यासः | | | | | ४० |
| योगः | | | | | १६० |

कक्षा १२

| क्र.सं. | विषयक्षेत्राणि वा प्रकरणानि | विषयवस्तूनि | बोधः | प्रयोगः | पाठ्य घण्टाः |
|---|---|---|---|---|---|
| १ | ध्रुवादि-प्रकरणम् | भस्वतीग्रन्थस्थकृष्णस्तुतिर्ग्रन्थसमयः, गतकलिवर्षाणि, विक्रमवर्ष-शकाब्दसाधनम्, सूर्यध्रुवबीजसाधनम्, चन्द्रचन्द्रकेन्द्रध्रुव–बीजसाधनम्, राहुध्रुवविधिः, देशान्तरसाधनम्, वर्षमासाधिपसाधनम्, भौमध्रुवबीजसाधनम्, बुधोच्चध्रुव-बीजसाधनम्, गुरुध्रुव-बीजसाधनम्, शुक्रोच्चध्रुव-बीजसाधनम्, मध्यमशनिध्रुव-बीजसाधनम्, अहर्गण-साधनम्, सूर्यस्पष्टीकरणम्, सूर्यखण्डाङ्काः, सूर्यगतिस्पष्टविधिः, मध्यमचन्द्र–चन्द्रकेन्द्र–स्पष्टचन्द्र-साधनम्, चन्द्रखण्डाङ्काः, स्पष्टचन्द्रगतिसाधनम्, तिथि-नक्षत्र-योग- करणानां साधनम्, तात्कालिकपञ्चाङ्गम्, सङ्क्रान्तिः, मध्यमभौमबुधशीघ्रगुरुशुक्रशीघ्रशनयः, बुधशुक्रयोर्मध्यमभौमगुरुशनीनां शीघ्रविधिः, स्पष्टपञ्चतारासाधनम्, शीघ्रखण्डाङ्काः, राहुकेतुस्पष्टीकरणम्, मध्य–शीघ्र–मन्द–स्पष्ट–वक्र–मार्गगतिसाधनम्, पञ्चताराग्रहाणां वक्रमार्गदिनादिकम्, ग्रहाणामस्तोदयांशाः, अगस्त्योदयश्च | – कृष्णस्तुतिर्ग्रन्थसमयज्ञानम्<br>– गतकलिवर्षज्ञानम्<br>– विक्रमवर्ष-शकाब्दसाधनज्ञानम्<br>– सूर्यध्रुव–बीजसाधनज्ञानम्<br>– चन्द्र-चन्द्रकेन्द्रध्रुवबीजसाधन-ज्ञानम्<br>– राहुध्रुवज्ञानम्<br>– देशान्तरसाधनज्ञानम्<br>– वर्षमासाधिपसाधनज्ञानम्<br>– भौमध्रुव-बीजसाधनज्ञानम्<br>– बुधोच्चध्रुव-बीजसाधनज्ञानम्<br>– गुरुध्रुव-बीजसाधनज्ञानम्–शुक्रोच्चध्रुव-बीजसाधनज्ञानम्<br>– मध्यमशनिध्रुव-बीजसाधनज्ञानम्<br>– अहर्गणसाधनज्ञानम्<br>– सूर्यस्पष्टीकरणज्ञानम्<br>– सूर्यखण्डांकाववोधः<br>– सूर्यगतिस्पष्टीकरणज्ञानम्<br>– मध्यमचन्द्र–चन्द्रकेन्द्रस्पष्टचन्द्र-साधनज्ञानम्<br>– चन्द्रखण्डांकाववोधः<br>– स्पष्टचन्द्रगतिसाधनपरिज्ञानम्<br>– तिथि-नक्षत्र-योग-करणज्ञानम्<br>– तात्कालिकपञ्चाङ्गज्ञानम्<br>– संक्रान्तिज्ञानम्<br>– मध्यमभौमबुधशीघ्रगुरुशुक्रशीघ्र-शनिज्ञानम्<br>– बुधशुक्रयोर्मध्यमभौमगुरुशनीनां च शीघ्रविधिज्ञानम्<br>– स्पष्टपञ्चतारासाधनज्ञानम् | – कृष्णस्तुतिर्ग्रन्थसमय-कथनञ्च<br>– गतकलिवर्ष-विक्रमवर्ष-शकाब्दकथनम्<br>– सूर्यध्रुव–बीजसाधनम्<br>– चन्द्र-चन्द्रकेन्द्रध्रुव-बीजसाधनम्<br>– राहुध्रुवविधिकथनम्<br>– देशान्तरसाधनम्<br>– वर्षमासाधिपसाधनम्<br>– भौमध्रुव-बीजसाधनम्<br>– बुधोच्चध्रुव-बीजसाधनम्<br>– गुरुध्रुव-बीजसाधनम्<br>– शुक्रोच्चध्रुव-बीजसाधनम्<br>– मध्यमशनिध्रुव-बीजसाधनम्<br>– अहर्गणसाधनम्<br>– सूर्यस्पष्टीकरणम्<br>– सूर्यखण्डाङ्ककथनम्<br>– सूर्यगतिस्पष्टविधिवर्णनम्<br>– मध्यमचन्द्र-चन्द्रकेन्द्र-स्पष्टचन्द्रसाधनम्<br>– चन्द्रखण्डांककथनम्<br>– स्पष्टचन्द्रगतिसाधनम्<br>– तिथि–नक्षत्र–योग–करणसाधनम्<br>– तात्कालिकपञ्चांग-साधनम्<br>– संक्रान्तिसाधनम्<br>– मध्यमभौमबुधशीघ्रगुरु-शुक्रशीघ्रशनिसाधनम्<br>– बुधशुक्रयोर्मध्यमभौमगुरुशनीनां शीघ्रविधिवर्णनम्<br>– स्पष्टपञ्चताराग्रहसाधनम्<br>– शीघ्रखण्डांककथनम्<br>– राहुकेतुस्पष्टीकरणम्<br>– ग्रहाणां मध्यशीघ्रमन्दस्पष्टवक्र–मार्गगतिसाधनम् | ३० |

| | | | | | |
|---|---|---|---|---|---|
| | | | – शीघ्रखण्डांकज्ञानम्<br>– राहुकेतुस्पष्टीकरणज्ञानम्<br>– मध्यशीघ्रमन्दस्पष्टवक्रमार्ग गति-साधनज्ञानम्<br>– पञ्चताराणां वक्रमार्गदिनादि-ज्ञानम्<br>– ग्रहाणामस्तोदयांशज्ञानम्<br>– अगस्त्योदयज्ञानम् | – पञ्चताराणां वक्रमार्गदिनादिवर्णनम्<br>– ग्रहाणामस्तोदयांशकथनम्<br>– अगस्त्योदयकथनम् | |
| २ | त्रिप्रश्नचन्द्र-सूर्यग्रहण-परिलेखादि-प्रकरणम् | अयनांशसाधनम्, चरसाधनम्, दिनरात्रिमानम्, नतसाधनं, छायासाधनम्, शंकुसाधनम्, गतैष्यघटिकानयनम्, प्रकारान्तरेण छायानयनम्, स्पष्टलग्नसाधनम्, चरखण्डसाधनम्, लंकोदयमानात्स्वदेशोदय-मानसाधनम्, स्पष्टशरानयनम्, ग्राससाधनम्, स्थित्यर्धस्पर्शमध्यमोक्षकालसाधनम्, शर-साधनम्, नतानयनम्, वलनानयनम्, लम्बनानयनम्, नतिसाधनम्, नतिलम्बनयोः संस्कारः, स्थितिसाधनम्, शरादेरंगुलादिमान-साधनम्, वलनदानम्, चन्द्रसूर्ययोर्मानाङ्गुल-स्पष्टीकरणम्, ग्रन्थनिर्माणकालश्च | – अयनांशसाधनज्ञानम्<br>– चरसाधनज्ञानम्<br>– दिनरात्रिमान-नतसाधनज्ञानम्<br>– छायासाधनज्ञानम्<br>– शङ्कुसाधनज्ञानम्<br>– गतैष्यघटिकानयनज्ञानम्<br>– प्रकारान्तरेण छायानयनज्ञानम्<br>– स्पष्टलग्नसाधनज्ञानम्<br>– चरखण्डसाधनज्ञानम्<br>– लंकोदयमानात्स्वदेशोदयमान-साधनज्ञानम्<br>– स्पष्टशरानयनज्ञानम्<br>– ग्राससाधनज्ञानम्<br>– स्थित्यर्धस्पर्शमध्यमोक्षकाल-साधनज्ञानम्<br>– शरकृतिसाधनज्ञानम्<br>– नतानयनज्ञानम्<br>– वलनानयनज्ञानम्<br>– लम्बनानयनज्ञानम्<br>– नतिसाधनज्ञानम्<br>– नतिलम्बनयोः संस्कारज्ञानम्<br>– स्थितिसाधनज्ञानम्<br>– शरादेरंगुलादिमानसाधनज्ञानम्<br>– वलनदानम्<br>– चन्द्रसूर्ययोर्मानांगुलस्पष्टीकरण-ज्ञानम्<br>– ग्रन्थनिर्माणकालज्ञानम् | – अयनांशकथनम्<br>– चरसाधनम्<br>– दिनरात्रिमाननतसाधनम्<br>– छायासाधनम्<br>– शंकुसाधनम्<br>– गतैष्यघटिकानयनम्<br>– प्रकारान्तरेण छायानयनम्<br>– स्पष्टलग्न-चरखण्डसाधनम्<br>– लंकोदयमानात्स्वदेशोदय-मानसाधनम्<br>– स्पष्टशर-ग्राससाधनम्<br>– स्थित्यर्ध-स्पर्श-मध्य-मोक्षकालसाधनम्<br>– शरकृतिसाधनम्<br>– नतानयनम्<br>– वलन-लम्बनानयनम्<br>– नतिसाधनम्<br>– नतिलम्बनयोः संस्कारः<br>– स्थितिसाधनम्<br>– शरादेरंगुलमानसाधनम्<br>– वलनदानम्<br>– चन्द्रसूर्ययोर्मानांगुलस्पष्टी-करणम् | ३० |
| ३ | होराशास्त्रोक्त - | १. बालारिष्टयोगाः | – बालारिष्टज्ञानम् | – बालारिष्टकथनम् | २५ |

| | | | | | |
|---|---|---|---|---|---|
| | फलादेशः | २. अरिष्टभङ्गयोगाः<br>३. चान्द्रयोगानां लक्षणानि फलानि च<br>४. द्विग्रहयोगफलम्<br>५. प्रव्रज्यायोगास्तत्फलानि च<br>६. चरादिराशिस्थचन्द्रफलम्<br>७. लग्नगतचन्द्रफलम्<br>८. लग्नगतसूर्यफलम्<br>९. नवमांशफलम्<br>१०. स्वक्षेत्रगतग्रहफलम्<br>११. उच्चगतग्रहफलम्<br>१२. नीच-शत्रुगृहगतग्रहफलम्<br>१३. राजयोगः<br>१४. नाभसयोगानां लक्षणानि फलानि च<br>१५. स्त्रीणामाकाररूपशीलादिज्ञानम्<br>१६. विधवा-पतित्यक्ता-कुलटा-ब्रह्मवादिनीस्त्रीणां लक्षणानि फलानि च<br>१७. मृत्युकारणम्, मृत्युस्थानम्, देवलोकादिगति-र्मोक्षस्थितिश्च | – अरिष्टभङ्गज्ञानम्<br>– चान्द्रयोगानां लक्षणफलज्ञानम्<br>– द्विग्रहयोगफलज्ञानम्<br>– प्रव्रज्यायोगास्तत्फलज्ञानम्<br>– चरादिराशिस्थचन्द्रफलज्ञानम्<br>– लग्नगतचन्द्रफलज्ञानम्<br>– लग्नगतसूर्यफलज्ञानम्<br>– नवमांशफलज्ञानम्<br>– स्वक्षेत्रगतग्रहफलज्ञानम्<br>– उच्चगतग्रहफलज्ञानम्<br>– नीचशत्रुगतग्रहफलज्ञानम्<br>– राजयोगज्ञानम्<br>– नाभसयोगानां लक्षणफलज्ञानम्<br>– स्त्रीणामाकाररूपशीलादिज्ञानम्<br>– विधवा-पतित्यक्ता-कुलटा-ब्रह्मवादिनीस्त्रीणां लक्षणफलज्ञानम्<br>– मृत्युकारणस्थानदेवलोकादिगति-र्मोक्षस्थितिज्ञानञ्च | – अरिष्टभङ्गवर्णनम्<br>– चान्द्रयोगानां लक्षणफलकथनम्<br>– द्विग्रहयोगफलवर्णनम्<br>– प्रव्रज्यायोगास्तत्फलानि च<br>– चरादिराशिस्थचन्द्रफल-वर्णनम्<br>– लग्नगतचन्द्रफलकथनम्<br>– लग्नगतसूर्यफलकथनम्<br>– नवमांशफलवर्णनम्<br>– स्वक्षेत्रगतग्रहफलवर्णनम्<br>– उच्चगतग्रहफल-वर्णनम्<br>– नीचशत्रुगतग्रहफल-वर्णनम्<br>– राजयोगवर्णनम्<br>– नाभसयोगानां लक्षणफलवर्णनम्<br>– स्त्रीणामाकाररूपशीलादि-कथनम्<br>– विधवा-पतित्यक्ता-कुलटा-ब्रह्मवादिनीस्त्रीणां लक्षणफलवर्णनम्<br>– मृत्युकारणस्थानदेवलोका-दिगतिर्मोक्षस्थितिवर्णनम् | |
| ४ | जातकोक्त-फलादेशः | १. ग्रहाणां स्थानवस्त्रद्रव्यर्तुप्रभुत्वम्<br>२. अश्विन्यादिनक्षत्रेषु जातानां स्वरूपम्<br>३. मेषादिराशिषु जातानां स्वरूपम्<br>४. मेषादिराशिस्थानां सूर्यादिग्रहाणां फलानि<br>५. सप्रयोजनं ग्रहाणां परस्परं कारकलक्षणम्<br>६. पत्नीपुत्रहीनजन्मयोगः<br>७. असुतकलत्रबन्ध्यापतिजन्मयोगः | – ग्रहाणां स्थानवस्त्रद्रव्यर्तु-प्रभुत्वज्ञानम्<br>– अश्विन्यादिनक्षत्रेषु जातानां स्वरूपज्ञानम्<br>– मेषादिराशिषु जातानां स्वरूपज्ञानम्<br>– मेषादिराशिस्थानां सूर्यादिग्रहाणां फलज्ञानम्<br>– सप्रयोजनं ग्रहाणां परस्परं कारकलक्षणज्ञानम्<br>– पत्नीपुत्रहीनजन्मयोगज्ञानम्<br>– असुतकलत्रबन्ध्यापतिजन्मयोग-ज्ञानम् | – ग्रहाणां स्थानवस्त्र-द्रव्यर्तुप्रभुत्ववर्णनम्<br>– अश्विन्यादिनक्षत्रेषु जातानां स्वरूपकथनम्<br>– मेषादिराशिषु जातानां स्वरूपवर्णनम्<br>– मेषादिराशिस्थानां सूर्यादिग्रहाणां पृथक् पृथक् फलवर्णनम्<br>– सप्रयोजनं ग्रहाणां परस्परं कारकलक्षण-वर्णनम्<br>– पत्नीपुत्रहीनजन्मयोग-कथनम्<br>– असुतकलत्रबन्ध्यापति- | १५ |

| | | | | | |
|---|---|---|---|---|---|
| | | ८. नष्टजातकस्य वर्षायनर्तुमासराशिलग्नानि<br>९. मरणयोगः | – नष्टजातकस्य वर्षायनर्तुमासराशि-लग्नज्ञानम्<br>– मृत्युयोगज्ञानम् | जन्मयोगकथनम्<br>– नष्टजातके वर्षायनर्तु-मासराशिलग्नकथनम्<br>मृत्युयोगवर्णनम् | |
| ५ | सामुद्रिक-फलादेशः | १. सामुद्रिकशास्त्रस्य परिचयः<br>२. अष्टौ प्रमुखाङ्गान्युपाङ्गानि च<br>३. रोमावलिलक्षणम्<br>४. उदरावलिलक्षणम्<br>५. ललाटलक्षणम्<br>६. भालरेखालक्षणम्<br>७. सप्तसारास्तत्फलादेशश्च<br>८. द्वात्रिंशल्लक्षणानि<br>९. धन्यपुरुषलक्षणम्<br>१०. उन्मानाधारेण पुरुषाणां लक्षणानि<br>११. मानाधारेण पुरुषाणां लक्षणानि<br>१२. स्वराधारेणपुरुषाणां शुभाशुभविचारः<br>१३. हस्तरेखाधारेणस्त्रीणां शुभाशुभलक्षणम्<br>१४. पद्मिनीस्त्रीलक्षणम्<br>१५. हस्तिनीस्त्रीलक्षणम्<br>१६. शङ्खिनीस्त्रीलक्षणम्<br>१७. चित्रिणीस्त्रीलक्षणम्<br>१८. नामाधारेण स्त्रीणां शुभाशुभलक्षणम्<br>१९. आवर्ताधारेण स्त्रीणां शुभाशुभलक्षणम्<br>२०. गत्याधारेण स्त्रीणां शुभाशुभलक्षणम्<br>२१. छायाधारेण स्त्रीणां शुभाशुभलक्षणम् | – सामुद्रिकशास्त्रस्योत्पत्तिपरम्परा-ज्ञानम्<br>– प्रमुखाङ्गोपाङ्गज्ञानम्<br>– रोमावलिलक्षणज्ञानम्<br>– ललाटलक्षणज्ञानम्<br>– भालरेखालक्षणज्ञानम्<br>– सप्तसारज्ञानम्<br>– द्वात्रिंशल्लक्षणज्ञानम्<br>– धन्यपुरुषलक्षणज्ञानम्<br>– उन्मानाधारेणपुरुषाणां लक्षणज्ञानम्<br>– मानाधारेण पुरुषाणां लक्षणज्ञानम्<br>– स्वराधारेण पुरुषाणां शुभाशुभज्ञानम्<br>– हस्तरेखाधारेण स्त्रीपुरुषयोः शुभाशुभलक्षणज्ञानम्<br>– पद्मिनी-हस्तिनी-शङ्खिनी-चित्रीणी-स्त्री-लक्षणज्ञानम्<br>– नामाधारेण, आवर्ताधारेण, गत्याधारेण, छायाधारेण च स्त्रीणां शुभाशुभलक्षणज्ञानम् | – सामुद्रिकशास्त्रस्योत्पत्ति-परम्पराकथनम्<br>– प्रमुखाङ्गोपाङ्गकथनम्<br>– रोमावलि-ललाट-भालरेखालक्षणं तत्फलवर्णनञ्च<br>– सप्तसारानुसारेणफल-कथनम्<br>– द्वात्रिंशल्लक्षणवर्णनम्<br>– धन्यपुरुषलक्षणकथनम्<br>– उन्मानाधारेण, मानाधारेण, स्वराधारेण च पुरुषाणां फलवर्णनम्<br>– हस्तरेखाधारेण स्त्रीपुरुषयोः शुभाशुभलक्षणवर्णनम्<br>– पद्मिनी-हस्तिनी-शङ्खिनी-चित्रीणी-स्त्री-लक्षणवर्णनम्<br>– नामाधारेणावर्ताधारेण, गत्याधारेण, छायाधारेण च स्त्रीणां शुभाशुभ-लक्षणज्ञानम् | २० |
| सैद्धान्तिकाभ्यासः | | | | | १२० |
| प्रयोगात्मकाभ्यासः | | | | | ४० |
| योगः | | | | | १६० |

**५. प्रयोगात्मककार्यं परियोजनाकार्यञ्च**

| क्र.सं. | क्षेत्रम् | परीक्षणीयाः पक्षाः | अङ्क भारः | मूल्याङ्कनाधाराः |
|---|---|---|---|---|
| १. | शिक्षण-सहभागिता | (क) उपस्थितिः<br>(ख) सहभागिता | ३ | • विद्यार्थिनां दैनिकोपस्थितेरभिलेखः<br>• जातकफलादेशविषये मनन-चिन्तन-प्रश्नोत्तर-सामूहिकविमर्शनादि-कक्षागतशिक्षणसहभागिता |
| २. | कक्षाकार्यं परियोजना-कार्यं वा | कक्षाकार्यं परियोजनाकार्यं वा | ६ | • मुहूर्तजातकसामुद्रिकसम्बद्धा लिखिता मौखिकी च प्रस्तुतिः,<br>• जन्मपत्रिकानिर्माणसम्बद्धं प्रश्नोत्तरलेखन-विमर्श-तात्पर्यस्फुटीकरणानि<br>• गृहकार्यं कक्षाकार्यं वा<br>• सम्पादितानां कार्याणां प्रतिवेदनानामभिलेखस्य संरक्षणञ्च<br>• अधीतानां विषयाणामनुसरणं दैनन्दिनव्यवहारे प्रदर्शनञ्च |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | (क) बोधः | ५ | मुहूर्तपरक-व्यावहारिक-विषयाः, गोचरफला-देशो गोचरानु-सारेणाशुभ-ग्रहाणां शान्तिविधिः, विशेषजन्मपत्रिका, तदनुरूपफलादेशः, जातकफलादेशः शकुनशास्त्रं स्वप्नशास्त्रञ्च<br>वा<br>ध्रुवादिप्रकरणम्, त्रिप्रश्न-चन्द्र-सूर्यग्रहण-परिलेखादि-प्रकरणम्, होराशास्त्रोक्त -फलादेशः, जन्ममरणादि-योगः, सामुद्रिक-फलादेशश्च |
| | | (ख) अभिव्यक्तिः | ५ | मुहूर्तपरक-व्यावहारिक-विषयाः, गोचरफला-देशो गोचरानु-सारेण-अशुभ-ग्रहाणां शान्तिविधिः, विशेषजन्मपत्रिका तदनुरूप-फलादेशश्च, जातक-फलादेशश्च<br>शकुनशास्त्रं स्वप्नशास्त्रञ्च<br>वा<br>ध्रुवादिप्रकरणम्, त्रिप्रश्नचन्द्र-सूर्यग्रहण-परिलेखादि-प्रकरणम्, होराशास्त्रोक्त -फलादेशः, जन्ममरणादि-योगः, सामुद्रिक-फलादेशः |
| ४. | त्रैमासिकपरीक्षा | मौखिकं लिखितं वा | ६ | त्रैमासिकपरीक्षायाः प्राप्ताङ्कस्यानुपातिकप्रतिशताधारेणाङ्कनिर्धारणं कर्तव्यम् |
| योगः | | | २५ | |

**६. शिक्षणसहजीकरणप्रक्रिया**

फलितज्योतिषस्य मूल्यमान्यताऽऽदर्शानामध्ययनस्य माध्यमेन विद्यार्थिनां फलादेशसम्बद्धविषयाणां ज्ञानेन सह सच्चरित्रवतां नैतिकतायुतानां च नागरिकाणां निर्माणमस्य विषयस्योद्देश्यं विद्यते । एतस्मिन् समाविष्टानां विषयवस्तुनामध्यापनक्रमे सर्वेभ्यः क्षेत्रभ्यः समानं महत्त्वं प्रदातव्यं भवति । सम्बद्धविषयवस्तुनः सहजीकरणपूवर्कं ज्ञानशिल्पधारणानां विकासनमावश्यकम् । विद्यार्थिषु सैद्धान्तिकपक्षेण सह व्यावहारिकपक्षञ्च विकासस्यानुकूलचिन्तनव्यवहारयोः समुन्नयनमेतस्य विषयस्य मुख्योद्देश्यं निर्धारितं वर्तते ।

फलितज्योतिषशिक्षणविधौ विषयक्षेत्रगतशिल्पविकासाय अध्ययनसहजीकरणप्रक्रिया अपरिहार्या मन्यते । अस्यां स्थितौ छात्रकेन्द्रितक्रियाकलापस्य महत्त्वं सर्वातिशायि भवति । छात्रकेन्द्रितक्रियाकलापस्तु पाठ्यक्रमस्य उद्देश्ये, विषयवस्तुषु छात्राणां पृष्ठभूमौ, चाधृतो भवति । अध्ययनस्य सहजीकरणं सामूहिके वैयक्तिके चाभ्यासे आश्रितं भवति ।
पाठ्यक्रमस्यास्योद्देश्यानां परिपूर्तयेऽधोलिखिता अध्ययनसहजीकरणप्रक्रिया उपयुक्ता भविष्यन्ति :

१. शिक्षकेण वार्षिकीमर्धवार्षिकीं मासिकीमर्धमासिकीं साप्ताहिकीं दैनिकीञ्च शिक्षणयोजनामेवमेव पाठ्यांश-

शिक्षण-योजनां दैनिकीं पाठयोजनां च निर्माय तदनुसारं शिक्षणकार्यं करणीयम् ।

२. शिक्षणे विशेषरूपेण विद्यार्थिकेन्द्रितशिक्षणविधिरवलम्बनीयः ।

३. छात्रेभ्यो विषयवस्तुगतामभिरुचिमुत्प्रेरणाञ्च जागरयितुमुपयुक्तवातावरणं निर्माय ततो विषयशिक्षणं कार्यम् ।

४. विद्यार्थिनां स्तरं वयोऽभिरुचिं च ज्ञात्वा सरलया प्रक्रिययाऽध्यापनीयम् ।

५. मुहूर्तशास्त्रस्याध्यापनात्पूर्वं तत्र प्रयोज्यमानानां तिथि-वार-नक्षत्र-योग-करणायनर्तुमासादिविषयाः परिचेतव्याः ।

६. प्रचलितपञ्चाङ्गस्य साहाय्येन तिथ्यादीनां भोग्यघट्यादिज्ञाने, ग्रहाणां वक्रमार्गादिज्ञाने, ग्रहावस्थितराशिज्ञाने, ग्रहोदयास्तज्ञाने च छात्राः प्रशिक्षणीयाः । व्याख्यानेनोदाहरणेन, विश्लेषणेन व्यतीतोदाहरणदर्शनेन, पञ्चाङ्गप्रदर्शनेन च सम्बद्धविषयाः आकर्षकशैल्या शिक्षणीयाः ।

७. जातकशास्त्रस्याध्यापनात् पूर्वमध्यापनीया राशि-राशिस्वामि-लग्न-होरा-द्रेष्काण-नवमांश-द्वादशांश-त्रिंशांश-मूलत्रिकोण-ग्रहमैत्री-ग्रहदृष्टि-नीचादिजातकसम्बद्धविषया सोहारहरणं सकुण्डलीकमध्यापनीयाः । जातकग्रन्थस्य यः श्लोकः पाठनीयो भवति, प्रथमं तच्छ्लोको लेखनीयस्ततश्च श्लोकानुगतमन्वयमन्वयानुगतं वर्णनम्, विश्लेषणं कुण्डलीप्रदर्शनसारांशनिदर्शनञ्च कार्यम् । ऐतिहासिकमहापुरुषाणां कुण्डलीप्रदर्शनेन तेषां जीवने घटितघटनानां पठितशास्त्राधारेण विश्लेषणं विधाय शास्त्रोक्तफले छात्राणां दृढविश्वासः कारयितव्यश्च ।

८. यस्य कस्यापि बालकस्य अथवा बालिकाया यज्जन्मस्थानं भवति प्रथमं मानचित्रेऽथवा गोलीयमानचित्रे तत् स्थानमङ्कनीयम् । तत्पश्चाच्च मानचित्रस्य साहाय्येन तस्य स्थानस्याक्षांशो देशान्तरम्, प्रामाणिकं समयान्तरं वेलान्तरं क्रान्तिमानञ्च समवगत्य प्रचलितपञ्चाङ्गस्थसारणीसाहाय्येन चरपलानि ज्ञात्वा तत्संस्कारेण सूर्योदयमानं साध्यम् । तस्माच्च स्वेष्टकालं परिज्ञाय तदाधारे जन्मस्थानीयान् स्पष्टग्रहान् जन्मस्थानीयं लग्नं पञ्चाङ्गादिकञ्च समानीय प्रथममेका जन्मपत्रिका छात्राणां पुरतोऽध्यापकेनैव निर्मेया । ततश्चैतादृशमन्यमेतत् भिन्नं भिन्नं जन्मस्थानं परिकल्प्य भिन्न-भिन्नजन्मपत्रिकानिर्माणे विद्यार्थिनो गृहकार्ये प्रेरयितव्याः । विद्यार्थिनिर्मितामेतादृशीं निदर्शनजन्मपत्रिकां समीक्ष्य आवश्यकं संशोधनं विधाय सा जन्मपत्रिकाभिलेखरूपेण संरक्षणीया ।

९. करणग्रन्थस्याध्यापनात्प्राग्भगण-राश्यंश-कला-विकलादीनां षट्कर्मसु छात्राः प्रशिक्षणीयाः ।

१०. ग्रहगणिते प्रयोज्यमानसूत्रगतपद्याध्यापनपूर्वं श्लोकस्थविषयस्तस्य महत्त्वं प्रयोज्यमानस्थलं च प्रथमं निर्देष्टव्यम् । ततः पद्यगतविषय उपस्थापनीयस्तदनुरूपं गणितीयसूत्रं दर्शयितव्यम् । सूत्रदर्शनपश्चाच्च गणितसंदर्शनपूर्वकं शुद्धोत्तरं समानीय छात्रेभ्यो विषयवस्तुज्ञानं कारयितव्यम् ।

११. छात्रेभ्यो विषयवस्तूनां सम्यग् ज्ञानाय सुन्दरक्षेत्रदर्शनमाकाशावलोकनं विविधवर्णप्रयुक्तनक्षत्रग्रहचित्रावलोकनञ्च परमावश्यकम् ।

१२. भास्वतीकरणग्रन्थोक्तविधिना स्पष्टग्रहान्, पञ्चाङ्गानि, ग्रहाणामुदयास्तं, ग्रहणादिकञ्च विगणय्य प्रचलितपञ्चाङ्गे स्थितैरेतैरेव विषयैः सह तुलनात्मकं समीक्षणं कारयितव्यम् ।

१३. स्वच्छाकाशसमये ग्रहाणां नक्षत्राणां ग्रहणस्य चावलोकनं कारयित्वैतेषामध्ययने छात्राः प्रेरयितव्याः ।

१४. नेपालस्य नगरकोटस्थितवेधशालायामथवाऽन्यस्थानस्थवेधशालायां विद्यार्थिनो नाययित्वा तत्र दूरदर्शकयन्त्रसयाय्येन ग्रहनक्षत्रवेधकरणविधिश्च दर्शयितव्यः ।

१५. एवमेव कमपि क्रियात्मकमध्ययनं परिकल्प्य विद्यार्थिभिः प्राप्ताङ्काः सम्बद्धस्थाने परीक्षानियमानुसारेण यथासमय एव प्रेषणीयाः ।

## ७. मूल्याङ्कनप्रक्रिया

विद्यार्थिनां शिक्षणोपलब्धिं सुनिश्चेतुं निर्माणात्मकं निर्णयात्मकञ्चोभयप्रकारकमेव मूल्याङ्कनं विधातव्यं भवति । विद्यार्थिनां शिक्षणोपलब्धे, सुधाराय कक्षाशिक्षणस्यैव क्रमे कक्षाकार्य-परियोजनाकार्य-प्रस्तुतीकरणोपलब्धिपरीक्षासदृशान् क्रियाकलापान् कारयित्वा सैद्धान्तिकज्ञानशिल्पयो-रवाप्तिरावश्यकी । एतत्कार्यस्य प्रभावकारिरूपेण क्रियान्वयनाय,

विद्यार्थिनां शिक्षणस्तरस्य सुधाराय च सहजीकरणक्रियाकलापस्य अभिन्नाङ्गस्य रूपेण निर्माणात्मकमूल्याङ्कनमुपयोक्तव्यम् । निर्माणात्मकमूल्याङ्कनस्य शिक्षणोपलब्धेर्निश्चितभारो निर्णयात्मकमूल्याङ्कनेऽपि संयोज्यते ।

पाठ्यक्रमेण निर्धारितस्योद्देश्यस्यानुरूपं विद्यार्थिनो ज्ञान-शिल्पाभिवृत्तीः प्राप्नुवन्नवेति विषयस्यान्वेषकं महत्त्वपूर्णं संयन्त्रं मूल्याङ्कनं भवति । विद्यार्थिनां मूल्याङ्कनं शिक्षणोपलब्धीर्ध्यात्वा सक्षमतां शिक्षणोपलब्धीनाञ्चानुरूपं शिक्षणस्य सर्वान् स्तरान् समाविश्य विधातव्यम् । आन्तरिकबाह्यमूल्याङ्कनयोर्माध्यमेन एतस्य विषयस्य मूल्याङ्कनं विधीयते । मूल्याङ्कनस्य समग्रभारतः पञ्चविंशतिप्रतिशतमान्तरिकं पञ्चसप्ततिप्रतिशतं बाह्यञ्च मूल्याङ्कनं विधीयेते । एवमेव बाह्यमूल्याङ्कनस्यान्तर्गतं लिखितपरीक्षा सञ्चाल्यते । विद्यार्थीमूल्याङ्कनस्यान्तर्गतं निर्माणात्मकं निर्णयात्मकञ्च मूल्याङ्कनं पद्धतिद्वयेनैव क्रियते । अस्य विषयस्य पाठ्यक्रमे समाविष्टानां स्तरगतसक्षमतानाम्, कक्षागतशिक्षणेपलब्धीनाम्, तासां विषयवस्तूनाम्, तैस्सह सम्बद्धस्य शिल्पस्य, शिक्षण सहभागितायाः शिक्षणसक्रियतायाश्चाधारेषु विद्यार्थिनां शिक्षणस्य मूल्याङ्कनं विधातव्यम् ।

स्तरस्यास्य विद्यार्थिमूल्याङ्कनप्रक्रिया सम्प्रति प्रचलिताक्षराङ्कनपद्धत्या विधीयते । मूल्याङ्कने निर्माणात्मकं निर्णयात्मकञ्चेति प्रक्रियाद्वयमवलम्ब्यते ।

**(क) आन्तरं मूल्याङ्कनम्**

शिक्षणसहजीकरणप्रक्रियया कक्षागतशिक्षणेन सहैव छात्राणामान्तरं निर्माणात्मकं वा मूल्याङ्कनमपि कर्तव्यम् । व्याकरणस्य शिक्षणक्रमे छात्राणां निर्माणात्मकमूल्याङ्कनाय अधोऽङ्किता विधयोऽवलम्बयितुं शक्यन्ते-

- लिखितप्रश्नोत्तरमाध्यमेन
- मौखिकप्रश्नोत्तरमाध्यमेन
- छात्राणां परस्परविचारविमर्शमाध्यमेन

अत्र क्रमे कक्षाकार्य-गृहकार्य-कक्षासहभागिता-प्रकरणपरीक्षा-पाक्षिकपरीक्षा-मासिकपरीक्षामाध्यमेन विद्यार्थिनां योग्यताभिवृद्धये प्रयासो विधीयते । एवमेव शिक्षणक्रमे शिक्षणदुर्बलविद्यार्थिभ्यो व्यावहारिकपरिवर्तनाय तेषां कृते शिक्षणकार्यस्य सहजीकरणायोपयुक्तवातावरणनिर्माणं क्रियते । तत्क्रमे स्तरानुगतयोग्यताभिवृद्धये सामूहिकविमर्शन-मौखिकपरीक्षा-लिखितपरीक्षा-प्रत्युत्पन्नमतिप्रदर्शन-प्रश्नोत्तरण-कक्षाकार्यपरीक्षणप्रभृति-कार्यैर्निर्माणात्मकं मूल्याङ्कनं विधीयते । माध्यमेनानेन विद्यार्थिनां योग्यतावृद्धिर्भवेत् ।

**अधोलिखिताधारेणान्तरमूल्याङ्कनं कर्तव्यम् :**

| क्र.सं. | क्षेत्रम् | अङ्कभारः |
|---|---|---|
| १. | शिक्षणसहभागिता | ३ |
| २. | कक्षाकार्यं परियोजनाकार्यं वा | ६ |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | १० |
| ४. | त्रैमासिकपरीक्षा | ६ |
| योगः | | २५ |

पाठ्यक्रमस्योद्देश्यानुरूपं ज्ञानं विद्यार्थिभ्यो प्रापितं नवेति स्पष्टीकरणार्थमावधिकरूपेण मूल्याङ्कनं कृत्वा छात्राणां योग्यतानिर्धारणं क्रियते । स्तरोन्नतये कक्षोन्नतये च शैक्षिकसत्रस्यान्ते निर्णयात्मकमूल्याङ्कनमन्तिमपरीक्षाया माध्यमेन विधीयते । प्रायशस्त्रैमासिक परीक्षारूपेण षाण्मासिकपरीक्षारूपेण वार्षिकपरीक्षारूपेण च तादृशो निर्णयः क्रियते ।

**(ख) बाह्यमूल्याङ्कनम्**

निर्णयात्मके बाह्ये वा मूल्याङ्कने पाठ्यक्रमे निर्धारितोद्देश्यानुरूपं छात्रैः ज्ञानम्, शिल्पमधिगतं नवेति सम्परीक्ष्य

तदनुसारेण छात्राणामुत्तीर्णत्वमनुत्तीर्णत्वं वा निर्णीयते । एतादृशं मूल्याङ्कनमावधिकं भवति । शैक्षिकसत्रस्यान्त एतद् मूल्याङ्कनं विधीयते । अधोलिखिताधारेण बाह्यमूल्याङ्कनं कर्तव्यम् :

**कक्षा ११**

| **क्र.सं** | **विषयक्षेत्रगतस्वरूपम्** | **विषयक्षेत्रम्** | **अङ्क भारः** |
|---|---|---|---|
| १. | पञ्चाङ्गशुद्धिपूर्वकं योगविशेषज्ञानम् | मुहूर्तपरक-व्यावहारिक-विषयाः | १+१ |
| | गृहप्रकरणसम्बद्धविषयाः | मुहूर्तपरक-व्यावहारिक-विषयाः | ८ |
| २. | अशुभग्रहशान्तिविधिः | गोचरफलादेशो गोचरानुसारेणाशुभग्रहाणां शान्तिविधिश्च | २+२ |
| | गोचरफलादेशसम्बद्धविषयाः | गोचरफलादेशो गोचरानुसारेणाशुभग्रहाणां शान्तिविधिश्च | ८ |
| | ग्रहाणां रत्नानि, तेषां धारणविधिश्च | गोचरफलादेशो गोचरानुसारेणाशुभग्रहाणां शान्तिविधिश्च | ८ |
| ३. | ग्रहाणामवस्थाः | विशेषजन्मपत्रिका तदनुरूपफलादेशश्च | १+२ |
| | स्थानानुसारिपञ्चाङ्गस्पष्टीकरणम् | विशेषजन्मपत्रिका तदनुरूपफलादेशश्च | ४ |
| | जन्मपत्रिकाधारेण फलादेशः | विशेषजन्मपत्रिका तदनुरूपफलादेशश्च | ८ |
| ४. | राशिस्वरूपपरिज्ञानम् | जातकफलादेशः | १+१ |
| | ग्रहाणां स्वरूपाणि | जातकफलादेशः | ८ |
| | राशीनां ग्रहाणाञ्चावस्थाधारेण फलकथनम् | जातकफलादेशः | ८ |
| ५ | शकुनसम्बद्धविषयं स्वप्नविषयकज्ञानञ्च | शकुनशास्त्रं स्वप्नशास्त्रञ्च | १२ |
| | योगः | | ७५ |

**कक्षा १२**

| **क्र.सं** | **विषयक्षेत्रगतस्वरूपम्** | **विषयक्षेत्रम्** | **अङ्कभारः** |
|---|---|---|---|
| १. | ग्रहाणां ध्रुवबीजसम्बद्धविषयाः | ध्रुवादिप्रकरणम् | २+२ |
| | पञ्चतारास्पष्टीकरणविषयाः | ध्रुवादिप्रकरणम् | ८ |
| | चन्द्रसूर्यस्पष्टीकरणविषयाः | ध्रुवादिप्रकरणम् | ८ |
| २. | ग्रहणपरिलेखः | त्रिप्रश्नचन्द्र-सूर्यग्रहण-परिलेखादि-प्रकरणम् | १+१ |

| | | | |
|---|---|---|---|
| | त्रिप्रश्न-ग्रहणसम्बद्धविषयाः | त्रिप्रश्नचन्द्र-सूर्यग्रहण-परिलेखादि-प्रकरणम् | ८ |
| ३. | नाभसयोगाः, राजयोगाश्च | होराशास्त्रोक्तफलादेशः | १+२ |
| | स्त्रीजातकवैशिष्ट्यं मृत्युसम्बद्धफलादेशविषयाश्च | होराशास्त्रोक्तफलादेशः | ४ |
| | सपरिहारबालारिष्टयोगाः, नवमांशफलम्, ग्रहस्थितिफलञ्च | होराशास्त्रोक्तफलादेशः | ८ |
| ४. | नक्षत्रवशाद् राशिवशाच्च जातकस्वरूपाणि | जन्ममरणादियोगः | १+१ |
| | ग्रहफलं तेषां कारकलक्षणञ्च | जन्ममरणादियोगः | ८ |
| | विशेषयोगाधारेण जातकफलकथनम् | जन्ममरणादियोगः | ८ |
| ५ | सामुद्रिकशास्त्रपरम्पराज्ञानम्, सामुद्रिकफलादेशविधिश्च<br>स्त्रीणामङ्गलक्षणाधारेण विशेषफलवर्णनम्, तासां विशेषसंज्ञाश्च | सामुद्रिकफलादेशः | १२ |
| योगः | | | ७५ |

# वास्तुशास्त्रम्

**कक्षा : ११ र १२** **विषयसङ्केतः (कक्षा ११ Bas ५३७ कक्षा १२ Bas ५०८)**

**पाठ्यघण्टा : ५** **वार्षिककार्यघण्टा : १६०**

## १. परिचयः

वास्तुशास्त्रस्य एष पाठ्यक्रमस्त्रिस्कन्धात्मकज्यौतिषशास्त्रस्य संहितास्कन्धान्तर्गतानां विषयाणां व्यावहारिकाणाञ्च पक्षाणामध्ययनाध्यापनयोरुद्देश्येन विकसितो वर्तते । एतदर्थं २०७६ विक्रमवर्षस्य राष्ट्रियपाठ्यक्रमप्रारूपस्य मार्गदर्शनानुसारेण विद्यालयशिक्षाया माध्यमिकस्तरे (एकादशद्वादशकक्षयोः) वास्तुशास्त्रस्य समावेशाय एतस्मिन् पाठ्यक्रमे गृह-वाटिका-पल्वल-मन्दिरादीनां समस्तमानवीयोपकरणानां विषयवस्तूनां बोधो ज्ञेयविषयाणामभिव्यक्तिसामर्थ्यञ्च छात्रेषु स्यादिति बोधाभिव्यक्त्योरुल्लेखोऽपि विहितो विद्यते । एतस्मात् पाठ्यक्रमाद् वर्तमानसन्दर्भे वास्तुशास्त्रस्य व्यावहारिकपक्षं सन्दर्श्य विद्यार्थिनां रुचिं प्रपूर्य शिक्षाया राष्ट्रियोद्देश्यञ्च प्राप्स्यते । अतोऽस्य सान्दर्भिकतां विस्तार्य उपयुक्तता सुनिश्चितता च विधास्यते इत्यपेक्षितमस्ति । अनेन पाठ्यक्रमेण सम्बद्धविषय उच्चशिक्षाया आधारोऽपि निर्मात्स्यत इति चाशास्यते ।

यज्ञभूमीनां चयनेन वेदीनिर्माणेन चास्य शास्त्रस्य उद्‌गमो जात इति विदुषां मतमस्ति । वास्तुशास्त्रं तन्त्रमपि कथ्यते, शिव एवास्य प्रवर्तकः । शिवात् पराशरः, पराशराद् बृहद्रथः, बृहद्रथाद् विश्वकर्मा एनं शास्त्रं पठितवन्तः । वायुपुराणे, गरुडपुराणे, अग्निपुराणे, ब्रह्माण्डपुराणे, स्कन्दपुराणे, ब्रह्मवैवर्तपुराणे, मत्स्यपुराणे, नारदपुराणे चास्य शास्त्रस्य चर्चापरिचर्चे दृश्येते । उपयुक्तायां भूमौ चिरस्थायि-सुख-सौभाग्य-सुस्वास्थ्य-सद्‌बुद्धि-सज्ज्ञान-सद्धर्मप्रदायकं पृथिव्यादिपञ्चतत्त्वानां समुचितप्रभावयुक्तं गृहं निर्मातुं सर्वेऽप्यभिलषन्ति । पञ्चतत्त्वानां सम्यक् प्रभावेण तद्‌गृहनिवासिन उत्तरोत्तरां प्रगतिं कुर्वाणो धनिनः सुखिनो ज्ञानिनः स्वस्थाश्च भवन्ति । प्राचीनवास्तुशास्त्रानुसारेण निर्मितानि गृहाणि मन्दिराणि च वर्तमानसमयेऽपि सुखसम्पत्तिसुस्वास्थ्यसद्‌बुद्धिप्रदायकानि भवन्तीति विचार्यैतद् विषयकं यत् किञ्चिदपि ज्ञानं छात्रेषु स्याद् इति धियैकादश-द्वादशकक्षयोरध्येष्यमाणानां छात्राणां कृत एष पाठ्यक्रमः संयोजितः । अत एवास्य पाठ्यक्रमस्य विकासक्रमे व्यक्तिविशेषाणां कृते नगरस्य वा ग्रामस्य शुभाशुभत्वम्, उपयुक्तानां भूमीनां चयनं तच्छल्यनिराकरणम्, गृहस्य पिण्डाङ्कसाधनम्, आयसाधनम्, गृहे प्रयोज्यमानानां मृत्-पाषाण-काष्ठादीनां चयनम्, द्वार-वातायन-गवाक्ष-कपाटादीनां स्थान-मान-दिङ्निर्धारणम्, गृहस्य तत्तत्स्थानेषु निर्मातव्यानां देवतायतन-स्नान-महानस-शयनादिस्थानानां निर्धारणम्, खातारम्भ-शिलान्यास-गृहनिर्माण-द्वारस्थापन-गृहप्रवेशादीनां कृते सन्मुहूर्त-लग्नानां निर्धारणं, वास्तुशास्त्रसम्बद्धविषयाणां बोधः, व्यावहारिकप्रयोगः, ज्ञातविषयाणां परीक्षणं मूल्याङ्कनञ्चेत्यादीनां विषयाणामत्र समायोजनं कृतमस्ति ।

एतस्मिन् क्रमे पाठ्यक्रमलेखनस्य विकासस्य च विषयगतौचित्यम्, पाठ्यक्रमे विद्यमानमुख्यविशेषताः, पाठ्यक्रमस्य स्वरूपञ्च संयोज्य परिचयं, विषयगतरूपेणापेक्षितं ज्ञानम्, शिल्पम्, अभिवृत्तिम्, मूल्यम्, कार्यतत्परताञ्च निश्चित्य एतस्याः क्रियात्मकस्वरूपे योग्यताम्, शिक्षणस्य स्तरम्, क्षमताया विशिष्टीकृतविस्तृतीकरणेन शिक्षणोपलब्धिम्, पूर्वकक्षाभिस्सह लम्बीयसन्तुलनस्याधारे विषयवस्तुनः क्षेत्रक्रमौ, विषयगतविशिष्टतामौलिकते शिक्षणसहजीकरणस्य विधिं प्रक्रियाम्, निर्माणात्मकनिर्णयात्मकमूल्याङ्कनयोर्विधिं प्रक्रियाञ्चोल्लिख्य विद्यार्थिमूल्याङ्कनं व्यवस्थितं वर्तते ।

## २. स्तरगतयोग्यताः

**माध्यमिकस्तरे ११-१२ कक्षयोर्वास्तुशास्त्रविषयमधीत्य विद्यार्थिनो निर्दिष्टविषयेषु क्षमा भविष्यन्ति -**

१. वास्तुशास्त्रस्यैतिह्यवर्णने तन्महत्त्वप्रतिपादने, 'आर्किटेक्चर' विषयेण सह तत्समीक्षणे

२. व्यक्तिविशेषाणां कृते नगरस्य वा ग्रामस्य शुभाशुभत्वज्ञाने, तस्य व्यावहारिकप्रयोगे

३. काकिणीज्ञाने, दिग्ज्ञाने, शङ्कुस्थापने, स्तम्भनिर्माणे तस्य व्यावहारिकप्रयोगे, वास्तुशास्त्रानुसारेणाभीष्टफलदायकगृहनिर्माणकार्ये सहायताप्रदाने

४. गृहस्य पिण्डाङ्कसाधने, आयसाधने, गृहे प्रयोज्यमानानां मृत्-पाषाण-काष्ठादीनां चयने

५. उपयुक्तानां भूमीनां चयने, तच्छल्यनिराकरणे, द्वार-वातायन-गवाक्ष-कपाटादीनां स्थान-मान-दिङ्निर्धारणे

६. गृहस्य तत्तत् स्थानेषु निर्मातव्यानां देवतायतन-स्नान-महानस-शयनादीनां स्थाननिर्धारणे

७. खातारम्भ-शिलान्यास-गृहनिर्माण-द्वारस्थापन-गृहप्रवेशादीनां सन्मुहूर्त-लग्नानां निर्धारणे च

## ३. कक्षागतशिक्षणोपलब्धयः

### कक्षा ११

**माध्यमिकस्तरीयायां ११ कक्षायां वास्तुशास्त्रविषयमधीत्य छात्रा अधो निर्दिष्टविषयेषु क्षमा भविष्यन्ति -**

| क्र.स. | विषयः | शिक्षणोपलब्धिः |
|---|---|---|
| १. | वास्तुशास्त्रस्येतिहासः | १.१ वास्तुशास्त्रस्य परिचयप्रदाने<br>१.२ वास्तुनः प्रयोजनलेखने<br>१.३ वास्तुशास्त्रप्रवर्तकानां वैशिष्ट्यप्रतिपादने<br>१.४ आर्किटेक्चर-वास्तुशास्त्रयोः विषयगतसम्बन्धसमीक्षणे |
| २. | वास्तुशुभाशुभत्वपरीक्षणम् | २.१ व्यक्तिविशेषाणां कृते ग्रामस्य नगरस्य वा शुभाशुभत्वज्ञाने<br>२.२ काकिण्याधारे भूमेर्धनर्णत्वपरिज्ञाने<br>२.३ प्लवत्वाऽऽधारे मृदाधारे च भूमेः शुभाशुभत्वज्ञाने<br>२.४ गृहनिर्माणार्थं मृत्तिका-काष्ठेष्टिकादृषदां चयने<br>२.५ कल्कवज्रलेपादीनां निर्माणविधिवर्णने |
| ३. | गृहनिर्माणं प्रवेशश्च | ३.१ गृहारम्भविधिवर्णने<br>३.२ खातारम्भशिलान्यासशङ्कुनिवेशादिकर्मणां कृते शुभमुहूर्तलग्नादिनिर्धारणे<br>३.३ नूतनगृहप्रवेशशुभमुहूर्तपरिज्ञाने<br>३.४ मुख्यगृहस्य दिङ्नियमेन देवतायतन-स्नान-शय्यादीनां स्थाननिर्धारणे<br>३.५ जीर्णगृहप्रवेशमुहूर्तनिर्धारणे, वास्तुशान्तिविधिवर्णने च |
| ४. | गृहनिर्माणे, प्रवेशे निवसने च कर्तव्यकर्माणि<br>गृहव्यवस्थापनञ्च | ४.१ गृहप्रवेशविधिवर्णने<br>४.२ वास्तुदोषनिराकरणविधिप्रतिपादने<br>४.३ जलव्यवस्थापने<br>४.४ प्राङ्गणनिर्माणप्रक्रियापरिवर्णने<br>४.५ वाटिकायां वृक्षरोपणपद्धतिपरिज्ञाने तेषां रोगनिराकरणविधिज्ञाने तत्प्रयोगे च |
| ५. | वास्तुशास्त्रोपयोगिमुहूर्तपरक-व्यावहारिकविषयाः | ५.१ प्रामाणिक-स्थानीयसूर्योदयपरिज्ञाने, पञ्चाङ्गपरिवर्तने<br>५.२ तात्कालिकस्पष्टग्रहसाधने, लग्नानयने<br>५.३ पञ्चाङ्गाधारेणावकहडाचक्रपरिज्ञाने तत्प्रयोगे<br>५.४ ग्रहाणां वक्र-मार्गोदयास्तादीनां परिज्ञाने<br>५.५ वास्तुसम्बद्धज्योतिषविषयाणां परिज्ञाने तत्प्रयोगे च |

## कक्षा १२

**माध्यमिकस्तरीयायां १२ कक्षायां वास्तुशास्त्रविषयमधीत्य छात्रा अधो निर्दिष्टविषयेषु क्षमा भविष्यन्ति -**

| क्र.स. | विषयः | शिक्षणोपलब्धिः |
|---|---|---|
| १. | वास्तुविशेषः | १.१ गृहनिर्माणे प्रशस्ताप्रशस्तभूपरीक्षणे<br>१.२ गजपृष्ठ-कूर्मपृष्ठादिभूमीनां लक्षणपरिज्ञाने तत्प्रयोजनवर्णने<br>१.३ चतुस्त्रिद्वेकशालगृहनिर्माणपद्धतिपरिज्ञाने<br>१.४ रुचकादिवास्तूनां लक्षणप्रयोजनवर्णने<br>१.५ अभीष्टफलदायकद्वारनिर्माणे |
| २. | भूमिगतजलानि | २.१ वापी-कूप-तडाग-धारानिर्माणे वास्तुशास्त्रीयविधिवर्णने<br>२.२ दकार्गलाधारेण जलशिरापरिज्ञाने<br>२.३ दूषितजलानां शुद्धीकरणविधिवर्णने<br>२.४ जलाशयानां संरक्षणपरिज्ञाने, संरक्षणाद् जायमानलाभप्रतिपादने |
| ३. | प्रासादवास्तुः | ३.१ मन्दिर-चैत्य-यज्ञशाला-मठनिर्माणप्रकारपरिज्ञाने<br>३.२ प्यागोडा-चैत्य-शिखरशैलीनां स्वरूपप्रतिपादने तच्चित्रनिर्माणे<br>३.३ मेरु-मन्दर-कैलासादिप्रासादानां लक्षणप्रयोजनवर्णने<br>३.४ वर्तमानसमये प्रचलितानां गृहनिर्माणशैलीनां वास्तुशास्त्रदृष्ट्या शुभाशुभत्ववर्णने |
| ४. | प्रतिमाविचारः | ४.१ मन्दिरानुरूपप्रतिमानिर्माणे<br>४.२ प्रतिमानुसारेण तदवयवानां परिमाणनिर्धारणे<br>४.३ रामकृष्णशिवदेवीबुद्धादीनां प्रतिमानिर्माणविधिप्रतिपादने तदायुधानां स्वरूपवर्णने |
| ५. | सामुदायिकवास्तुः/वास्तुशास्त्रोपयोगिगणितम् | ५.१ सभागृह-प्रेक्षालय-वित्तीयसंस्थानां वास्तुनिर्माणविधिवर्णने<br>५.२ त्रिभुज-चतुर्भुजायत-वर्ग-वृत्त-गर्तादीनां क्षेत्रफलघनफलसाधने तेषां व्यावहारिकप्रयोगे<br>५.३ गणितदृष्ट्या गृहनिर्माणे जायमानानां धनानां परिमाणपरिज्ञाने<br>५.४ वास्तुनि प्रयोज्यमानानां निर्माणसामग्रीणां परिमाणपरिज्ञाने |

**४. विषयक्षेत्रं क्रमश्च**

**कक्षा ११**

| क्र.सं. | विषयक्षेत्राणि | विषयवस्तूनि | बोधः | प्रयोगः | शिक्षण घण्टा |
|---|---|---|---|---|---|
| १. | वास्तुशास्त्रस्ये- | १.१ वास्तुशब्दस्य व्युत्पत्तिः | - वास्तुशब्दस्य | - व्युत्पत्तिसहित | १० |

| | | | | | |
|---|---|---|---|---|---|
| | तिहासः | परिचयश्च<br>१.२ वास्तुपुरुषस्योत्पत्तिः<br>१.३ वास्तुपुरुषस्य वरदानप्रसङ्गः<br>वास्तुशान्तियज्ञस्यारम्भसन्दर्भश्च<br>१.४ वास्तुप्रयोजनम्<br>१.५ वास्तुशास्त्रस्य परिचयः<br>१.६ वास्तुशास्त्रप्रवर्तकाः<br>१.७ वास्तुविज्ञानस्य महत्त्वमुपयोगिता च<br>१.८ आर्किटेक्चरविषयस्य वास्तुशास्त्रेण सह सम्बन्धः<br>१.९ वास्तुविज्ञानस्येतिवृत्तस्य भविष्यम् | व्युत्पत्तिज्ञानम् परिचयज्ञानञ्च<br>- वास्तुपुरुषस्योत्पत्तिज्ञानम्<br>- वास्तुशान्तियज्ञस्यारम्भसन्दर्भज्ञानम्<br>- वास्तुप्रयोजनज्ञानम्<br>- वास्तुशास्त्रस्य परिचयज्ञानम्<br>- वास्तुशास्त्रप्रवर्तकानां परिचयस्तद्वैशिष्ट्यञ्च<br>- वास्तुविज्ञानस्येतिवृत्तस्य भविष्यज्ञानम् | वास्तुशब्दस्य परिचयकथनम्<br>- वास्तुपुरुषस्योत्पत्ति-कथनम्<br>- वास्तुशान्तियज्ञस्या-रम्भसन्दर्भवर्णनम्<br>- वास्तुप्रयोजनकथनम्<br>-वास्तुशास्त्रप्रवर्तककथनम्<br>- वास्तुविज्ञानस्येतिवृत्तस्य भविष्यसमीक्षणम्<br>-आर्किटेक्चर इति विषयस्य वास्तुशास्त्रेण सह सम्बन्धकथनम् | |
| २. | वास्तुशुभा-शुभत्वपरीक्षणम् | २.१ ग्रामस्य नगरस्य वा शुभाशुभत्वम्<br>२.२ काकिणीविचारः<br>२.३ राशिभेदाद् ग्राम/नगरवासे दिग्विचारः<br>२.४ भूमिविचारः<br>२.५ प्लवत्वविचारः<br>२.६ मृत्तिकाविचारः<br>२.७ मृत्तिकाप्रश्नाधारेण भूमेः शुभाशुभत्वविचारः<br>२.८ भूमिशुद्धिः<br>२.९ कालराहुविचारः<br>२.१० निर्माणोपयोगितृण-मृत्तिकेष्टिका-शिला-काष्ठादिकानां विचारः<br>२.११ कल्क-वज्रादिविचारः | - राशिभेदाद् ग्राम/ नगरवासे शुभाशुभदिग्ज्ञानम्<br>-काकिणीज्ञानम्<br>-वास्तुनिर्माणे शुभाशुभभूमिज्ञानम्<br>- प्लवत्वविचारः<br>- मृत्तिकाविचारः<br>- मृत्तिकाप्रश्नाधारेण भूमेः शुभाशुभत्वविचारः<br>-भूमिशुद्धिविषयकज्ञानम्<br>-कालराहुज्ञानम् | - ग्रामस्य नगरस्य वा शुभाशुभत्वकथनम्<br>- काकिणीनिर्धारणम्<br>- निर्माणो-पयोगितृण-मृत्तिका-इष्टिका-शिला-काष्ठादिचयनम्<br>- भूमिशुद्धीकरणम्<br>- मृत्-कल्क-वज्रादिनिर्माणसामग्री चयनम्<br>- कालराहुनिर्धारणम् | २० |
| ३. | गृहनिर्माणं प्रवेशश्च | ३.१ गृहस्थानां कृते गृहस्य महत्त्वम्<br>३.२ गृहनिर्माणस्य प्रयोजनम्<br>३.३ गृहनिर्माणफलं | - गृहनिर्माण-जीर्णोद्धारफलज्ञानम्<br>- गृहारम्भविधिज्ञानम् | -गृहनिर्माण-जीर्णोद्धारफलवर्णनम्<br>- गृहारम्भविधिवर्णनम् | ३५ |

| | | | | | |
|---|---|---|---|---|---|
| | | जीर्णोद्धारफलञ्च<br>३.४ गृहारम्भविधिः<br>३.५ गृहारम्भे मासविचारः<br>३.६ गृहाद्यारम्भे राहुमुखज्ञानं तत्फलञ्च<br>३.७ नागशिरोविचारः<br>३.८ दिक्साधनम्<br>३.९ शङ्कुनिवेशनम्<br>३.१० खातारम्भः<br>३.११ शिलान्यासः<br>३.१२ वृषवास्तुचक्रविचारः<br>३.१३ गृहारम्भमुहूर्तविचारः<br>३.१४ गृहारम्भे लग्नस्थग्रहस्थितिवशात् फलानि<br>३.१५ गृहप्रमाणम्<br>३.१६ मुख्यगृहात् स्नानगृहादिदिग्व्यवस्था<br>३.१७ द्वारविचारः<br>३.१८ गृहाणामाच्छादने समयविचारः<br>३.१९ कलशचक्रविचारः<br>३.२० वामरविविचारः<br>३.२१ गृहप्रवेशसमयविचारः<br>३.२२ जीर्णगृहादिप्रवेशसमयविचारः<br>३.२३ वास्तुशान्तिसमयविचारः | - गृहारम्भे मासज्ञानम्<br>- नागशिरोज्ञानम्<br>-खातारम्भे विधीयमानानां कर्मणां ज्ञानम्<br>-लग्नशुद्धिसहितं शिलान्यासमुहूर्तज्ञानम्<br>-वृषवास्तुचक्रज्ञानम्<br>-गृहारम्भमुहूर्तज्ञानम्<br>- मुख्यगृहादन्यस्नानगृहादिदिग्ज्ञानम्<br>-कलशचक्रज्ञानम्<br>-वामरविज्ञानम्<br>-गृहप्रवेशसमयज्ञानम्<br>- जीर्णगृहादिप्रवेशसमयज्ञानम्<br>-वास्तुशान्तिसमयज्ञानम् | - गृहारम्भे मासकथनम्<br>- नागशिरोनिर्धारणम्<br>- विधिपूर्वकखातारम्भकरणम्<br>-शिलान्यासकरणम्<br>-वृषवास्तुचक्रानुसारेण फलवर्णनकम्<br>-गृहारम्भमुहूर्तकथनम्<br>- मुख्यगृहादन्यस्नानगृहादिदिङ्निर्धारणम्<br>-कलशचक्रानुसारेण फलकथनम्<br>-वामसूर्यनिर्धारणम्<br>-गृहप्रवेशसमयकथनम्<br>- जीर्णगृहादिप्रवेशसमयनिर्धारणम्<br>-वास्तुशान्तिकरणम् | |
| ४. | गृहनिर्माणे, प्रवेशे निवसने च कर्तव्यकर्माणि गृहव्यवस्थापनञ्च | ४.१ नागपूजनविधिः<br>४.२ शिलान्यासविधिः<br>४.३ गृहप्रवेशविधिः<br>४.४ वास्तुशान्तिविधिः<br>४.५ वास्तुदोषनिराकरणविधिः<br>४.६ निर्मितगृहभङ्गं विना वास्तुसुधारविधिः | -गृहस्य दिङ्नियमेन रोप्यवृक्षादिकानां ज्ञानम्<br>- शुभाशुभफलदायकवृक्षज्ञानम्<br>-काण्ड-बीज-उत्खात-प्रतिरोपणादिप्रकृत्याधारेण वृक्षरोपणविधिज्ञानम् | -गृहस्य दिङ्नियमेन रोप्यवृक्षादिकथनम्<br>- शुभाशुभफलदायकवृक्षनामकथनम्<br>-काण्ड-बीज-उत्खात-प्रतिरोपणादिप्रकृत्याधारेण | २० |

| | | | | | |
|---|---|---|---|---|---|
| | | ४.७ जलव्यवस्थापनम्<br>४.८ पुष्प-वृक्षादिरोपणम्<br>४.९ प्राङ्गणनिर्माणम्<br>४.१० आन्तरिकसौन्दर्य-व्यवस्थापनम्<br>४.११ वृक्षायुर्वेदः<br>४.१२ निर्माणे प्रयोज्यमानमृत्काष्ठेष्टिकानां प्रस्तरणम् | -वृक्षायुर्वेदाधारेण वृक्षचिकित्सापद्धतिज्ञानम्<br>-वृक्षाणां पोषण-संवर्द्धन-संरक्षणप्रकारज्ञानम्<br>-निर्माणक्रमे प्रयोज्यमानानां मृदां काष्ठानां प्रस्तराणामिष्टिकानाञ्च ज्ञानम् | वृक्षरोपणविधिवर्णनम्<br>-वृक्षायुर्वेदाधारेण वृक्षचिकित्साकरणम्<br>-वृक्षाणां पोषण-संवर्द्धन-संरक्षणकरणम्<br>-निर्माणक्रमे प्रयोज्यमानानां मृदां काष्ठानां प्रस्तराणामिष्टिकानाञ्च निर्धारणम् | |
| ५. | वास्तुशास्त्रोपयोगिमुहूर्तपरकव्यावहारिकविषयाः | ५.१ प्रामाणिकसूर्योदयः स्थानीयसूर्योदयश्च<br>५.२ पञ्चाङ्गं तत्परिवर्तनञ्च<br>५.३ भयातम्, भभोगोऽवकहडाचक्रञ्च<br>५.४ तात्कालिकस्पष्टग्रहाः<br>५.५ विविधस्थानस्य कृते लग्नम्<br>५.६ ग्रहाणां बाल्याद्यवस्थाः<br>५.७ ग्रहाणामुच्चनीच-वक्र-मार्गावस्थाः<br>५.८ दशमलग्नं ससन्धिद्वादशभावाश्च<br>५.९ तिथिस्वामिनः<br>५.१० तिथीनां नन्दादिसंज्ञा, शुभाशुभत्वं सिद्धियोगश्च<br>५.११ नक्षत्रस्वामिनः<br>५.१२ नक्षत्र-वाराणां ध्रुवादिसंज्ञा तत्र कर्तव्यकर्माणि च<br>५.१३ आनन्दादियोगगणना-प्रकारस्तत् प्रयोगश्च<br>५.१४ रवियोगः<br>५.१५ सर्वार्थसिद्धियोगः<br>५.१६ ग्रहणनक्षत्रफलम्<br>५.१७ कुलिक-कालवेला-यमघण्ट-कण्टकयोगाः | – पञ्चाङ्गज्ञानं तन्निर्देशश्च<br>– मुहूर्तसम्बद्ध-तिथ्यादिनिर्धारणम्<br>– त्याज्यात्याज्यविषय-विश्लेषणम्<br>– तिथिनक्षत्रस्वामिज्ञानम्<br>–<br>नक्षत्र-वाराणां ध्रुवादिसंज्ञाज्ञानं तत्र कर्तव्यकर्मज्ञानञ्च<br>– कर्मानुसारेण शुभाशुभसमयज्ञानम् | – प्रचलितपञ्चाङ्गाधारेण ग्राह्यतिथिनक्षत्रादि-चयनम्<br>– सम्बद्धमुहूर्तनिर्धारणम्<br>– निर्धारितमुहूर्तस्य ग्रहस्थितिविश्लेषणम्<br>– लग्ननवमांशाभ्यां समयनिर्धारणं तदुल्लेखश्च<br>– तिथिनक्षत्रस्वामिकथनम्<br>–<br>नक्षत्र-वाराणां ध्रुवादिसंज्ञाकथनं तत्र कर्तव्यकर्मवर्णनञ्च<br>– कर्मानुसारेण शुभाशुभमुहूर्तनिर्धारणम् | ३५ |

| | | | | | |
|---|---|---|---|---|---|
| | | ५.१८ भद्राज्ञानम्, तद्वासविचारः परिहारश्च<br>५.१९ कालाशुद्धौ वर्ज्यकर्माणि<br>५.२० प्रयोजनसहिता कालहोरा<br>५.२१ मन्वादि-युगादितिथयोऽग्निवास-विचारश्च<br>५.२२ द्विपुष्कर-त्रिपुष्करयोगलक्षणं तत्फलञ्च<br>५.२३ तारानामानि फलानि च<br>५.२४ गोचरफलम्<br>५.२५ वास्तुसम्बद्धज्यौतिषयोगाः | | | |
| सैद्धान्तिकाभ्यासः | | | | | १२० |
| प्रयोगात्मकाभ्यासः | | | | | ४० |
| योगः | | | | | १६० |

**कक्षा १२**

| क्र.सं. | विषयक्षेत्राणि | विषयवस्तूनि | बोधः | प्रयोगः | शिक्षण घण्टा |
|---|---|---|---|---|---|
| १. | वास्तुविशेषः | १.१ वास्तुनिर्माणे प्रशस्ता भूमिः<br>१.२ वास्तुनिर्माणेऽप्रशस्ता भूमिः<br>१.३ गजपृष्ठभूमिः<br>१.४ कूर्मपृष्ठभूमिः<br>१.५ दैत्यपृष्ठभूमिः<br>१.६ नागपृष्ठभूमिः<br>१.७ विविधाकृतियुता भूमिः<br>१.८ जागृतादिभूमिः | - वास्तुनिर्माणे प्रशस्ताप्रशस्त-भूमिज्ञानम्<br>- भूमिसंशोधनप्रकारज्ञानम्<br>- चतुस्त्रिद्व्येकशालगृहाणां लक्षणफलज्ञानम्<br>-वास्तुमण्डलज्ञानम्<br>-वर्ग-द्विपादिक-त्रिपादिक-पञ्चपादिकदेवताज्ञानम् | - वास्तुनिर्माणे प्रशस्ताप्रशस्तभूमिनिर्धारणम्<br>- भूमिसंशोधनकरणम्<br>- चतुस्त्रिद्व्येकशालगृहाणां लक्षणफलवर्णनम्<br>-वास्तुमण्डलनिर्माणम्<br>-वर्ग-द्विपादिक-त्रिपादिक-पञ्चपादिकदेवतावर्णनम् | ३५ |

| | | | | | |
|---|---|---|---|---|---|
| | | १.९ भूमिसंशोधनप्रकाराः<br>१.१०<br>चतुस्त्रिद्व्येकशालगृहाणि<br>१.११ रुचकवास्तु<br>१.१२ सर्वतोभद्रवास्तु<br>१.१३ नन्द्यावर्तवास्तु<br>१.१४ वर्द्धमानवास्तु<br>१.१५ स्वस्तिकवास्तु<br>१.१६ हिरण्यनाभवास्तु<br>१.१७ सुक्षेत्रवास्तु<br>१.१८ चुल्लीवास्तु<br>१.१९ पक्षघ्नवास्तु<br>१.२० सिद्धार्थवास्तु<br>१.२१ यमसूर्यवास्तु<br>१.२२ दण्डवास्तु<br>१.२३ वातवास्तु<br>१.२४ वास्तुमण्डलम्<br>१.२५ वर्ग-द्विपादिक-त्रिपादिक-<br>पञ्चपादिकदेवताः<br>१.२६ द्वाराणि | | | |
| २. | भूमिगत-जलानि | २.१ दकार्गलाधारेण जलशिराविचारः<br>२.२ वापी-कूप-तडाग-धारा-निर्माणविधिः तेषां निर्माणे शुभमुहूर्तो लग्नञ्च<br>२.३ जलशुद्धिप्रकारः<br>२.४ जलाशयानां संरक्षणोपायः तल्लाभाश्च | -वापी-कूप-तडागनिर्माणे मुहूर्तज्ञानम्<br>-जलशुद्धिप्रकार-ज्ञानम्<br>- जलाशयानां संरक्षणोपायज्ञानम् | -वापी-कूप-तडागनिर्माणे मुहूर्तनिर्धारणम्म्<br>-जलशुद्धिप्रकार-वर्णनम्<br>- जलाशयानां संरक्षणोपायकरणम् | १० |
| ३. | प्रासादवास्तुः | ३.१ पदव्यवस्था<br>३.२ अवयवप्रमाणम्<br>३.३ मन्दिरनिर्माणप्रकारः<br>३.४ चैत्यनिर्माणप्रकारः<br>३.५ | -<br>मन्दिराणामवयवप्रमाणज्ञानम्<br>-मन्दिरादिनिर्माणे प्रयोज्यमानानां चैत्यप्यागोडाशिखराधुनिक | -मन्दिराणामवयव-प्रमाणनिर्धारणम्<br>-मन्दिरादिनिर्माणे प्रयोज्यमानानां चैत्यप्यागोडाशिखराधुनिक | ३५ |

| | | | | | |
|---|---|---|---|---|---|
| | | यज्ञशालानिर्माणप्रकारः<br>३.६ मठनिर्माणप्रकारः<br>३.७ प्यागोडाशैली<br>३.८ शिखरशैली<br>३.९ चैत्यशैली<br>३.१० आधुनिकशैली<br>३.११ मेरुप्रासादः<br>३.१२ मन्दरप्रासादः<br>३.१३ कैलासप्रासादः<br>३.१४ विमानच्छन्दप्रासादः<br>३.१५ नन्दनप्रासादः<br>३.१६ समुद्रप्रासादः<br>३.१७ पद्मप्रासादः<br>३.१८ गरुडप्रासादः<br>३.१९ नन्दिवर्धप्रासादः<br>३.२० कुञ्जरप्रासादः<br>३.२१ गुहराजप्रासादः<br>३.२२ वृषप्रासादः<br>३.२३ हंसप्रासादः<br>३.२४ सर्वतोभद्रप्रासादः<br>३.२५ घटप्रासादः<br>३.२६ सिंहप्रासादः<br>३.२७ वृत्तप्रासादः<br>३.२८ चतुष्कोणप्रासादः<br>३.२९ षोडशाश्रयप्रासादः<br>३.३० अष्टाश्रयप्रासादः<br>३.३१ नेपाले प्रचलिता शैली | पद्धतिपरिज्ञानम्<br>-मेर्वादिप्रासादानां निर्माणज्ञानम् | पद्धतीनां प्रयोगः<br>-मेर्वादिप्रासादानां निर्माणम् | |
| ४. | प्रतिमाविचारः | ४.१ मन्दिरानुसारिप्रतिमावयवप्रमाणम्<br>४.२ रामस्य प्रतिमा<br>४.३ विष्णुप्रतिमा<br>४.४ कृष्णस्य प्रतिमा | -मन्दिरस्य क्षेत्रफलाधारेण तदवयवप्रमाण-ज्ञानं प्रतिमाप्रमाण-ज्ञानञ्च<br>-विविधदेवदेवीनां प्रतिमालक्षण-ज्ञानम् | -मन्दिरस्य क्षेत्रफलाधारेण तदवयवप्रमाण-निर्धारणं प्रतिमाप्रमाण-निर्धारणञ्च<br>-विविधदेवदेवीनां प्रतिमालक्षणवर्णनम् | २० |

| | | | | | |
|---|---|---|---|---|---|
| | | ४.५ बलदेवस्य प्रतिमा<br>४.६ कुमारस्य प्रतिमा<br>४.७ शिवस्य प्रतिमा<br>४.८ बुद्धप्रतिमा<br>४.९ सूर्यप्रतिमा<br>४.१० देवीप्रतिमा<br>४.११ गणेशप्रतिमा<br>४.१२ सरस्वतीप्रतिमा<br>४.१३ मन्दिरस्य क्षेत्रफलाधारेण तदवयवाः प्रतिमाश्च | | | |
| ५. वाटिका - व्यवस्था | सामुदायिकवास्तु/वास्तुशास्त्रोपयोगिगणितम् | ५.१ सभागृहम्<br>५.२ प्रेक्षालयः<br>५.३ वित्तीयसंस्था<br>५.४ प्राचीननवीनदैर्घ्यभारपरिमाणपरिभाषाः<br>५.५ क्षेत्रफलसम्बद्धगणितम्<br>५.६ चितिव्यवहारसम्बद्धगणितम्<br>५.७ राशिव्यवहारसम्बद्धगणितम्<br>५.८ क्रकचव्यवहारसम्बद्धगणितम् | -सभागृह-प्रेक्षालय-वित्तीयसंस्थानिर्माणज्ञानम्<br>- त्रिभुज-चतुर्भुज-आयत-वर्गवृत्ताकार-भूमीनां क्षेत्रफलज्ञानम्<br>-भित्तीनां चितीनामिष्टकानां विविधाकारक-गर्तानाञ्च घनफलज्ञानम्<br>-घनफलानुसारेणेष्टिकानां मृदां जलानाञ्च परिमाणज्ञानम्<br>- गृहस्य परिमाणोच्छ्रितितलानामाधारेण तत्र प्रयोज्यमानानामिष्टकानां काष्ठानां मृदाञ्च परिमाणज्ञानम् | -सभागृह-प्रेक्षालय-वित्तीयसंस्था-निर्माणम्<br>-त्रिभुज-चतुर्भुज-आयत-वर्गवृत्ताकार-भूमीनां क्षेत्रफल-साधनम्<br>-भित्तीनां, चितीनाम्, इष्टिकानां विविधाकारक-गर्तानां च घनफल-साधनम्, घन-फलानुसारेण इष्टिकानां मृदां जलानाञ्च परिमाण-निर्धारणम्<br>-गृहस्य परिमाणोच्छ्रिति-तलानामाधारेण तत्र प्रयोज्यमानानामिष्टकानां काष्ठानां मृदाञ्च परिमाणनिर्धारणम् | २० |
| सैद्धान्तिकाभ्यासः | | | | | १२० |
| प्रयोगात्मकाभ्यासः | | | | | ४० |
| योगः | | | | | १६० |

## ५. प्रयोगात्मककार्यं परियोजनाकार्यञ्च

| कक्षा ११ | | कक्षा १२ | |
|---|---|---|---|
| विषयक्षेत्राणि | शिक्षण घण्टा | विषयक्षेत्राणि | शिक्षण घण्टा |
| - वास्तुपुरुषस्योत्पत्तिकथनम्<br>- वास्तुशान्तियज्ञस्यारम्भसन्दर्भवर्णनम्<br>- वास्तुप्रयोजनकथनम्<br>- वास्तुशास्त्रप्रवर्तककथनम्<br>- वास्तुविज्ञानस्येतिवृत्तस्य भविष्यसमीक्षणम्<br>- आर्किटेक्चर इति विषयस्य वास्तुशास्त्रेण सह सम्बन्धकथनम्<br>सम्पादितानां कार्याणां प्रतिवेदनानामभिलेखस्य संरक्षणञ्च | ८ | वास्तुनिर्माणे प्रशस्ताप्रशस्तभूमिनिर्धारणम्<br>- भूमिसंशोधनकरणम्<br>- चतुस्त्रिद्व्येकशालगृहाणां लक्षणफलवर्णनम्<br>-वास्तुमण्डलनिर्माणम्<br>-वर्ग-द्विपादिक-त्रिपादिक-पञ्चपादिकदेवतावर्णनम्<br>सम्पादितानां कार्याणां प्रतिवेदनानामभिलेखस्य संरक्षणञ्च | ८ |
| - ग्रामस्य नगरस्य वा शुभाशुभत्वकथनम्<br>- काकिणीनिर्धारणम्<br>- निर्माणो-पयोगितृण-मृत्तिका-इष्टिका-शिला-काष्ठादिचयनम्<br>- भूमिशुद्धीकरणम्<br>- मृत्-कल्क-वज्रादिनिर्माणसामग्रीचयनम्<br>- कालराहुनिर्धारणम्<br>सम्पादितानां कार्याणां प्रतिवेदनानामभिलेखस्य संरक्षणञ्च | ८ | -वापी-कूप-तडागनिर्माणे मुहूर्तनिर्धारणम्म्<br>-जलशुद्धिप्रकार-वर्णनम्<br>- जलाशयानां संरक्षणोपायकरणम्<br>सम्पादितानां कार्याणां प्रतिवेदनानामभिलेखस्य संरक्षणञ्च | ८ |
| -गृहनिर्माण-जीर्णोद्धारफलवर्णनम्<br>- गृहारम्भविधिवर्णनम्<br>- गृहारम्भे मासकथनम्<br>- नागशिरोनिर्धारणम्<br>-विधिपूर्वकखातारम्भकरणम्<br>-शिलान्यासकरणम्<br>-वृषवास्तुचक्रानुसारेण फलवर्णनकम्<br>-गृहारम्भमुहूर्तकथनम्<br>- मुख्यगृहादन्यस्नानगृहादिदिङ्निर्धारणम्<br>-कलशचक्रानुसारेण फलकथनम् | ८ | -मन्दिराणामवयव-प्रमाणनिर्धारणम्<br>-मन्दिरादिनिर्माणे प्रयोज्यमानानां चैत्यप्यागोडाशिखराधुनिकपद्धतीनां प्रयोगः<br>-मेर्वादिप्रासादानां निर्माणम्<br>सम्पादितानां कार्याणां प्रतिवेदनानामभिलेखस्य संरक्षणञ्च | ८ |

| | | | |
|---|---|---|---|
| -वामसूर्यनिर्धारणम्<br>-गृहप्रवेशसमयकथनम्<br>-जीर्णगृहादिप्रवेशसमयनिर्धारणम्<br>-वास्तुशान्तिकरणम्<br>सम्पादितानां कार्याणां प्रतिवेदनानामभिलेखस्य संरक्षणञ्च | | | |
| - गृहस्य दिङ्नियमेन रोप्यवृक्षादिकथनम्<br>- शुभाशुभफलदायकवृक्षनामकथनम्<br>- काण्ड-बीज-उत्खात-प्रतिरोपणादिप्रकृत्याधारेण वृक्षरोपणविधिवर्णनम्<br>- वृक्षायुर्वेदाधारेण वृक्षचिकित्साकरणम्<br>- वृक्षाणां पोषण-संवर्द्धन-संरक्षणकरणम्<br>- निर्माणक्रमे प्रयोज्यमानानां मृदां काष्ठानां प्रस्तराणामिष्टिकानाञ्च निर्धारणम्<br>सम्पादितानां कार्याणां प्रतिवेदनानामभिलेखस्य संरक्षणञ्च | ८ | -मन्दिरस्य क्षेत्रफलाधारेण तदवयवप्रमाण-निर्धारणं प्रतिमाप्रमाण-निर्धारणञ्च<br>-विविधदेवदेवीनां प्रतिमालक्षणवर्णनम्<br>सम्पादितानां कार्याणां प्रतिवेदनानामभिलेखस्य संरक्षणञ्च | ८ |
| – प्रचलितपञ्चाङ्गाधारेण ग्राह्यतिथिनक्षत्रादि-चयनम्<br>– सम्बद्धमुहूर्तनिर्धारणम्<br>– निर्धारितमुहूर्तस्य ग्रहस्थितिविश्लेषणम्<br>– लग्ननवमांशाभ्यां समयनिर्धारणं तदुल्लेखश्च<br>– तिथिनक्षत्रस्वामिकथनम्<br>– नक्षत्र-वाराणां ध्रुवादिसंज्ञाकथनं तत्र कर्तव्यकर्मवर्णनञ्च<br>– कर्मानुसारेण शुभाशुभमुहूर्तनिर्धारणम्<br>सम्पादितानां कार्याणां प्रतिवेदनानामभिलेखस्य संरक्षणञ्च | ८ | -सभागृह-प्रेक्षालय-वित्तीयसंस्था-निर्माणम्<br>-त्रिभुज-चतुर्भुज-आयत-वर्गवृत्ताकार-भूमीनां क्षेत्रफल-साधनम्<br>-भित्तीनां, चितीनाम्, इष्टिकानां विविधाकारक-गर्तानां च घनफल-साधनम्, घन-फलानुसारेण इष्टिकानां मृदां जलानाञ्च परिमाण-निर्धारणम्<br>-गृहस्य परिमाणोच्छ्रिति-तलानामाधारेण तत्र प्रयोज्यमानानामिष्टकानां काष्ठानां मृदाञ्च परिमाणनिर्धारणम्<br>सम्पादितानां कार्याणां प्रतिवेदनानामभिलेखस्य संरक्षणञ्च | ८ |
| योगः | ४० | योगः | ४० |

## ६. शिक्षणसहजीकरणप्रक्रिया

वास्तुशास्त्रविषयस्य मूल्यमान्यताऽऽदर्शानामध्ययनस्य माध्यमेन विद्यार्थिनां वास्तुसम्बद्धविषयाणां ज्ञानेन सह शिल्पयुतानां च नागरिकाणां निर्माणमस्य विषयस्योद्देश्यं विद्यते । एतस्मिन् समाविष्टानां विषयवस्तुनामध्यापनक्रमे सर्वेभ्यः क्षेत्रेभ्यः समानं महत्त्वं प्रदातव्यं भवति । सम्बद्धविषयवस्तुनः सहजीकरणपूर्वकं ज्ञानशिल्पधारणानां विकासनमावश्यकम् । विद्यार्थिषु सैद्धान्तिकपक्षेण सह व्यावहारिकपक्षञ्च विकासस्यानुकूलचिन्तनव्यवहारयोः समुन्नयनमेतस्य विषयस्य मुख्योद्देश्यं निर्धारितं वर्तते ।

वास्तुशास्त्रविषयस्य शिक्षणविधौ विषयक्षेत्रगतशिल्पविकासाय अध्ययनसहजीकरणप्रक्रिया अपरिहार्या मन्यते । अस्यां स्थितौ छात्रकेन्द्रितक्रियाकलापस्य महत्त्वं सर्वातिशायि भवति । छात्रकेन्द्रितक्रियाकलापस्तु पाठ्यक्रमस्य उद्देश्ये, विषयवस्तुषु छात्राणां पृष्ठभूमौ, चाधृतो भवति । अध्ययनस्य सहजीकरणं सामूहिके वैयक्तिके चाभ्यासे आश्रितं भवति । पाठ्यक्रमस्यास्योद्देश्यानां परिपूर्तयेऽधोलिखिता अध्ययनसहजीकरणप्रक्रिया उपयुक्ता भविष्यन्ति :

१. शिक्षकेण वार्षिकीमर्धवार्षिकीं मासिकीमर्धमासिकीं साप्ताहिकीं दैनिकीञ्च शिक्षणयोजनामेवमेव पाठ्यांश-शिक्षण-योजनां दैनिकीं पाठयोजनां च निर्माय तदनुसारं शिक्षणकार्यं करणीयम् ।

२. शिक्षणे विशेषरूपेण विद्यार्थिकेन्द्रिशिक्षणपद्धतिरवलम्बनीया ।

३. छात्रेभ्यो विषयवस्तुगतामभिरुचिमुत्प्रेरणाञ्च जागरणार्थमुपयुक्तवातावरणस्य निर्माणानन्तरं विषयशिक्षणं कार्यम् ।

४. विद्यार्थिनां स्तरं वयोऽभिरुचिं च ज्ञात्वाऽध्यापनीयम् ।

५. वास्तुशास्त्रस्याध्यापनात्पूर्वं मुहूर्तसम्बद्धतिथि-वार-नक्षत्र-योग-करणायनर्तुमासादिविषयाः परिचेतव्याः ।

६. प्रचलितपञ्चाङ्गस्य साहाय्येन तिथ्यादीनां भोग्यघट्यादिज्ञाने, ग्रहाणां वक्रमार्गादिज्ञाने, ग्रहावस्थितराशिज्ञाने, ग्रहोदयास्तज्ञाने च छात्राः प्रशिक्षणीयाः । व्याख्यानेनोदाहरणेन, विश्लेषणेन व्यतीतोदाहरणदर्शनेन, पञ्चाङ्गप्रदर्शनेन च सम्बद्धविषयाः शिक्षणीयाः ।

७. वास्तुशास्त्रस्याध्यापनात् पूर्वमध्यापनीयाः कल्क-वज्र-शङ्कु-खात-शिला-शिलान्यास-सूत्र-मर्मस्थान-ब्रह्मस्थानादिवास्तुसम्बद्धविषया अध्यापनीयाः । वास्तुग्रन्थस्य यः श्लोकः पाठनीयो भवति, प्रथमं तच्छ्लोको लेखनीयस्ततश्च श्लोकानुगतमन्वयमन्वयानुगतं वर्णनम्, विश्लेषणं सम्बद्धछायाचित्रादिप्रदर्शनञ्च कार्यम् । ऐतिहासिकगृह-मन्दिर-प्रासादादीनां छायाचित्रादिप्रदर्शनेन पठितशास्त्राधारेण तेषां विश्लेषणं विधाय वास्तुशास्त्रोक्तलक्षणं परीक्षणीयम् ।

८. वास्तुग्रन्थस्याध्यापनात्पूर्वं भूमेः क्षेत्रफल-दैर्घ्य-विस्तृति-उच्छ्रितिसम्बद्धशब्दानामर्थ-तात्पर्यज्ञाने तत्सम्बद्धगणितषट्कर्मषु च छात्राः प्रशिक्षणीयाः ।

९. विषयवस्तूनां ज्ञाने सुन्दरक्षेत्रदर्शनं तत्क्षेत्रभ्रमणं च कारयितव्यम् ।

१०. आधुनिकस्थापत्यकला सम्बद्धशब्दानां समानस्थान उपयोज्य प्राचीनशब्दानामर्थगततुलनां विधाय तेषां समीक्षणं कारयितव्यम् ।

११. विद्यालयावकाशसमये प्रागैतिहासिकगृह-प्रासाद-मन्दिरादीनामवलोकनभ्रमणं कारयित्वा तेषामध्ययने छात्राः प्रेरयितव्या ।

१२. नेपालस्य काष्ठमण्डपस्थ वसन्तपुरप्रासादे, सिंहप्रासादे, नारायणहिटिप्रासादे, शितलनिवासे, पशुपतिमन्दिरे, स्वयम्भूनाथसदृशे स्थाने चावलोकनभ्रमणं कारयित्वा तत्रस्थ भवन-प्रासादनिर्माणे प्रयुक्तानां प्राचीनसामग्रीणां ज्ञाने छात्राः प्रेरयितव्याः ।

१३. एवमेव कमपि क्रियात्मकमध्ययनं परिकल्प्य विद्यार्थिभिः प्राप्ताङ्काः सम्बद्धस्थाने परीक्षानियमानुसारेण यथासमय एव प्रेषणीयाः ।

## ७. मूल्याङ्कनप्रक्रिया

विद्यार्थिनां शिक्षणोपलब्धिं सुनिश्चेतुं निर्माणात्मकं निर्णयात्मकञ्चोभयप्रकारकमेव मूल्याङ्कनं विधातव्यं भवति । विद्यार्थिनां शिक्षणोपलब्धे सुधाराय कक्षाशिक्षणस्यैव क्रमे कक्षाकार्य-परियोजनाकार्य-प्रस्तुतीकरणोपलब्धिपरीक्षासदृशान् क्रियाकलापान् कारयित्वा सैद्धान्तिकज्ञानशिल्पयोरवाप्तिरावश्यकी । एतत्कार्यस्य प्रभावकारिरूपेण क्रियान्वयनाय, विद्यार्थिनां शिक्षणस्तरस्य सुधाराय च सहजीकरणक्रियाकलापस्याभिन्नाङ्गस्य रूपेण निर्माणात्मकमूल्याङ्कनमुपयोक्तव्यम् । निर्माणात्मकमूल्याङ्कनस्य शिक्षणोपलब्धेर्निश्चितभारो निर्णयात्मकमूल्याङ्कनेऽपि संयोज्यते ।

पाठ्यक्रमेण निर्धारितस्योद्देश्यस्यानुरूपं विद्यार्थिनो ज्ञान-शिल्पाभिवृत्तीः प्राप्नुवन्नवेति विषयस्यान्वेषकं महत्त्वपूर्णं संयन्त्रं मूल्याङ्कनं भवति । विद्यार्थिनां मूल्याङ्कनं शिक्षणोपलब्धीर्ध्यात्वा सक्षमतां शिक्षणोपलब्धीनाञ्चानुरूपं शिक्षणस्य सर्वान् स्तरान् समाविश्य विधातव्यम् । आन्तरिकबाह्यमूल्याङ्कनयोर्माध्यमेनैतस्य विषयस्य मूल्याङ्कनं विधीयते । मूल्याङ्कनस्य समग्रभारतः पञ्चविंशतिप्रतिशतमान्तरिकं पञ्चसप्ततिप्रतिशतं बाह्यञ्च मूल्याङ्कनं विधीयेते । एवमेव

बाह्यमूल्याङ्कनस्यान्तर्गतलिखितपरीक्षां सञ्चाल्यते । विद्यार्थीमूल्याङ्कनस्यान्तर्गतं निर्माणात्मकं निर्णयात्मकञ्च मूल्याङ्कनं पद्धतिद्वयेनैव क्रियते । अस्य विषयस्य पाठ्यक्रमे समाविष्टानां स्तरानुगतयोग्यतानाम्, कक्षागतशिक्षणोपलब्धीनाम्, तासां विषयवस्तूनाम्, तैस्सह सम्बद्धस्य शिल्पस्य, शिक्षणसहभागितायाः शिक्षणसक्रियतायाश्चाधारेषु विद्यार्थिनां शिक्षणस्य मूल्याङ्कनं विधातव्यम् ।

स्तरस्यास्य विद्यार्थिमूल्याङ्कनप्रक्रिया सम्प्रति प्रचलिताक्षराङ्कनपद्धत्या विधीयते । मूल्याङ्कने निर्माणात्मकं निर्णयात्मकञ्चेति प्रक्रियाद्वयमवलम्ब्यते ।

**(क) आन्तरं मूल्याङ्कनम्**

शिक्षणसहजीकरणप्रक्रियया कक्षागतशिक्षणेन सहैव छात्राणामान्तरं निर्माणात्मकं वा मूल्याङ्कनमपि कर्तव्यम् । व्याकरणस्य शिक्षणक्रमे छात्राणां निर्माणात्मकमूल्याङ्कनाय अधोऽङ्किता विधयोऽवलम्बयितुं शक्यन्ते-

- लिखितप्रश्नोत्तरमाध्यमेन
- मौखिकप्रश्नोत्तरमाध्यमेन
- छात्राणां परस्परविचारविमर्शमाध्यमेन

अत्र क्रमे कक्षाकार्य-गृहकार्य-कक्षासहभागिता-प्रकरणपरीक्षा-पाक्षिकपरीक्षा-मासिकपरीक्षामाध्यमेन विद्यार्थिनां योग्यताभिवृद्धये प्रयासो विधीयते । एवमेव शिक्षणक्रमे शिक्षणदुर्बलविद्यार्थिभ्यो व्यावहारिकपरिवर्तनाय तेषां कृते शिक्षणकार्यस्य सहजीकरणायोपयुक्तवातावरणनिर्माणं क्रियते । तत्क्रमे स्तरानुगतयोग्यताभिवृद्धये सामूहिकविमर्शन-मौखिकपरीक्षा-लिखितपरीक्षा-प्रत्युत्पन्नमतिप्रदर्शन-प्रश्नोत्तरण-कक्षाकार्यपरीक्षणप्रभृति-कार्यैर्निर्माणात्मकं मूल्याङ्कनं विधीयते । माध्यमेनानेन विद्यार्थिनां योग्यतावृद्धिर्भवेत् ।

अधोलिखिताधारेणान्तरमूल्याङ्कनं कर्तव्यम्

| क्र.सं. | क्षेत्रम् | अङ्कभारः |
|---|---|---|
| १. | शिक्षणसहभागिता | ३ |
| २. | कक्षाकार्यं परियोजनाकार्यं वा | ६ |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | १० |
| ४. | त्रैमासिकपरीक्षा | ६ |
| योगः | | २५ |

पाठ्यक्रमस्योद्देश्यानुरूपं ज्ञानं विद्यार्थिभ्यो प्रापितं नवेति स्पष्टीकरणार्थमावधिकरूपेण मूल्याङ्कनं कृत्वा छात्राणां योग्यतानिर्धारणं क्रियते । स्तरोन्नतये कक्षोन्नतये च शैक्षिकसत्रस्यान्ते निर्णयात्मकमूल्याङ्कनमन्तिमपरीक्षाया माध्यमेन विधीयते । प्रायशस्त्रैमासिक परीक्षारूपेण षाण्मासिकपरीक्षारूपेण वार्षिकपरीक्षारूपेण च तादृशो निर्णयः क्रियते ।

**(ख) बाह्यमूल्याङ्कनम्**

निर्णयात्मके बाह्ये वा मूल्याङ्कने पाठ्यक्रमे निर्धारितोद्देश्यानुरूपं छात्रैः ज्ञानम्, शिल्पमधिगतं नवेति सम्परीक्ष्य तदनुसारेण छात्राणामुत्तीर्णत्वमनुत्तीर्णत्वं वा निर्णीयते । एतादृशं मूल्याङ्कनमावधिकं भवति । शैक्षिकसत्रस्यान्त एतद् मूल्याङ्कनं विधीयते ।

अधोलिखिताधारेण बाह्यमूल्याङ्कनं कर्तव्यम्

कक्षा ११

| क्र.सं | विषयक्षेत्रगतस्वरूपम् | विषयक्षेत्रम् | अङ्कभारः |
|---|---|---|---|
| १. | वास्तुशब्दस्य व्युत्पत्तिः परिचयश्च<br>वास्तुपुरुषस्योत्पत्तिः<br>वास्तुपुरुषस्य वरदानप्रसङ्गः<br>वास्तुशान्तियज्ञस्यारम्भसन्दर्भश्च | वास्तुशास्त्रस्येतिहासः | २+१ |
| | वास्तुप्रयोजनम्<br>वास्तुशास्त्रस्य परिचयः<br>वास्तुशास्त्रप्रवर्तकाः<br>वास्तुविज्ञानस्य महत्त्वमुपयोगिता च<br>आर्किटेक्चर-इतिविषयस्य वास्तुशास्त्रेण सह सम्बन्धः<br>वास्तुविज्ञानस्येतिवृत्तस्य भविष्यः | वास्तुशास्त्रस्येतिहासः | ४ |
| २. | ग्रामस्य नगरस्य वा शुभाशुभत्वम्<br>काकिणीविचारः<br>राशिभेदाद् ग्राम/ नगरवासे दिग्विचारः<br>भूमिविचारः<br>प्लवत्वविचारः | वास्तुशुभाशुभत्वपरीक्षणम् | २+२ |
| | मृत्तिकाविचारः<br>मृत्तिकप्रश्नाधारेण भूमेः शुभाशुभत्वविचारः<br>भूमिशुद्धिः<br>कालराहुविचारः<br>निर्माणोपयोगितृण-मृत्तिका-इष्टिका-शिला-काष्ठादिकानां विचारः<br>कल्क-वज्रादिविचारः | वास्तुशुभाशुभत्वपरीक्षणम् | ४+४ |
| ३. | गृहारम्भे मासविचारः<br>गृहाद्यारम्भे राहुमुखज्ञानं तत्फलञ्च<br>नागशिरोविचारः | गृहनिर्माणं प्रवेशश्च | १+१ |
| | दिक्साधनम्<br>शङ्कुनिवेशनम्<br>खातारम्भः | गृहनिर्माणं प्रवेशश्च | १२ |

| | | | |
|---|---|---|---|
| | शिलान्यासः<br>वृषवास्तुचक्रविचारः<br>गृहारम्भमुहूर्तविचारः<br>गृहारम्भे लग्नस्थग्रहस्थितिवशात् फलानि<br>गृहप्रमाणम्<br>मुख्यगृहादन्यस्नानगृहादिदिग्व्यवस्था<br>द्वारविचारः<br>प्राचीनगृहाणामाच्छादने समयविचारः | | |
| | गृहस्थानां गृहस्य महत्त्वम्<br>गृहनिर्माणस्य प्रयोजनम्<br>गृहनिर्माणफलं जीर्णोद्धारफलञ्च<br>गृहारम्भविधिः<br>कलशचक्रविचारः<br>वामरविविचारः<br>गृहप्रवेशसमयविचारः<br>जीर्णगृहादिप्रवेशसमयविचारः<br>वास्तुशान्तिसमयविचारः | गृहनिर्माणं प्रवेशश्च | ८ |
| ४. | नागपूजनविधिः<br>शिलान्यासविधिः<br>गृहप्रवेशविधिः<br>वास्तुज्ञानं विनैव निर्मितगृहे दोषनिराकरणविधिः<br>पूर्वनिर्मितगृहभङ्गं विना वास्तुसुधारविधिः | गृहनिर्माणे, प्रवेशे निवसने च कर्तव्यकर्माणि गृहव्यवस्थापनञ्च | ४ |
| | वास्तुशान्तिविधिः<br>जलव्यवस्थापनम्<br>पुष्प-वृक्षादिरोपणम्<br>प्राङ्गणनिर्माणम्<br>आन्तरिकसौन्दर्यव्यवस्थापनम्<br>वृक्षायुर्वेदः<br>निर्माणे प्रयोज्यमानमृत्काष्ठेष्टिकानां प्रस्तरणम् | गृहनिर्माणे, प्रवेशे निवसने च कर्तव्यकर्माणि गृहव्यवस्थापनञ्च | ८ |
| ५. | तिथिस्वामिनः | वास्तुशास्त्रोपयोगिमुहूर्तपरकव्यावहारिकविषयाः | २ |

| | | | |
|---|---|---|---|
| | नक्षत्रस्वामिनः<br>ग्रहणनक्षत्रफलम्<br>रवियोगः | | |
| | प्रामाणिकसूर्योदयः स्थानीयसूर्योदयश्च<br>पञ्चाङ्गं तत्परिवर्तनञ्च<br>भयातम्, भभोगोऽवकहडाचक्रञ्च<br>तात्कालिकस्पष्टग्रहाः<br>विविधस्थानस्य कृते लग्नम्<br>ग्रहाणां बाल्याद्यवस्थाः<br>ग्रहाणामुच्चनीच-वक्र-मार्गावस्थाः<br>दशमलग्नं ससन्धिद्वादशभावाश्च<br>तिथीनां नन्दादिसंज्ञा, शुभाशुभत्वं सिद्धियोगश्च<br>नक्षत्र-वाराणां ध्रुवादिसंज्ञा तत्र कर्तव्यकर्माणि च<br>आनन्दादियोगगणनाप्रकारस्तत् प्रयोगश्च<br>सर्वार्थसिद्धियोगः<br>वास्तुसम्बद्धज्यौतिषयोगाः | वास्तुशास्त्रोपयोगिमुहूर्तपरकव्यावहारिकविषयाः | १२ |
| | कुलिक-कालवेला-यमघण्ट-कण्टकयोगाः<br>भद्राज्ञानम्, तद्वासविचारः परिहारश्च<br>कालाशुद्धौ वर्ज्यकर्माणि<br>प्रयोजनसहिता कालहोरा<br>मन्वादि-युगादितिथयोऽग्निवासविचारश्च<br>द्विपुष्कर-त्रिपुष्करयोगलक्षणं तत्फलञ्च<br>तारानामानि फलानि च<br>गोचरफलम् | वास्तुशास्त्रोपयोगिमुहूर्तपरकव्यावहारिकविषयाः | ८ |
| योगः | | | ७५ |

## कक्षा १२

| क्र.सं | विषयक्षेत्रगतस्वरूपम् | विषयक्षेत्रम् | अङ्कभारः |
|---|---|---|---|
| १. | वास्तुमण्डलम्<br>वर्ग-द्विपादिक-त्रिपादिक-<br>पञ्चपादिकदेवताः | वास्तुविशेषः | १+१ |

| | | | |
|---|---|---|---|
| | द्वाराणि | | |
| | चतुस्त्रिद्व्येकशालगृहाणि<br>रुचकवास्तुः<br>सर्वतोभद्रवास्तुः<br>नन्द्यावर्तवास्तुः<br>वर्द्धमानवास्तुः<br>स्वस्तिकवास्तुः<br>हिरण्यनाभवास्तुः<br>सुक्षेत्रवास्तुः<br>चुल्लीवास्तुः<br>पक्षघ्नवास्तुः<br>सिद्धार्थवास्तुः<br>यमसूर्यवास्तुः<br>दण्डवास्तुः<br>वातवास्तुः | वास्तुविशेषः | १२ |
| | वास्तुनिर्माणे प्रशस्ता भूमिः<br>वास्तुनिर्माणे अप्रशस्ता भूमिः<br>गजपृष्ठभूमिः<br>गजपृष्ठभूमिः<br>कूर्मपृष्ठभूमिः<br>दैत्यपृष्ठभूमिः<br>नागपृष्ठभूमिः<br>विविधाकृतियुता भूमिः<br>जागृतादिभूमिः<br>भूमिसंशोधनप्रकाराः | वास्तुविशेषः | ८ |
| २. | जलशुद्धिप्रकारः<br>जलाशयानां संरक्षणोपायः तल्लाभाश्च | भूमिगतजलानि | २+१ |
| | दकार्गलाधारेण जलशिराविचारः<br>वापी-कूप-तडाग-धारा-निर्माणविधिः तेषां निर्माणे शुभमुहूर्तो लग्नञ्च | भूमिगतजलानि | ४ |
| ३. | पदव्यवस्था | प्रासादवास्तुः | २ |

| | | | |
|---|---|---|---|
| | अवयवप्रमाणम् | | |
| | मन्दिरनिर्माणप्रकारः<br>चैत्यनिर्माणप्रकारः<br>यज्ञशालानिर्माणप्रकारः<br>मठनिर्माणप्रकारः<br>प्यागोडाशैली<br>शिखरशैली<br>चैत्यशैली<br>आधुनिकशैली | प्रासादवास्तुः | १२ |
| | मेरुप्रासादः<br>मन्दरप्रासादः<br>कैलासप्रासादः<br>विमानच्छन्दप्रासादः<br>नन्दनप्रासादः<br>समुद्रप्रासादः<br>पद्मप्रासादः<br>गरुडप्रासादः<br>नन्दिवर्धप्रासादः<br>कुञ्जरप्रासादः<br>गुहराजप्रासादः<br>वृषप्रासादः<br>हंसप्रासादः<br>सर्वतोभद्रप्रासादः<br>घटप्रासादः<br>सिंहप्रासादः<br>वृत्तप्रासादः<br>चतुष्कोणप्रासादः<br>षोडशाश्रयप्रासादः<br>अष्टाश्रयप्रासादः<br>नेपाले प्रचलिता शैली | प्रासादवास्तुः | ८ |
| ४. | प्रासादानुसारिप्रतिमावयवप्रमाणम्<br>रामस्य प्रतिमा | प्रतिमाविचारः | २+२ |

| | | | |
|---|---|---|---|
| | विष्णुप्रतिमा<br>कृष्णस्य प्रतिमा<br>बलदेवस्य प्रतिमा<br>कुमारस्य प्रतिमा | | |
| | शिवस्य प्रतिमा<br>बुद्धप्रतिमा<br>सूर्यप्रतिमा<br>देवीप्रतिमा<br>गणेशप्रतिमा<br>सरस्वतीप्रतिमा<br>मन्दिरस्य क्षेत्रफलाधारेण तदवयवाः<br>प्रतिमाश्च | प्रतिमाविचारः | ४+४ |
| ५ | सभागृहम्<br>प्रेक्षालयः<br>वित्तीयसंस्था | सामुदायिकवास्तुः | ४ |
| | प्राचीननवीनदैर्घ्यभारपरिमाणपरिभाषाः<br>क्षेत्रफलसम्बद्धगणितम्<br>चितिव्यवहारसम्बद्धगणितम्<br>राशिव्यवहारसम्बद्धगणितम्<br>क्रकचव्यवहारसम्बद्धगणितम् | वास्तुशास्त्रोपयोगिगणितम् | ८ |
| योगः | | | ७५ |